THE

PRINCESS OF WALES

SARASVATĪ BHAVANA TEXTS

No. 69.

PART IV

EDITED BY

DR. MANGAL DEVA SHASTRI,

M. A., D. PHIL. (OXON.)

THE

SAMKṢEPA ŚĀRĪRAKA

WITH

TATTVABODHINĪ

PART IV

Published by

The Superintendent, Printing and Stationery,

Government Press, Allahabad.

1939

Printed by Ali Bukhsh at the
Royal Printing Works, Godowlia, Benares City

संक्षेपशारीरकम्

श्रीमत्सर्वज्ञमुनिविरचितम्

श्रीमन्नृसिंहाश्रमविरचितया तत्त्वबोधिन्याख्यया
टीकया सहितम्

वाराणसेयराजकीयसंस्कृतमहाविद्यालयन्यायशास्त्राध्यापकेन
न्यायव्याकरणाचार्य मीमांसाशिरोमण्युपाधिकेन
श्रीसूर्यनारायणशर्मशुक्लेन संशोधितम्

(चतुर्थो भागः)

THE

SAṂKṢEPA ŚĀRĪRAKA

OF SARVAJÑĀTMA MUNI

WITH

TATTVABODHINĪ

OF NṚSIṂHA ĀŚRAMA

EDITED BY

SŪRYA NĀRĀYAṆA ŚUKLA,

NYĀYA VYĀKARAṆĀCHĀRYA,

Professor, Govt. Sanskrit College, Benares.

1939

॥ श्रीगणेशाय नमः ॥

सटीके संक्षेपशारीरके

तृतीयोऽध्यायः ।

—:०:०:—

यदज्ञानात्कर्ता गतितदितराभ्यां परवशो
न कुत्रापि स्वास्थ्यं भजति परिशुद्धो नरहरेः ।
निरस्तद्वैतस्यानवधिसुखचित्सत्यवपुषः
पदं कर्मप्राप्ताशयशुचिरहं नौमि तदिदम् ॥

एवं प्रथमाध्यायोपदर्शिताद्वैतासङ्गब्रह्मात्मसमन्वयः द्वितीयाध्यायेन प्रत्यक्षादिमानान्तरविरोधनिरासमुखेनोपपत्त्या संभावितः सम्प्रति सम्भावितसमन्वयसमुपजातनिरुपसर्गब्रह्मात्मैक्यबुद्धेः फलपर्यन्ततायै अपेक्षितं साधनकलापं बुभुत्सोः शिष्यस्य प्रश्नमवतारयति —

श्रुत्वाऽविरोधमुपपन्नसमन्वयोत्थ-
ब्रह्मात्मतामतिरयं पुनरप्युवाच ।
ब्रह्मात्मताफलशिरस्कमतिं प्रसूते
यत्साधनं तदखिलं प्रतिपित्समानः ॥ १ ॥

श्रुत्वेति । अविरोधं प्रत्यक्षाद्यविरोधमद्वैतसमन्वयस्येति शेषः । उपपन्नसमन्वयोत्थब्रह्मात्मतामतिः उपपन्नो विरोधनिरासेन सम्भावितो योऽद्वैतसमन्वयः तस्मादुत्थिता ब्रह्मण आत्मत्वेन मतिर्यस्य

स तथोक्तः सम्भाविताद्वैतसमन्वयजन्यब्रह्मात्मतामतिरिति यावत्। अयं शिष्यः पुनरपि समन्वयाविरोधबुद्धेरनन्तरमपि गुरुमुवाच पृष्टवान्। ननु प्रत्यक्षादिविरोधनिरासेन सम्भाविताद्वैतसमन्वय-जन्यब्रह्मात्मतामतेस्तावन्मात्रेण कृतकृत्यत्वात् किमपरं प्रष्टव्यमित्याशङ्क्य न हि संभावनाज्ञानात् कृतकृत्यता तस्य तर्करूपत्वेना-प्रमाणतया अविद्यानिवर्त्तकत्वायोगात् किन्तु ब्रह्मात्मतासाक्षा-त्प्रमित्या सा च न सम्भावितसमन्वयमात्रादित्यभिप्रेत्याह—

ब्रह्मात्मतेति। ब्रह्मरूपेणावस्थानं ब्रह्मात्मता तदेव फलं शिरस्युपर्यव्यव-हितानन्तरक्षणे यस्याः सा ब्रह्मात्मता फलशिरस्का तादृश्या मते-स्तत्त्वसाक्षात्कारस्य प्रसूतिरुत्पत्तिः तस्या इत्यर्थः। स्वोत्पत्त्यव्यव-हितानन्तरक्षणभाव्यनर्थनिवृत्त्यानन्दावाप्तिफलवत्तत्त्वसाक्षात्कारजन-नस्येत्यर्थः। प्रतिपित्समानः जिज्ञासमानः सन् पुनरप्युवाचेति सम्बन्धः॥ १॥

शिष्यः स्वस्य गुरूक्तार्थानवधाने गुरोरप्ययथार्थदितत्वशङ्का स्यादिति तन्निवृत्त्यर्थं गुरूक्तार्थानुवादपूर्वकं प्रष्टव्यमेवार्थमाह—

ऐदंपर्यमखण्डवस्तुविषयं वेदान्तवाक्यस्य य-
त्पूर्वं वर्णितमस्य भूदपहतिर्मा नाम मानान्तरैः।
किं त्वस्याः परिनिष्ठितस्वविषयध्वान्तच्छिदो जन्मने
विद्याया वचनादृते किमपरं कृत्यं भवेत्साधनम्॥ २॥

ऐदंपर्यमिति। ऐदंपर्यं तात्पर्यं समन्वय इति यावत्। पूर्वं प्रथमाध्यायेऽस्य ऐदंपर्यस्यापहतिर्बाधः वेदान्तवाक्यस्य यदखण्ड-वस्तुविषयम् ऐदंपर्यं वर्णितम् अस्य मानान्तरैरपहतिमाभून्नामेत्य-ध्यायद्वयार्थानुवादः। भूदिति माङ्योगादडागमाभावः। किं तर्हि प्रष्टव्यमित्याकाङ्क्षापूर्वकमाह—किं त्वस्या इति। अस्या विद्याया इति

सम्बन्धः। विद्यां विशिनष्टि—परिनिष्ठितेति। परिनिष्ठितः सिद्धस्वभावः स्वविषय एव विषयो यस्य ध्वान्तस्य तच्छिनत्तीति परिनिष्ठितस्वविषयध्वान्तछित्तस्याः सिद्धब्रह्मविषयाविद्यानिवर्तिकाया इति यावत्। स्वविषयेति च सामानविषययोरेव विरोध इति द्योतयितुं वचनात्तत्त्वमस्यादिवाक्यादृते किमपरं साधनं कृत्यं सम्पाद्यं भवेत्तद्ब्रूहीत्यर्थः। एतदुक्तं भवति—यः प्रथमाध्याये वेदान्तानामखण्डैकरसे ब्रह्मणि समन्वय उपवर्णितः तस्य मदुद्भावितप्रत्यक्षादिबाधो भवद्भिरुपवर्णितन्यायेन मा भून्नाम तथापि ममाविद्यानिवर्त्तनक्षमतत्त्वसाक्षात्कारो नोपजायते। ततो ऽविद्यानिवृतिफलकब्रह्मैकाकारबुद्धिजनने तत्त्वमादिवाक्यादतिरिक्तमपरं किञ्चित्साधनमस्तीत्येव वक्तव्यम्। अन्यथा भवद्भिर्विद्यासाधनत्वेन वर्णितसमन्वयो मृषैव स्यात् फलव्यभिचारिणः सामग्रीत्वाभावात्तच्च साधनं किमिति न ज्ञायते अतस्तदिदमिति विस्पष्टं ब्रूहीति ॥ २ ॥

एवं शिष्येण पृष्ट आचार्यः साधनजातं तृतीयाध्यायपादचतुष्टयप्रतिपाद्यं संगृह्योत्तरमाह—

वैराग्यस्य दृढत्वमेकमपरं तत्त्वंपदार्थज्ञता
वाक्ये निर्गुणनिष्ठिते च सकले न्यायादियत्नामतिः।
सम्यग्ज्ञानसमीपदूरभवयोर्हेत्वोर्विवेकज्ञता
वाक्यार्थप्रतिपत्तिसाधनमिदं यत्नेन कृत्यं यतेः ॥ ३ ॥

वैराग्यस्येति। हैरण्यगर्भपर्यन्तसकलवैषयिकभोगतृणीकारो वैराग्यं तस्य च दृढत्वं पुनस्तादृशवैषयिकभोगेच्छानन्तरितत्वम्। एतद्वाक्यार्थज्ञाने एकं साधनं विषयभोगेच्छाक्षिप्तचित्तस्याखण्डवाक्यार्थसाक्षात्कारोदयासंभवात्। यद्यपि वैराग्यं समन्वयविचारात्प्रागेव सिद्धं तस्याप्यधिकारिविशेषणत्वेनाथशब्दोपात्तत्वात् तथापि तृतीयाध्यायप्रथमपादप्रतिपाद्यन्यायप्रतिसन्धानं

विना तद् दृढं न भवति तदभावे च न विद्या सिद्धयतीति तस्यापि प्रश्नोत्तरस्योपपत्तिः। अत एव दृढत्वमित्युक्तम्। द्वितीयपादप्रतिपाद्यं साधनमाह—अपरं तत्त्वंपदार्थज्ञतेति। तत्त्वंपदलक्ष्यार्थविषयनिर्विचिकित्सपरिज्ञानमप्यपरं वाक्यार्थप्रतिपत्तिसाधनं तादृशपदार्थज्ञानं विना निर्विचिकित्सवाक्यार्थज्ञानानुपपत्तेरित्यर्थः। तृतीयपादप्रतिपाद्यं साधनमाह-वाक्य इति। निर्गुणनिष्ठिते—निर्गुणब्रह्मस्वरूपप्रतिपादके "यो वै भूमा तत्सुखं सत्यं ज्ञानमनन्तं ब्रह्म"त्यादौ सकले सर्वशाखागते वाक्ये न्यायात्सर्वशाखाप्रत्ययमित्यादिन्यायादियत्तामतिः एतावदिति परिच्छेदमतिः सर्वशाखास्थनिर्गुणवाक्यप्रतिपाद्यनित्यशुद्धसच्चिदानन्दादिरूपेणैव ब्रह्म सर्वैर्ज्ञातव्यमितिमतिरित्यर्थः। इयं च वाक्यार्थप्रतिपत्तावपरं साधनमन्यथा तत्तच्छाखिना तत्तच्छाखास्थभूमादिरूपेणैव वा ब्रह्म ज्ञेयम्। किंवा शाखाऽन्यगतधर्मवत्त्वेनापीति विचिकित्सायां निर्विचिकित्सवाक्यार्थज्ञानानुपपत्तेरित्यर्थः। चतुर्थपादप्रतिपाद्यं साधनमाह—सम्यग्ज्ञानेति। सम्यग्ज्ञानस्य समीपे दूरे च भवौ विद्यमानौ तथोक्तौ तयोरितिविग्रहः। सम्यग्ज्ञानस्यान्तरङ्गबहिरङ्गभूतयोरित्यर्थः। हेत्वोः यज्ञदानादिशान्त्याद्योः विवेकज्ञता यज्ञदानतपोनशनादिकं वाक्यार्थज्ञानस्य वहिरङ्गसाधनं विवेकवैराग्यशान्त्यादिकमन्तरङ्गसाधनमिति विविच्य ज्ञानमपि वाक्यार्थप्रतिपत्तावपरं साधनम्। ननु शान्त्यादिरेव विद्यायामङ्गं न तस्य विवेकज्ञानमपीति चेन्न—शान्त्यादेरन्तरङ्गत्वपरिज्ञानं विना यावद्विद्योदयमनुष्ठानानुपपत्तेः। तद्विना च फलपर्यवसायिविद्यासंभवात्। यज्ञादेश्च बहिरङ्गत्वपरिज्ञानं विना श्रवणाधिकारिणा त्यागानुपपत्तेः। तत्त्यागं विना च विक्षिप्तचित्तस्य तस्य विद्यासंभवात् तस्मादुभयविवेकज्ञानमपि साधनमेव तदिदं साधनचतुष्टयं नियमेन संपाद्यमन्यथाऽधपतः स्यादित्यभिप्रायेणाह— इदं यत्नेन कृत्यमिति। कस्यैतत्कृत्यं तत्राह—यतेरिति।

विवेकादिसाधनचतुष्टयसम्पन्नस्य परमहंसपरिव्राजकस्येत्यर्थः । एतच्चास्यैव विद्यायामधिकार इति द्योतनार्थम् ॥ ३ ॥

ननु दृढं वैराग्यं कथं सम्पाद्यं कथं वा तस्य विद्यासाधनत्वं न हि साक्षात्तत्त्वमादिवाक्यवत्तस्य तत्साधनत्वमित्याशङ्क्याह—

संसारदोषमवधारयतां यथाव-
द्वैराग्यमुद्भवति चेतसि निष्प्रकम्पम् ।
वैराग्यजन्मनि दृढे च सति प्रवृत्ति-
स्त्वंपदार्थपरिशोधनकर्मणि स्यात् ॥ ४ ॥

संसारदोषमिति । संसारस्य पुत्तिकादिहिरण्यगर्भान्तभोक्तृभोगभोग्यादिनर्विविधप्रपञ्चस्य दोषमाध्यात्मिकादितापत्रयानलदह्यमानस्वरूपमवधारयतः निश्चिन्वतः यथावत् सम्यगवधारयत इति सम्बन्धः । निष्प्रकम्पं दृढतरमक्षय्यादिवाक्यप्रामाण्यश्रद्धाजाड्यं विहाय दोषदुष्टत्वेन यथावत्संसारेऽवधृते दृढवैराग्यं भवतीत्यर्थः । विद्यां प्रति तस्य परम्परया साधनत्वमित्याह—वैराग्येति । दृढतरवैराग्योत्पत्तौ त्वंपदार्थविवेके निष्प्रकम्पप्रवृत्तिः स्यात् पदार्थज्ञानाच्च वाक्यार्थज्ञानमिति परम्परया तत्साधनत्वं तस्येत्यर्थः ॥ ४ ॥

ननु संसारे पुत्रादिसम्भूतविचित्रानेकसुखवति कुतो दोषबुद्धिर्भवेत् संसारयाथार्थ्यज्ञानादिति चेत् तद्वा कुतो भवतीत्याकाङ्क्षायां वेदप्रदर्शितोत्क्रान्तिगत्यागतिगर्भवासादिदुःखानुसंधानपूर्वकविचारादित्याह—

संसाररूपमवगच्छ विविच्यमानं
यस्मिञ्श्रुते भवति तद्विषया जुगुप्सा ।
वेदः प्रकाशयति संसरणं यथाऽस्य
जीवस्य जन्ममरणे व्रजतः क्रमेण ॥

संसाररूपमिति । संसारस्वरूपं विविच्यमानं विचार्यमाणं कथं विचार्यमाणमित्यत्राह—वेद इति । "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति स उल्वावृतो गर्भः तं प्रेतं दिष्टं तेऽर्चिषमभिसंभवन्ति तं देवा भक्षयन्ति तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्त्तन्ते अतो वै खलु दुर्निष्प्रततरं कपूयां योनिमापद्येरन् श्वयोनिं वा" जायस्व म्रियस्व तस्माज्जुगुप्सेत्येवमादिः क्रमेण जन्ममरणे व्रजतोऽस्य जीवस्य यथा येन प्रकारेण जननात्पूर्वं गर्भवासाद्यनेकविधदुःखोपप्लुतत्वेन जननानन्तरं स्थितिकाले आध्यामिकादितापत्रयकालानलकवलितत्वेन मरणकाले च हिक्कोर्ध्वश्वासादिसमुत्पाताऽनेकविधदुःखनिकरनिविष्टत्वेन मरणानन्तरं च क्षुद्रसुखभोगार्थगमनागमनप्रयुक्तदेवभक्षणसूकरादिकुत्सितयोनिप्रवेशजनितदुःखनिविष्टत्वेन च संसरणं संसारं प्रकाशयति । तथा विविच्यमानं संसारमवगच्छेति सम्बन्धः । संसारयाथात्म्यज्ञानेन किं फलिष्यति तत्राह—यस्मिन्श्रुत इति । यस्मिन्संसारे श्रुते उक्तश्रुत्यावगते तद्विषया जुगुप्सा वैराग्यं तत्संसाररूपमिति सम्बन्धः । संसाररूपश्रवणमात्रेणापि ततो जुगुप्सा भवति किमु वक्तव्यं विविच्य ज्ञान इत्यभिप्रायेणोक्तं श्रुत इति । न च पुत्रादिसंभूतसुखादिमत्त्वात् तस्मिन्दोषबुद्ध्यनुपपत्तिः । न हि पुत्रादेः सुखादिहेतुत्वं प्रत्युतानर्थकरत्वमेव । तदुक्तम् "अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरमि" त्यारभ्य "पित्रोर्दुःखस्य नास्त्यन्तो यदि चेद् म्रियते तदे" त्यन्तेन । एवमेव भार्यादेरपि तत्र तत्र "नारीवलिशपिण्डिका" "नार्यो नरविहङ्गानाम्" "अर्थनामर्जने क्लेश" इत्यादावनर्थकरत्वमुक्तम् । कथं तर्हि दुःखसाधनेपि पुत्रादौ लौकिकानां सुखहेतुत्वप्रतीतिरिचेत् सूकरस्येव विष्ठायामविवेकादिति गृहाण । तस्मात्संसारस्य स्वतो दोषवत्त्वादविवेकादेव सुखसाधनत्वज्ञानादि विविच्य तत्स्वरूपज्ञाने तज्जिहासा भवत्येवेति भावः ॥ ५ ॥

नन्वानन्दादिवदात्मनः स्वभावभूतस्य संसारस्य कथं दोषदर्श-

नेनापि जिहासा भवेत् स्वाभाविकस्योपायशतेनापि हानायोगा-
दित्याशङ्क्य स्वाभाविकत्वमसिद्धमित्याह—

शुद्धः परो न खलु वाङ्मनसव्यतीतः
संसारदुःखमतिदुःसहमश्नुवीत।
स्वाविद्यया हि पर एव स जीवभाव-
मागत्य संसरति लिङ्गसमागमने ॥ ६ ॥

शुद्ध इति। शुद्धः रागादिदोषरहितः परः परमात्माऽतिदुःसहं संसारदुःखं स्वभावतो नाश्नुवीतेत्यर्थः। कामो हि कामात् क्वचिदपि स्वास्थ्यमलभमानस्तत्र तत्र दुःसहं संसारदुःखमनुभवन्दृश्यते। श्रूयते च "कामान्यः कामयते मन्यमानः स कामभिर्जायते तत्र तत्रे"त्यात्मा च रागादिहीनः कथं तस्य स्वाभाविकोऽसंसारो भवेदित्यर्थः। नन्वहं कामीत्यात्मनः कामवत्त्वस्य मनसानुभूयमानत्वादिति नु कामयमान इति श्रुत्या च तस्य प्रतिपादनात्कथं रागादिमत्स्वाभाव इत्याशङ्क्या-त्मनो मनोवागगोचरत्वेन ताभ्यां कामवत्त्वप्रतिपादनासम्भवात् तयो-श्चान्तःकरणविषयत्वात् मैवमित्यभिप्रेत्याह—वाङ्मनसव्यतीत इति। वाङ्मनसागोचर इत्यर्थः। नन्वात्मनो रागाद्यभावेन संसाराभावे संसारी कोपि न स्यात्। न ह्यचेतनस्य संसारो युज्यते। तथा च संसारोच्छेदिनी विद्यापि व्यर्था स्यादित्याशङ्क्यात्मनः स्वाभाविक-संसाराभावेपि स्वाविद्यया काल्पनिकः संसारोऽस्त्येवेत्याह—स्वाविद्ययेति। सः श्रुतिसु नित्यशुद्धमुक्तत्वेन प्रसिद्धः परः परमात्मैव स्वाविद्यया संसरति। उत्क्रान्तिगत्यागतिप्रयुक्तनानाविधदुःखमनु-भवति। ननु परस्य विभुत्वाद्विभुनः स्वतस्तावद्गमनादिकं न सम्भ-वति अविद्ययापि तन्न सम्भवति अविद्याया अपि ब्रह्माण्डव्यापि-त्वात्। ननु जीवस्यापि स्वतो गमनादिकं न सम्भवतीति चेन्न तस्या-

गुतया स्वतः एव गमनाद्युपपत्तेरित्याशङ्क्याह--लिङ्गसमागमेनेति। लिङ्गशरीरसम्बन्धेन स्वाविद्यया लिङ्गसमागमेन जीवभावं परिच्छिन्नत्वमागत्य प्राप्य संसरतीति सम्बन्धः। तथा चात्मनः स्वतोऽविद्यया वा गमनाद्यसम्भवेपि परिच्छिन्नलिङ्गशरीरसम्बन्धात् गमनाद्युपपत्तेः। तत्सम्बन्धस्य चाविद्याधीनत्वादाविद्यक एव संसार इत्यर्थः। यत्तूक्तं जीवस्याणुत्वात् स्वतोगमनमिति तदसत् तस्याणुत्वे प्रत्यक्षत्वानुपपत्तेः। सर्वदेहव्यापि सुखानुभवाभावप्रसङ्गाच्च। ननु ज्ञानसुखादेः शरीरव्याप्यवृत्तित्वात्तदुपपत्तिरिति चेन्न। तस्य गुणत्वेनाश्रयादन्यत्रोपलम्भानुपपत्तेः। ननु प्रदीपप्रभायां तथा दृष्टमिति चेन्न। प्रभायाः रूपवत्त्वस्पर्शवत्त्वक्रियावत्त्वादिना द्रव्यत्वानुमानात्। ननु रूपादयस्तदाश्रयतेजोनिष्ठा एवानुभूयन्त इति चेन्न। प्रभा दहतीतिप्रतीतेः। तत्र द्रव्यान्तरकल्पनायां प्रभायामाश्रयातिरेकेण स्थितिकल्पनायोगाच्च। ननु तप्ततैलकटाहनिक्षिप्तहरिचन्दनबिन्दोरेकप्रदेशवृत्तित्वेपि तत्समवेतशीतस्पर्शो युगपत्सर्वत्रोपलभ्यत इति चेन्न। तत्र ह्यतिशीतचन्दनद्रव्यसंयोगेन तैलसंयुक्ततेजोऽवयविविशेषे नष्टे स्वाभाविकतैलस्पर्श एवाभिभवाभावादनुभूयते न चन्दनस्पर्शः तैलं शीतमासीदितिप्रतीतेः। ननु स्वाज्ञानादिकमपि द्रव्यमेवेति चेत् तत्किं विभु किं वा परिच्छिन्नम्। नाद्यः। आत्मनस्तद्धर्मकत्वानुपपत्तेः विभुद्रव्यस्यानाश्रितत्वात्। तत्संयोगित्वमात्रेण तद्धर्मकत्वे घटादेरपि तद्धर्मकत्वप्रसङ्गः। किं च तस्य विभुत्वे युगपत्सर्वविषयप्रकाशप्रसङ्गः प्रकाशसम्बन्धित्वात्। ननु प्रकाशवद्द्रव्यसम्बन्धिन एव प्रकाश्यत्वम्। आत्मा च प्रकाशवत् द्रव्यं न युगपत् सर्वेण सम्बध्नात्यणुत्वादिति चेत्तर्हि घटोऽपि न प्रकाशेत तत्सम्बन्धाभावात्। द्वितीये, तत्किं मध्यमपरिमाणमुताणुपरिमाणम्। नाद्यः। तदुपादानानिरूपणात् आत्मा तदुपादानमिति चेन्न। अणुद्रव्यस्यैकस्य मध्यमपरिमाणद्रव्योपादानत्वानुपपत्तेः। कार्यद्रव्यस्योपादानमात्रवृत्तित्वेनान्यत्रानुपलम्भ-

प्रसङ्गाच्च। नन्वात्मातिरिक्तमुपादानं कल्प्यत इति चेन्न। तथात्वे तस्यात्मधर्मत्वानुपपत्तेः। न द्वितीयः। अन्यत्रानुपलम्भप्रसङ्गात्। तस्मादात्मनोऽणुत्वमनुपपन्नम्। श्रुतिरपि "स वा एष महानज आत्मा" इति जीवस्य स्वतो महत्त्वमेव दर्शयति। न चाणुत्वश्रुतिविरोधः-तस्या दुर्दर्शत्वाभिप्रायत्वात्। दर्शयति च श्रुतिरणुपरिमाणमात्मन औपाधिकमिति "बुद्धेर्गुणेनात्मगुणेन चैव ह्याराग्रमात्रो ह्यवरोपि दृष्ट" इत्यवरो जीवः आत्मगुणेनात्मधर्मेण महानपि बुद्धिगुणेन बुद्धिपरिमाणेनाराग्रमात्रो दृष्ट इति श्रुत्यर्थः। सूत्रकारोऽपि "तद्गुणसारत्वादि"त्यादिनाणुत्वादिकमात्मन औपाधिकमेव दर्शयति तस्मल्लिङ्गसम्बन्धादेवात्मनो गमनादिसंसारो न स्वाभाविकः अतो दोषदर्शनेन तज्जिहासा भवतीति ॥ ६ ॥

ननु लिङ्गसम्बन्धिनः संसारित्वे लिङ्गस्यापि मुक्तिभाक्त्वं स्यात् संसारिण एव मुक्तिभाक्त्वात् अतः केवलस्यैवात्मनः संसारो वक्तव्यः तथा च स्वाभाविक एव स्यादित्याशङ्क्य लिङ्गस्यात्मनः संसारित्वे द्वारमात्रत्वन्न तु संसारिवत्तस्यानुप्रवेशः अतो नोक्तदोष इत्यभिप्रेत्याह—

ब्रह्मैव संसरति मुच्यत एतदेव
दौवारिकं भवति संसरणं तु तस्य।
मुक्तिः पुनर्भवति चिद्वपुषैव तस्य
स्वाज्ञानतः स्वमहिमप्रतिबोधतश्च ॥ ७ ॥

ब्रह्मैवेति। एतद्ब्रह्मैव नित्यशुद्धबुद्धमुक्तं ब्रह्मैव संसरति तदेव मुच्यते। परन्तु तस्य ब्रह्मणः संसरणं दौवारिकं लिङ्गशरीरद्वारा यातं न तु स्वाभाविकं स्फटिकस्येव लौहित्यमित्यर्थः। तर्हि संसारवन्मुक्तिरपि किं दौवारिकी नेत्याह—मुक्तिरिति। चिद्वपुषैव चिदानन्दै-

करसस्वरूपेणैव तस्य ब्रह्मणः । नन्वसङ्गे नित्यमुक्ते ब्रह्मणि कथं लिङ्गसम्बन्धद्वारापि संसारः स्यात् । संसारस्य च दौवारिकत्वे मुक्तिरपि तादृश्येव किं न स्यादित्याशङ्क्य लिङ्गसम्बन्धस्याविद्यकत्वेऽविद्यायाश्च वस्तुस्वभावानपेक्षत्वात् । खरतरदिनकरकिरणनिकर-सम्बन्धसमुपजातसंतापेन स्फुटतरस्फोटोत्पत्तिसमर्थाया अपि भूमेरविद्यया पृथुतरबहललोलकल्लोलमालावलीकलितसलिलावलीभिरार्द्रितत्वभानात् न लिङ्गद्वारा संसारानुपपत्तिः । नापि मुक्तेः स्वाभाविकत्वानुपपत्तिः । औपाधिकसंसारनिवृत्तिस्वरूपाया मुक्तेः स्वाभाविकत्वनियमात् संसारस्याविद्यकत्वेऽविद्यानिवृत्तिमात्रस्यैवापेक्ष्यमाणत्वात् । तन्निवृत्तेश्च विद्ययैव संभवाद्विद्यायाश्च वस्तुस्वरूपानुविधायित्वादित्यभिप्रेत्याह—स्वाज्ञानत इति । स्वाज्ञानतो दौवारिकं संसरणं स्वमहिमप्रतिबोधतश्च चिद्वपुषा मुक्तिरिति सम्बन्धः ॥ ७ ॥

नन्वेवं सति यद्वस्तुस्वरूपानुरोधि न भवति तद्यत् किञ्चिद् द्वारं विना स्वतो वस्तुनि न संभवति यच्च वस्तुस्वरूपानुरोधि तन्न वस्तुस्वरूपातिरिक्तं द्वारमपेक्षत इत्युक्तं भवति तथा चाज्ञानमपि संसारवद्ब्रह्मणि द्वारं विना न स्यात् वस्त्वनुरोधित्वाभावात् ब्रह्मणि साक्षात्कारस्त्वन्तःकरणसम्बन्धं विनापि स्यात् । मुक्तिवद्वस्त्वनुरोधित्वादित्याशङ्क्याह—

स्वाज्ञानान्वयिनी चिदेव भवति स्वाज्ञानमस्याः पुन-
र्नास्त्यन्तःकरणोपरागशबलीभावं विना युक्तितः ।
कूटस्थे न तमस्विता न घटते नो विक्रिया तत्र न-
स्तस्मादेष विशेषः ईषदुचितः स्वीकर्त्तुमेते प्रति ॥ ८ ॥

स्वाज्ञानान्वयिनीति । स्वाज्ञानसम्बन्धिनी चिदेव केवलचैतन्यमेव स्वज्ञानं स्वविषयज्ञानं यस्याः चितः अन्तःकरणोपरागशबली-

भावमन्तःकरणोपरक्तत्वलक्षणशबलत्वमज्ञानाश्रयत्वं हि चैतन्यस्य साक्षादेव नान्तःकरणाद्यवच्छेदेन स्वकार्यवृत्तित्वानुपपत्तेः। स्वविषयज्ञानाश्रयत्वं तु नान्तः करणाद्यवच्छेदं विना संभवति। निरवयवस्य तस्य स्वतोऽज्ञानपरिणामानुपपत्तेरिति युक्तिवशादेष्टव्यमित्यर्थः। ननु कूटस्थात्मनोऽप्यविद्याश्रयत्वमनुपपन्नं ज्ञानस्य च जडान्तःकरणायत्तत्वमप्यनुपपन्नमित्याशङ्क्याह—कूटस्थ इति। कूटस्थे आत्मनि नमस्विता अज्ञानाश्रयत्वन्न घटत इति न किन्तु घटत एव। कल्पितस्यात्मकौटस्थ्याव्याहन्तृत्वादित्यर्थः। विक्रिया अखण्डाकारवृत्तिलक्षणा तत्र कूटस्थे ब्रह्मणि। न च ज्ञानस्य जडान्तःकरणायत्तत्वानुपपत्तिः वृत्तिरूपज्ञानस्यापि जडत्वादिति भावः। यतो वस्तुस्वरूपानधीनतदधीनयोरप्यज्ञानज्ञानयोः कूटस्थाश्रयत्वे शबलाश्रयत्वे च कश्चिद्विशेषो वर्णितः। तस्मात्तयोः संसारमुक्तिभ्यां साम्यं नाशङ्कनीयमित्याह—तस्मादिति। ईषद्विशेषः—कश्चिद्विशेषः। एते–अज्ञानज्ञाने प्रति तस्माच्चिन्मात्रस्यैवाविद्यकोपाधिसम्बन्धात् संसारः स्वतो मुक्तिरिति भावः॥ ८॥

ननु कोसावुपाधिः यद्द्वाराऽसङ्गस्याप्यात्मनः संसार इति तत्राह—

> पुर्यष्टकं भवति तस्य परस्य मोहा-
> त्तेनान्वितस्य तु नभोमलवद्व्यलीकम्।
> दुःखं त्रिधा भवति संसरणाभिधानं
> नान्यः परादधिकरूपभृदस्ति जीवः॥ ९॥

पुर्यष्टकमिति। यद्यपि लिङ्गशरीरमुपाधिरित्युक्तमेव तथापि न तन्मात्रमुपाधिरिति संसारनिमित्तत्वेनोपाध्यन्तरवर्णनमत्र क्रियत

इति न विरोधः। ज्ञानकर्मेन्द्रियप्राणभूतपञ्चकान्तः करणचतुष्टयकाम कर्माविद्यालक्षणवक्ष्यमाणपुर्यष्टकं पुर्यष्टकशब्देनोच्यते। तेन पुर्यष्टकेनान्वितस्यावच्छिन्नस्य नभोमलवदाकाशकात्स्न्यवद्व्यलीकं मिथ्याभूतं संसरणाभिधानं संसाराख्यं त्रिधा आध्यात्मिकाधिभौतिकाधिदैविकभेदेन त्रिप्रकारं दुःखं भवति। परमात्मन एव स्वाविद्याविलासिताहंकारप्रमुखप्रपञ्चेषु क्वचित्तादात्म्याभिमानात्क्वचित्स्वाभिभवाभिमानात् मिथ्याभूतादाध्यात्मिकादिभेदेन त्रिप्रकारं संसाराख्यं दुःखं भवति। न ततो भिन्नस्य जीवस्य भेदे प्रमाणाभावादित्यभिप्रेत्याह--नान्य इति। परात्परमात्मनः सकाशादन्योधिकरूपभृत् वस्तुतो रूपान्तर भृत् जीवो नास्तीत्यर्थः ॥ ६ ॥

ननु किमिति जीवस्य परस्माद् भेदाभावः। तस्य श्रुतानुपपत्तिसिद्धत्वात्तथा हि "यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति" त्यग्निविस्फुलिङ्गदृष्टान्तेन जीवस्य परांशत्वं श्रूयते। "ममैवांशो जीवलोक" इति स्मर्यते च। नचांशांशिनोरभेदः संभवति। तथात्वे त्वंशांशिभावस्यैवानुपपत्तेः। तथा सन्मूलाः सोम्येमाः सर्वाः प्रजा इति जीवस्य परविकारत्वं श्रूयते। न च तदपि तयोर्भेदं विना सम्भवति। द्वा सुपर्णेति श्रुत्या साक्षादेव तयोरत्यन्तं भेदः श्रूयते। अतः सर्वथाप्यस्त्येव भेद इत्याशङ्क्य किं जीवपरयोरंशांशिभावमात्रं विकारविकारिभावमात्रं च श्रुत्यादिनापि प्रतिपिपादयिषितमुत स मुख्य एव। नाद्यः। अङ्गीकृतेः बिम्बप्रतिबिम्बभावेपि तत्सत्त्वात्। न द्वितीयः। निरवयवस्य कूटस्थस्य परस्य वास्तवांशित्वविकारित्वानुपपत्तेः। तथात्वे वा परस्य मृदादिवदनित्यत्वापातात्। जीवस्य च सर्वगतस्य वास्तवांशत्वानुपपत्तेः। वास्तवविकारत्वे च कार्यतया नाशप्रसङ्गेन कृतहानाकृताभ्यागमप्रसङ्गादित्यभिप्रेत्यांशपक्षं विकारपक्षं च दूषयति--

नांशः परस्य न च तस्य विकार एष-
नास्त्यन्तमेव च विभिन्नवपुः परस्मात् ।
जीवोऽयमभ्युपगतः कुत एतदेवं
ब्रह्मात्मतावचनजातविरोधहेतोः ॥ १० ॥

नांश इति । एष जीवः जीवपरयोरत्यन्तभेद इति मतं दूषयति—नात्यन्तमिति । विभिन्नवपुर्भिन्नस्वरूपः श्रुतिसिद्धो भेदः कथं निराक्रियत इति तत्र हेतुं पृच्छति—कुत एतदिति । जीवः परस्मादत्यन्तभिन्नवपुर्नाभ्युपगत इत्येतत्कुतो हेतोः न कुतोपीत्यर्थः । उत्तरमाह—एवं ब्रह्मात्मतेति । एवमेव सति तयोर्भेदे सति ब्रह्मात्मतावचनजातस्य ब्रह्मात्मैक्यप्रतिपादकतत्त्वमादिवाक्यजातस्य विरोधः स्यात्तस्मात्तयोरभेद एव वक्तव्यः । श्रुतिस्तु लोकसिद्धभेदमनुवदत्येव परं न तु तत्प्रतिपादयति अपुरुषार्थत्वादनर्थकत्वाच्चेत्यर्थः । अंशांशित्वादिपक्षेप्ययं विरोधस्तुल्यः ॥ १० ॥

किंचातत्परप्रवेशादिश्रुत्यविरोधेन जीवपरयोरंशांशित्वाद्यावेदकश्रुतेः बिम्बप्रतिबिम्बभावेनाद्वैतपरत्वोपपत्तौ न तयोर्वास्तवांशांशित्वादिसिद्धिरित्यभिप्रेत्याह—

अपि च विश्वमनुप्रविवेश तत्
परममेव पदं परमात्मनः ।
इति वदत्सु सुहृत्स्विव तत्पर-
श्रुतिवचःसु कथं स ततोऽधिकः ॥ ११ ॥

अपि चेति । तद्यन्स्वाविद्यया विश्वं ससर्ज तत्परमात्मनः परमं पदं स्वरूपमेव विश्वमन्वन्तः प्रविवेश । अनुप्रवेशश्च सूर्यबिम्बस्येव जले

प्रतिबिम्बभावेनैव न तु मूषिकादेरिव विलादावात्मनः सर्वगतत्वादिति। एवं वदत्सु प्रतिपादयत्सु सुहृत्स्विव सुहृत्सादृश्यं चात्रातिशयितहितबोधित्वेनातिशयितहितबोधिष्वित्यर्थः। तत्परश्रुतिवचःसु तात्पर्येणाभेदं प्रतिपादयत्सु श्रुतिवचःसु "स एष इह प्रविष्टः" "अनेन जीवेनात्मनानुप्रविश्य" त्यादिषु सत्सु स जीवः कथं ततः परस्मादधिकः अन्यो भवेत् न कथमपि भेदे जीवरूपेणात्मनेत्यभेदश्रुतिविरोधादित्यर्थः ॥ ११ ॥

एवं श्रुतिपर्यालोचनया न वस्तुतो जीवपरयोर्भेद इत्युक्त्वानुमानेनापि तत्साधयितुं स्वप्रकाशब्रह्मस्वरूपव्यतिरिक्तस्य पराधीनप्रकाशत्वं कल्पितत्वं च साधयति—

प्रच्यावि वस्तु यदिहास्ति निजस्वरूपा-
दप्रच्युतैकरससंविदधीनमस्य ।
प्रच्यावितास्फुरणमित्यवगत्य तत्र
तत्कल्पितं सकलमाकलयानुमानात् ॥ १२ ॥

प्रच्याबीति। प्रच्योतुं ब्रह्मस्वरूपाद्बहिर्भवितुं शीलमस्येति प्रच्यावि ब्रह्मस्वरूपातिरिक्तमिति यावत्। निजस्वरूपाद् ब्रह्मस्वरूपादप्रच्युतैकरससंविदधीनमप्रच्युता अबहिर्भूतैकरसैकरूपा या संवित् चैतन्यं तदधीनमस्य प्रच्याविवस्तुनः स्फुरणं प्रच्याविजीवं परस्मात्पृथक्कुर्वन् त्वमिति शेषः। तत्र स्फुरणरूपे ब्रह्मणि तद्ब्रह्मस्वरूपप्रकाशाधीन प्रकाशं सकलमनुमानात्परिकल्पितमाकलय यद्ब्रह्मस्वरूपातिरिक्तवस्तु तन्निजस्वरूपाद्बहिर्भूतं ब्रह्मस्वरूपप्रकाशाधीनप्रकाशं यथा घटादीति ब्रह्मस्वरूपातिरिक्तस्य तत्स्वरूपप्रकाशाधीनप्रकाशत्वलक्षणं दृश्यत्वमवगम्य तदनन्तरं यद्दृश्यं तत्कल्पितं यथा शुक्तिरूप्यमिति

तस्य ब्रह्मस्वरूपातिरिक्तवस्तुनः ब्रह्मणि कल्पितत्वं ब्रह्मस्वरूपाज्जीवं पृथक्कुर्वन् त्वमवधारयेत्यर्थः। तथा च जीवस्य ब्रह्मस्वरूपातिरिक्तत्वे तद्दृश्यत्वं वक्तव्यम्। तद्दृश्यत्वे च तत्कल्पितत्वं वक्तव्यं कल्पनां विना दृग्दृश्ययोः सम्बन्धानिरूपणात्। तथा च वक्ष्यति। तथा जीवस्यानात्मत्वमसंसारित्वं च स्यात्। तस्माज्जीवस्य संसारित्वादिकं वदता तस्यावश्यं स्वप्रकाशत्वमेवाङ्गीकर्त्तव्यमिति। परस्माद्वास्तवभेदो वक्तुं न शक्यः। तथा चानुमानं जीवो न परस्माद्भिद्यते अनन्याधीनप्रकाशत्वाद् ब्रह्मवद्व्यतिरेकेण घटवच्चेति। तथा च ब्रह्मण एव संसरित्वाज्ञानित्वादिकमिति भावः॥ १२॥

ननु यस्मिञ्जीवे संसारित्वमज्ञत्वं वानुभूयते न तत्र तत् किन्त्वन्यत्र ब्रह्मणीत्येतदनुभवविरुद्धं ब्रह्मणः संसारित्वाद्यननुभवादिति चेत् किं चैतन्याकारेण ब्रह्मणोऽज्ञानाश्रयत्वं संसारित्वं चानुभवविरुद्धं किंवाद्वितीयत्वाकारेण। नाद्यः। अज्ञानसंसारयोश्चैतन्याश्रयत्वेनैवानुभवात्। न द्वितीयः। तस्यास्माभिरप्यनङ्गीकारादित्याह—

चैतन्यवस्तुविषयाश्रय एव मोहो
नाद्वैतवस्तुविषयाश्रयकोऽप्रतीतेः।
बुध्यादिवेष्टितचितो न तमस्वितीति,
ब्रह्माश्रयत्वमुदितं तमसः पुरस्तात्॥ १३॥

चैतन्येति। अत्र विषयपदमविवक्षितं चैतन्याश्रय एव मोहः न जानामीति तथैवानुभवादित्यर्थः। अथवा—चैतन्यवस्तुन एवाद्वितीयत्वाकारेण मोहविषयत्वात्तथोक्तम् नाद्वैतवस्तुविषयाश्रयक अत्रापि विषयपदमविवक्षितं मोहः अद्वैतवस्त्वाश्रयको न भवतीत्यर्थः। अथवा—विषयपदं दृष्टान्तार्थे यथा मोहो ब्रह्माद्वितीयत्वाकारेण विषयीकरोति न तथा तेनाकारेणाश्रयत इत्यर्थः। तत्र हेतुमाह—अप्रतीतेरिति। अद्वैता-

त्मनोऽज्ञानाश्रयत्वेनानुभवाभावादित्यर्थः । अत्र च मोहग्रहणं संसारस्याप्युपलक्षणं संसारोपि चैतन्याश्रय एव तथैव प्रतीतेर्नाद्वैताश्रयः तथाऽप्रतीतेरित्यर्थः । ननु चैतन्याश्रयत्वमपि मोहस्य न प्रतीयते । अहमज्ञ इति बुद्ध्युपाधिकाश्रयत्वस्यैव प्रतीतेरिति चेन्न । तस्य स्पष्टप्रतीत्युपाधित्वात् । अन्यथा कार्यस्य कारणाश्रयत्वानुपपत्तेरित्युक्तत्वादित्याह—बुद्ध्यादीति । आदिपदेन चक्षुरादिकं गृह्यते । सूक्ष्मशरीरोपाधिकचैतन्यस्येत्यर्थः । तमस्त्वित्यज्ञानाश्रयत्वं न सम्भवतीति तमसो ब्रह्माश्रयत्वं स्वप्रकाशचैतन्याश्रयत्वं पुरस्ताद् द्वितीयाध्याये उदितमित्यर्थः ॥ १३ ॥

ब्रह्मणोऽद्वैतत्वाकारेण नाज्ञानाश्रयत्वमप्रतीतेरित्युक्तमेव प्रपञ्चयति—

ब्रह्माश्रयं न हि तमोऽनुभवेन लभ्यं
नाप्यागमान्न च किमप्यपरं प्रमाणम् ।
ब्रह्माश्रयत्वविषयं तमसस्ततश्च
प्रत्यक्प्रकाशविषयाश्रयमेतदस्तु ॥ १४ ॥

ब्रह्मेति । किं प्रत्यक्षेण ब्रह्मणो ब्रह्मत्वाकारेणाज्ञानाश्रयत्वमुच्यते । किं वा आगमादुत प्रमाणान्तरात् । न सर्वथापि सर्वज्ञत्वादिविरोधादित्यभिप्रेत्याह—ब्रह्माश्रयमिति । ब्रह्मत्वाकारेण ब्रह्माश्रयमित्यर्थः । अनुभवेन प्रत्यक्षेण नाप्यागमादिति । आगमस्याज्ञानाश्रयत्वप्रतिपादकत्वे तस्य शास्त्रप्रमेयत्वान्निवृत्तिरपि न स्यादित्यर्थः । किमप्यपरमनुमानादिकं तमसो ब्रह्माश्रयत्वविषयं प्रमाणं नास्तीति सम्बन्धः । सर्वज्ञत्वाद्यावेदकागमबाधितत्वादित्यर्थः । फलितमाह—ततश्चेति । यतोऽद्वितीयत्वाकारेण ब्रह्मणोऽज्ञानाश्रयत्वे मानं नास्ति यतश्च प्रत्यक्चैतन्याकारेण तदाश्रयत्वेऽनुभवो मानमस्ति तत एतत्तमः ॥ १४ ॥

ननु प्रत्यक्चैतन्याकारो जीवस्याप्यस्तीति जीवोपि किं तदाश्रयो भवत्येव परन्तु जीवत्वाकारेण नाश्रयः किन्तु प्रत्यक्चैतन्याकारेणैव तदाकारश्च ब्रह्मरूपमेवेति न ब्रह्मणोऽज्ञानाश्रयत्वविरोधोपीत्यभिप्रेत्याह—

जीवत्वमेव तु तदाश्रयमध्यपाति
नेच्छन्ति युक्तिकुशला न हि युज्यते तत् ।
अज्ञानमेव खलु तन्न तमस्तमस्वि
चैतन्यवस्तु पुनरस्तु न तद्विरोधः ॥ १५ ॥

जीवत्वमेवेति । तदाश्रयमध्यपात्यज्ञानाश्रयकोटिनिविष्टं जीवस्य जीवत्वमेवाज्ञानाश्रयकोटिनिविष्टं नेच्छन्ति न तु चैतन्याकारमपीत्येवकारार्थः । जीवत्वस्याज्ञानाश्रयकोट्यनिविष्टत्वेऽसंभवमेव हेतुमाह—न हि युज्यते तदिति । तज्जीवत्वस्याज्ञानाश्रयकोटिनिविष्टत्वं हि यतो न युज्यते नोपपद्यते न सम्भाव्यत इत्यर्थः । असम्भवप्रकारमेवाह—अज्ञानमेवेति । तज्जीवत्वमज्ञानमेव खल्वज्ञानप्रयोज्यत्वादज्ञानं भवति खल्वित्यर्थः । ततः किं तत्राह—न तम इति । न हि तमस्तम आश्रयं भवति तत्प्रयोज्यस्य जीवत्वस्य तदनन्तरभावित्वप्रतीतेस्तदाश्रयकोटिनिविष्टत्वं जीवत्वस्य वक्तुमयुक्तमित्यर्थः। चैतन्याश्रयत्वपक्षे एतद्दोषाभावाच्चैतन्यमेव तदाश्रयोस्त्वित्युपसंहरति—चैतन्येति । तत्तत्र चैतन्यवस्तुनोऽज्ञानाश्रयत्वे विरोधः तमसस्तमस्विता न सम्भवतीत्युक्तविरोधो नास्ति यतः अतश्चैतन्यवस्तु तमस्व्यस्त्वित्यर्थः । तस्माद् ब्रह्मणोऽन्यस्य न संसारः किन्तु ब्रह्मण एव स्वाविद्याकल्पितपुर्यष्टकोपाधिद्वारा संसार इति सिद्धम् ॥ १५ ॥

तत्र किं तत्पुर्यष्टकमित्याकाङ्क्षायामाह—

कर्मेन्द्रियाणि खलु पञ्च तथाऽपराणि
बुद्धीन्द्रियाणि मनआदिचतुष्टयं च।
प्राणादिपञ्चकमथो वियदादिकं च
कामश्च कर्म च तमः पुनरष्टमी पूः ॥ १६ ॥

कर्मेन्द्रियाणीति । वाक्पाणिपादपायूपस्थाख्यानि कर्मेन्द्रियाणि । एतानि च वचनादानगमनविसर्गानन्दैः स्वविषयैः सहितानि वह्नीन्द्रोपेन्द्रमृत्युकैरभिमानिदेवताभिरनुगृहीतानि सन्ति एका पूः । पुरत्वञ्चैतेषां चैतन्यात्मनोऽवच्छेदकत्वेनावासस्थानत्वात्तस्य संसारविहारहेतुत्वाच्च पञ्चानामप्येकत्वमेकधर्मावच्छेदेन स चावच्छेदको धर्मः कर्मेन्द्रियत्वादि एवमेवोपरितनपुर्यपि द्रष्टव्यम् । बुद्धीन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि तानि च शब्दस्पर्शरूपरसगन्धैः स्वविषयैः सहितानि दिग्वातार्कप्रचेतोऽश्विभिरभिमानिदेवताभिरनुगृहीतानि सन्ति द्वितीया पूः । मनआदिचतुष्टयं मनोबुद्धिरहंकारश्चित्तं चेत्येतन्मनआदिचतुष्टयमेकमेवान्तःकरणं संकल्पविकल्पाध्यवसायाहमभिमानस्मरणाख्यकार्यभेदात् यथाक्रमं मन आदिशब्दैरभिधीयते । तन्मनआदिचतुष्टयं संकल्पविकल्पादिकार्यैः सहितं चन्द्रविष्णुचतुर्वक्त्रशंभुभिरभिमानिदेवताभिरनुगृहीतं सत्तृतीया पूः। प्राणादिपञ्चकं प्राणापानव्यानोदानसमानाख्याः पञ्च प्राणाः उच्छ्वासादिकार्यैः सहिताश्चतुर्थी पूः । वियदादिकमाकाशवायुतेजोबन्नाख्यं पञ्चकं स्थूलशरीराकारेण परिणतभूतपञ्चकमित्यर्थः तत्पञ्चमी पूः । कामस्तत्तद्विषयरागः सा षष्ठी पूः। कर्म विहितप्रतिषिद्धाविहिताप्रतिषिद्धलक्षणं तत्सप्तमी पूः। तम उक्तसकलानर्थनिदानमज्ञानं तदष्टमी पूः । एतासां च पुरां मध्येऽन्यतमाध्यासं विनाप्यात्मनो न संसार इति पुर्यष्टकोपाधिकस्यैव तस्य संसारः न केवलस्येत्यर्थः ॥ १६ ॥

ननु विद्यापूर्वप्रज्ञयोरपि संसारहेतुत्वं श्रूयते ते किमित्यत्रोपेक्षिते इत्याशङ्क्य नोपेक्षिते किन्तु संगृहीते एव कर्मपदेनेत्याह—

विद्या च विश्वविषयानुभवोत्थपूर्व-
प्रज्ञा च कर्मवचसैव तु संगृहीते।
बन्धप्रयोजकतया सदृशत्वहेतो-
रेकत्र च श्रुतिवचस्युपसंग्रहेण ॥ १७ ॥

विद्येति। विद्या वक्ष्यमाणचतुर्विधा विद्या आत्मविद्यां व्यावर्तयति—विश्वविषयेति। अनुभवोत्थपूर्वप्रज्ञानुभवजन्यसंस्काररूपा अत्रापि विश्वविषयेति सम्बध्यते। सकलानात्मपदार्थविषयानुभवजन्य पूर्वपूर्वसंस्कारश्चेत्यर्थः। ते उभे कर्मवचसा पूर्वश्लोकस्थकर्मपदेनैव बन्धप्रयोजकतया संसारहेतुत्वेन संगृहीते। ननु कथं कर्मग्रहणेन विद्यापूर्वप्रज्ञयोर्ग्रहणं कर्मशब्दस्यातदभिधेयत्वात् लक्षणायां च सम्बन्धाभावादित्याशङ्क्य सम्बन्धाभावाऽसिद्धः अभिधेयसम्बन्धस्य विद्यमानत्वात् ततः कर्मशब्देन ते अपि लक्ष्येते इत्याह—सदृशत्वहेतोरिति। सादृश्यमेवाह—एकत्रेति। उपसंग्रहेणोपादानेन विद्यापूर्वप्रज्ञयाः कर्मणश्चैकवाक्योपात्तत्वेन सदृशत्वात्। कर्मशब्देन तयोरपि लक्षणया ग्रहणं भवतीत्यर्थः ॥ १७ ॥

किं तद्वाक्यमिति तदाह—

तं विद्येति हि वाक्यमेकमिह च स्पष्टं त्रयं कीर्तितं
तस्मात्कर्मवचस्तयोरपि भवेत्संग्राहकं कारणात्।
विद्या चात्र चतुर्विधाऽप्यभिमतैवाऽऽरम्भिका कर्मवत्
संस्कारोपि तथा चतुर्विध इति ज्ञेयस्तथा संभवात् ॥१८॥

तं विद्येति । तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेत्येकं वाक्यमिहास्मिन्वाक्ये च विद्याकर्मपूर्वप्रख्यातं त्रयं स्पष्टं कीर्तितं तस्मादेकवाक्यप्रतिपाद्यत्वलक्षणात् कारणात् कर्मवचः कर्मपदं तयोर्विद्यापूर्वप्रज्ञयोरपि संग्राहकं भवेदित्यर्थः । ननु विद्यादिपदेन कीदृशा विद्यादयो विवक्ष्यन्ते । तत्राह— विद्या चेति । अत्रास्मिन्वाक्ये चतुर्विधा विहितप्रतिषिद्धाऽविहिताऽप्रतिषिद्धलक्षणा तत्र विहिता विद्योपासनादिरूपा प्रतिषिद्धा नग्नस्त्रीनिरीक्षणादिरूपा ऽविहिता-लौकिकेष्टदर्शनादिरूपाऽप्रतिषिद्धाऽनिष्टदर्शनादिरूपा । एवं चतुर्विधापि विद्या आरम्भिका संसारहेतुर्मता । तत्र दृष्टान्तोक्तिव्याजेन कर्मणोपि चतुर्विधस्य संसारहेतुत्वमस्तीत्याह – कर्मवदिति । यथा कर्म विहितप्रतिषिद्धाविहिताप्रतिषिद्धलक्षणं चतुर्विधमपि संसार-कारणं तद्वत् । तत्र विहितं कर्म सन्ध्योपासनादि प्रतिषिद्धं परस्त्री-गमनाद्यविहितं भोजनादि दृष्टसुखसाधनमप्रतिषिद्धं ग्रामान्तरगम-नादि दृष्टदुःखमात्रसाधनमिति विभागः । विद्यायाश्चतुर्विधाया अपि हेतुत्वात् तज्जन्यवासनापि चतुर्विधा संसारकारणमित्याह— संस्कार इति । तथा विद्यादिवत् तथा संभवाच्चातुर्विध्येन संभवादनु-भवचातुर्विध्ये तज्जन्यसंस्कारस्यापि चातुर्विध्यसंभवादित्यर्थः ॥१८॥

ननु लिङ्गशरीरमेव संसारोपाधित्वेन तत्र तत्र वर्ण्यते भव-द्भिस्त्विदानीं पुर्यष्टकस्य संसारोपाधित्वं वर्ण्यते तत्किं तयोरभेद इत्याशङ्क्य नाभेदः किन्तु पुर्यष्टके लिङ्गशरीरस्यान्तर्भूतत्वात् । समुदायलक्षणया लिङ्गशरीरपदेन पुर्यष्टकमुच्यत इत्याह—

पुर्यष्टकं तदिदमप्यभवद्धि लिङ्गं
तेनोच्यते तदपि लिङ्गगिरा क्वचित्तु ।
पुर्यष्टकं न खलु लिङ्गगिरोऽभिधेयं
मुख्यं तु सप्तदशकं प्रथितं हि लिङ्गम् ॥ १९ ॥

पुर्यष्टकमिति । पुर्यष्टके इदं लिङ्गमप्यन्तरभवदन्तर्भूतं हि यतः तेन तस्मात्तदपि पुर्यष्टकमपि क्वचित्स्थले लिङ्गगिरा लिङ्गशब्देनोच्यते लक्ष्यत इत्यर्थः । ननु मुख्यमेवाभिधानं किं न स्यात्तत्राह—पुर्यष्टकमिति । अभिधेयमभिधावृत्त्या प्रतिपाद्यं न भवति लिङ्गशब्दस्यानेकार्थत्वप्रसङ्गादित्यर्थः । किं तर्हि लिङ्गशब्दस्य मुख्यमभिधेयं तत्राह— मुख्यं त्विति । सप्तदशकं सप्तदशकात्मकं प्रथितं प्रसिद्धम् ॥ १९ ॥

ननु के ते सप्तदश यदात्मकं लिङ्गं भवेत्तत्राह—

इह तावदक्षदशकं मनसा
सहबुद्धितत्त्वमथ वायुगणः ।
इति लिङ्गमेतदमुना पुरुषः
खलु सङ्गतो भवति जीव इति ॥ २० ॥

इह तावदिति । इह संसारोपाधिमध्येऽक्षदशकं ज्ञानकर्मेन्द्रियपञ्चकद्वयं मनसा सह बुद्धितत्त्वं मनश्च बुद्धिश्चेत्यर्थः । एकस्यैवान्तःकरणस्य वृत्तिभेदाद् द्वैविध्योक्तिः वायुगणाः प्राणादिपञ्चकमित्येवंरूपेण एतत्सप्तदशात्मकं लिङ्गं लिङ्गपदवाच्यममुना लिङ्गेन संगतः अविच्छिन्नः पुरुषः जीव इति भवति जीवशब्दवाच्यो भवतीत्यर्थः ॥ २० ॥

ननु लिङ्गशरीरोपाधिकस्यैव संसारित्वं न पर्युष्टकोपाधिकस्य तत्र प्रमाणाभावादित्याशङ्क्यान्वयव्यतिरेकयोरन्वयव्यतिरेकश्रुतेः स्मृतेश्च तत्र प्रमाणत्वान्नैवमित्याह—

न पुराष्टकेन रहितस्य तव
क्वचिदस्ति संसरणदुःखयुजा ।

न पुराष्टकेन सहितस्य तथा
क्वचिदस्ति दुःखविगमश्च तव ॥ २१ ॥

न पुराष्टकेनेति । रहितस्य विहीनस्य क्वचित्स्वप्ने संसरणादुःखयुजा संसारदुःखविशेषसम्बन्धो नास्तीति सम्बन्धः । क्वचिज्जाग्रदादौ पुर्यष्टके सत्येव जाग्रति संसारदुःखविशेषदर्शनादसति च तस्मिन्सति च लिङ्गे स्वप्ने तथा संसारदुःखादर्शनात् । "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत" इत्यन्वयव्यतिरेकश्रुत्या सामान्येन शरीरत्रयसम्बन्धतदभावप्रयुक्त-दुःखतदभावयोः प्रतिपादनात् "अधिष्ठानं तथा कर्त्ता करणं च पृथग्विधम् । विविधा च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् । पञ्चैते तस्य हेतव" इति स्मृत्या कर्तृकरणशब्दशब्दितलिङ्गव्यतिरिक्ताधिष्ठानस्थूल-देहादेरपि संसारयात्राकारणत्वेन प्रतिपादनात् पुर्यष्टकस्यैव संसारहेतुत्वं न लिङ्गमात्रस्येत्यर्थः ॥ २१ ॥

नन्वेवमपि तादृशपुरसम्बन्धो यद्यात्मनः स्वाभाविकः स्यात् तदा तत्प्रयुक्तः संसारोपि तथैव भवेत् ततो न कथञ्चित्तदुच्छेद इत्याशङ्क्याह—

तव नित्यमुक्तसुखचिद्वपुषो
न कदाचिदस्ति पुरसङ्गमनम् ।
तव मायया विरचितं सकलं
पुरसङ्गति प्रभृतिकं वितथम् ॥ २२ ॥

तव नित्येति । विमुक्तश्च विमुच्यत इत्यादिश्रुतिसिद्धनित्यमुक्त-सत्यज्ञानानन्दात्मकस्य तव कदाचित्संसारदशायामपि न वस्तुतः पुरसंगमनं देहादिसम्बन्धोऽस्तीत्यर्थः । ननु किमिति वास्तव-

सम्बन्धाभाव इति चेत्तत्र किमात्मनः प्रमातृत्वादिसंसारप्रयोजक-देहादिपुरसम्बन्धः संयोगः उत समवायः किं वा स्वेच्छानुविधेयानुविधातृभावः । अथवा—भोक्तृभोग्यभावः । यद्वा स्वेन्द्रियाधिष्ठात्रधिष्ठेयभावः । आहोस्वित्स्वकर्मारब्धारब्धव्यभावः । नाद्यः । निरवयवस्यात्मनस्तदयोगात् । तद्योगेऽपि विभोरात्मनः सर्वशरीरसंयोगित्वात्सर्वस्मिन्नपि शरीरे प्रमातृत्वादिसंसारप्रसङ्गः । न द्वितीयः । अनवयवावयविद्रव्ययोस्तदयोगात् । न तृतीयः । भृत्यादिदेहेऽपि प्रमातृत्वादिप्रसङ्गात् । ननु नियमेनेच्छानुविधायित्वं देहादिपुरस्य तेन सम्बन्ध इति चेन्न—अत्यातुरदेहे प्रमातृत्वादि-संसाराभावप्रसङ्गात् । तत्रेच्छानुविधायित्वस्याप्यभावात् । न चतुर्थः । भृत्यादिदेहेऽपि तत्प्रसङ्गादेव ननु सर्वदा भोग्यत्वं देहादेस्तेन सम्बन्ध इति चेत् । सुषुप्तौ भोगाभावेन स्वशरीरस्यापि सर्वदा भोग्यत्वाभावात्तस्मिन्नपि संसाराभावप्रसङ्गात् । नापि पञ्चमः । अन्योन्याश्रयात् । स्वदेहसंयोगित्वेनेन्द्रियाणां स्वीयत्वं तेषां च स्वीयत्वे देहस्य स्वीयत्वमिति । नापि षष्ठः । अन्योन्याश्रयादेव स्वकर्मारब्धत्वेन देहस्य स्वीयत्वं स्वदेहारब्धत्वेन कर्मणः स्वीयत्वमिति । ननु कर्मशरीरप्रवाहयोरनादित्वात् वीजाङ्कुरप्रवाह इव नान्योन्याश्रय इति चेन्नात्र प्रमाणाभावेन प्रवाहस्यान्धपरम्परात्वात् । भृत्यादिदेहेऽपि प्रमातृत्वादिसंसारप्रसङ्गाच्च । न च स्वकर्ममात्रारब्ध-देहे स्वस्य प्रमातृत्वमित्यपि शङ्क्यम् । तदसिद्धेः । स्वदेहस्य भृत्याद्यदृष्टेनाप्यारब्धत्वात् । एकेन कर्मणानेकस्वामिभृत्यदेहादेरारम्भोपपत्तेश्च । तस्मात्परिशेषादात्मनो देहादिपुरसम्बन्ध आध्यासिक एव वक्तव्य इत्याह—तव माययेति । पुरसङ्गृतिः पुरसम्बन्धः प्रभृतिरादिर्यस्य संसरणस्य तत्तथा संसारप्रयोजकसम्बन्धस्याविद्यकत्वे तत्प्रयोज्यसंसारोऽपि तथेति पुरसङ्गृतिप्रभृतिकमित्युक्तम् । नचाविद्यकत्वेऽपि देहादिसम्बन्धस्य किमित्यत्रैव तादात्म्याद्यभिमानोऽन्यत्र

नेति वक्तुं शक्यम् । पूर्वपूर्वतादात्म्याद्यभिमानजन्यसंस्कारजन्यस्ये-दानीं तादात्म्याद्यभिमानविषयत्वात् । न चास्माभिरप्यत्र युक्तिर्वक्तव्या अनिर्वचनीयत्वादित्यभिप्रेत्याह—वितथमिति । मिथ्या सदसद्विलक्षणमनिर्वचनीयमित्यर्थः ॥ २२ ॥

नन्वस्तु संसार आविद्यकपुरसम्बन्धनिमित्तः तथाप्यात्मन इदानीं संसारानर्थः विद्यया च संसारानर्थनिवृत्तिर्जायत इति मुक्तेरागन्तुकत्वेनात्मनो नित्यमुक्तत्वक्षतिरित्याशङ्क्य संसारस्तन्निवृत्तिजन्माप्यात्मनि नास्तीत्येतत्सदृष्टान्तमाह—

मलिनं नभो न हि कदाचिदभू-
द्विमलं कदाचिदभवन्न नभः ।
उभयं नभस्यभवदेवमिह
त्वयि नित्यमुक्तचिति संसरणम् ॥ २३ ॥

मलिनमिति । न हि निरवयवाकाशे कदाचित् कार्त्स्न्यादिमलसम्बन्धः सम्भवति । न वा नैर्मल्यं तत्र जायते सर्वदा निर्मलस्वरूपत्वादाकाशस्य तथात्मन्यपि न संसारसम्बन्धः न तावत्तन्निवृत्तिर्जायत इत्यर्थः । कथं तर्ह्यात्मनः संसारसम्बन्धो दृश्यते । किमर्थं वा तस्यौपाधिकत्वं वर्णितमित्याशङ्क्य नित्यमुक्तेऽप्यात्मनि मायया संसरणसम्बन्धो भवतीत्येतत् सदृष्टान्तमाह—उभयमिति । मालिन्यं वैमल्यजन्म चाभवदभवदिव यथा वस्तुतो निर्मलेऽप्याकाशे धूमादिसम्बन्धाद् भ्रान्त्या मालिन्यं तन्निवृत्तौ च नैर्मल्यं जातमिव प्रतीयते न वस्तुतस्तथा नित्यमुक्तात्मन्यपि भ्रान्त्या संसरणसम्बन्धः तन्निवृत्तौ च संसारवमुक्तिर्जातेव प्रतीयते न वस्तुतः । तथा च न मुक्तेरागान्तुकत्वं न वा संसारसम्बन्धस्य नित्यमुक्तत्वविघातकत्वमित्यर्थः ॥ २३ ॥

पारमार्थिकवस्तुनि भ्रान्तिसिद्धस्य वास्तवसम्बन्धाभावमुपपादयति—

न हि कल्पनाविरचितं वितथं
परमार्थवस्त्ववितथं स्पृशति।
परमार्थवस्तु च तथा तमसा
परिकल्पितं न किमपि स्पृशति॥ २४॥

न हि कल्पनाविरचितमिति। भ्रान्तिकल्पितमित्यर्थः। अत एव वितथं बाध्यं परमार्थवस्त्वकल्पितमवितथमबाध्यमिति भेदः। न स्पृशति वस्तुतो न सम्बध्नाति। वस्तुनोर्हि सम्बन्धो वास्तवो भवतीत्यर्थः॥ २४॥

कल्पिताकल्पितयोर्वस्तुतः परस्परासम्बन्धे सकलसम्मतं दृष्टान्तमाह—

न हि भूमिरूषरवती मृगतृड्-
जलवाहिनीं सरितमुद्वहति।
मृगवारिपूरपरिवारवती
न नदी तथोषरभुवं स्पृशति॥ २५॥

न हि भूमिरिति। मृगतृड्जलवाहिनीं मृगतृष्णायां प्रतीयमानं यज्जलं तद्वोढुं शीलमस्या इति तथोक्ता तां सरितं नदीं मृगवारिपूरपरिवारवती-मृगवारिमृगतृष्णायां प्रतीयमानवारि तस्य पूर अतिरेकः प्रवाह इति यावत् स एव परिवारः संपदस्या अस्तीति तथोक्ता ऊषरभुवो मृगतृष्णा जलस्य च वस्तुतः परस्परसम्बन्धे पिपासोपशमनादिकार्योपलब्धिप्रसङ्ग इत्यर्थः। तथा च पुरोपाधिकत्वेन संसारस्य कल्पित-

त्वात् । न तेनात्मनो नित्यमुक्तत्वक्षतिरिति भावः ॥ २५ ॥

इतोऽप्यात्मनो न वास्तवः संसारो निरूपयितुं शक्यः स हि देशान्तरगमनादिप्रयुक्तः गमनादिकं च नात्मनः सम्भवति तस्य विभुत्वात् । नापि संसारप्रयोजकत्वेनाभिमतपुरस्य तस्य जडत्वात् गमनस्य च चेतनकर्तृकत्वान्नाप्युभयात्मकस्यासंभवादित्यभिप्रेत्याह—

न तव क्वचिद्गमनमस्ति विभो-
र्न पुराष्टकस्य जडरूपभृतः ।
न च मध्यवर्त्तिजडचिद्वपुषो-
र्गमनक्षमं किमपि संभवति ॥ २६ ॥

न तवेति । आत्मनो देहादेश्च गमनाभावे हेतुगर्भितं विशेषणं विभोः जडरूपभृत इति च जडचिद्वपुषोर्मध्यवर्त्ति जडाजडात्मकमित्यर्थः । गमनक्षमं स्वर्गनरकादिगमनार्हं जडाजडात्मकं किमपि वस्तु न संभवति विरोधादित्यर्थः ॥ २६ ॥

ननु केवलस्यात्मनो विभुतया गमनाद्यसंभवेऽपि पुरावच्छिन्नस्य तस्य गमनादिकं सम्भवतीत्याशङ्क्य न ह्यवच्छिन्नस्यानवच्छिन्नाद्वास्तवभेदोऽस्ति तथा सत्यात्मनो विभुत्वक्षतेः उपहितस्यानात्मत्वापाताच्च । तथा चावच्छिन्नस्यापि सर्वगतात्मचैतन्याभिन्नत्वात् न वस्तुनो गमनादिकं सम्भवतीत्यभिप्रेत्याह—

पुरवेष्टितं न खलु चिद्वलयं
परलोकमार्गमनुसर्तुमलम् ।
घटवेष्टितं न हि नभोवलयं
व्रजति व्रजत्यपि घटेऽवितते ॥ २७ ॥

पुरवाष्टितामिति । पुरावच्छिन्नमित्यर्थः । चिद्वलयं वलयाकारं चैतन्यमित्यर्थः । अनुसर्त्तुमनुगन्तुमलं समर्थं विभोरन्यावच्छेद-मात्रेण गमनासंभवे दृष्टान्तमाह—घटवेष्टितामिति । एकं व्रजतिपदं तिङन्तमपरं सप्तम्यन्तं व्रजत्यपि पुरुषेण नीयमानेपीत्यर्थः । वितथे स्थूले । ननु गच्छति घटे तदुपाधिकस्याकाशस्यापि गमनं दृश्यते इति चेन्न तस्य भ्रान्तत्वात् । न च बाधकाभावः । गमनस्य मूर्त्त-द्रव्यैकनिष्ठत्वेन सर्वगतस्य गमनानुपपत्तेरेव बाधकत्वात् ॥ २७ ॥

अवच्छिन्नस्यचानवच्छिन्नाद्भेदे आकाशस्य विभुत्वैकत्वादि श्रुतेरित्यभिप्रेत्याह—

घट एव गच्छति नभस्त्वचलं

व्रजता घटेन तु ततश्च ततः ।

परिवेष्टनेन घटखं क्रियते

घटखानि तत्र सुबहूनि ततः ॥ २८ ॥

घट एव गच्छतीति । तथा च श्रुतिः घटसंवृतमाकाशं नीयमाने घटे यथा घटो नीयते नाकाशं तद्वज्जीवो नभ उपम इति । ननु घटाद्य-वच्छिन्नाकाशस्यागमने यस्मिन्प्रदेशे घटो नीयते तत्र केवल एव घटोऽनुभूयेत न तु तदवच्छिन्नाकाशः । तस्यानानीतत्वात् । यतश्च प्रदेशाद्घटो नीयते तत्र तदाकाशोनुभूयेतेत्याशङ्कयाह—ततश्चेति । ततस्ततः तत्र तत्र प्रदेश इत्यर्थः । परिवेष्टनेन सम्बन्धेन घटखं घटाद्यवच्छिन्नाकाशं न हि यत्र प्रदेशे घट आनीयते तत्राकाशं नास्ति येन केवलघटस्य प्रतीतिरापाद्येत । तथाचाकाशस्य सर्व-गतत्वात् तत्र तत्र घटोपाधिसम्बन्धेन तदवच्छिन्नाकाशस्यापि प्रतीतिः सम्भवत्येव । यतश्चानीयते तत्र घटोपाध्यभावादेव घटावच्छिन्नाका-

शप्रत्ययाभाव उपपद्यत इत्यर्थः। न चैकघटसम्बन्धेन तत्र तत्रानेकघटाकाशकल्पनाद्वारमेकस्यैव घटाकाशस्य गमनकल्पनमस्त्विति वाच्यम्। घटस्यैकत्वेपि प्रदेशभेदेन तत्सम्बन्धानामनेकतया तत्र तत्र तथा तथा प्रतीत्युपपत्तेः। अन्यथोक्तदोषानतिवृत्तेरित्यभिप्रेत्याह—घटस्यानीति। तत्र तस्मिन् तस्मिन्प्रदेशे उपाधिसम्बन्धबहुत्वं ततः शब्दार्थः॥ २८॥

नन्वत्रापि पुरस्यैव गमनमस्तु न तु तदवच्छिन्नचैतन्यस्यापि न च पुरस्यापि तदनुपपत्तिः जडत्वादिति वाच्यम्। स्वतस्तदसंभवेपि घटवददृष्टेश्वराद्यन्यप्रेरितस्य तदुपपत्तेः। न च पुरस्य गमनेपि तस्य जडत्वेन भोक्तृत्वासम्भवादात्मनश्चागतत्वात् परलोकादिभोगासंभव इति शङ्क्यम् परलोकगतपुरावच्छिन्नचैतन्यस्यैव भोक्तृत्वसंभवादित्याशङ्कामनुवदति—

पुरमेव गच्छति चितिस्त्वचला
व्रजता पुरेण यदि साऽपि चितिः।
परिवेष्ट्यते तु सुबहूनि तदा
वलयानि पूर्ववदुपाश्रयसे॥ २९॥

पुरमेवेति। सा सर्वगता चितिरपि व्रजता पुरेण परिवेष्ट्यते अवच्छिद्यते। तदा तत्र तत्र वलयानि चिद्वलयानि पुरावच्छिन्नचैतन्यानि सुबहूनि अपरिमितानि पूर्ववत् पूर्वोक्तवियद्वत्। यद्वा—भूप्रदेशे कर्मानुष्ठानकाले यथा पुरावच्छिन्नचैतन्यं तद्वद्भोगकालेपि तत्रानेकचिद्वलयमित्यर्थः। उपाश्रयसे यदीति सम्बन्धः॥ २९॥

पुरमात्रस्य गमनमङ्गीकृत्याकृताभ्यागमनादिदोषप्रसङ्गेन दूषयति—

अकृतागमश्च कृतनिष्फलता
फलतः समापतति कर्तृगतेः ।
अपरस्य भोक्तुरुदयाच्च दिवि
व्यसनस्य सन्ततिरहो विषमा ॥ ३० ॥

अकृतागम इति । अकृतस्य पुण्यादेरागमः प्राप्तिः । ननु कथं पुण्यादेः प्राप्तिः । सुखादेरेव प्राप्तेरित्याशङ्क्योक्तम्—फलत इति । फलतोऽकृतागम इति सम्बन्धः । पुण्याद्यकरणेपि तत्फलस्य परलोके प्राप्तिरित्यर्थः । कृतनिष्फलता भूमौ कृतस्य पुण्यादेः निष्फलता फलराहित्यं च समापतति समापतेदित्यर्थः । कृतनिष्फलतायां हेतुमाह—कर्तृगतेरिति । स्वर्गाद्युद्देशेन भूमौ पुण्यापुण्यकर्त्तुश्चिद्दलयस्य परलोके गमनाद्भूमौ च तत्फलभोगासंभवात् तस्य नैष्फल्यमेव स्यादित्यर्थः । अकृतागमे हेतुमाह—अपरस्येति । पुण्यापुण्यकर्तुरन्यस्यैव चिद्दलयस्य दिवि परलोके भोक्तृत्वेनोदयात् । तस्य च पुण्याद्यकर्तृत्वात् अकृतागमः स्यादित्यर्थः । तथा च पारमार्थिकसंसारपक्षे एकं सन्धित्सोरपरं प्रच्यवत इति सर्वदा दूषणपरम्परैवेत्याह—व्यसनस्येति । दुःखहेतोः दूषणस्येत्यर्थः । विषमा दुष्परिहरा ॥ ३० ॥

ननूपाधिगमने उपहितस्यापि गमनं वक्तव्यमन्यथोपाधौ गतेपि तदवच्छिन्नस्य तत्रोपलम्भप्रसङ्गात् । न चोपाधिगमने तदवच्छिन्नस्य नाशान्न तदुपलभ्यत इति वाच्यम् । अवच्छिन्नस्य चिस्वात्माभिन्नतया गमनानुपपत्तिवत् नाशस्याप्यनुपपत्तेरित्याशङ्क्योपाधिगमने तद्विशिष्टनाशस्यान्यत्र दृष्टत्वात्पुरगमने तद्विशिष्टचैतन्यस्य स्वरूपेणाविनाशित्वेपि तद्विशिष्टत्वाकारेण नाशः सम्भवतीति सदृष्टान्तमाह—

चलने ह्युपाध्यभिमतस्य भवे-
ज्जनितस्य तेन विगमः सुदृढम् ।
ननु कुण्डलापसरणे पुरुषा-
दथ न प्रणश्यति न कुण्डलिता ॥ ३१ ॥

चलन इति । उपाध्यभिमतस्योपाधित्वेनाभिमतस्य चलने गमने तेनोपाधिना जनितस्य प्रयुक्तस्य विशिष्टस्येति शेषः । विगमो नाशः सुदृढं निःसंदिग्धं भवेत् पुरुषात् कुण्डलापसरणे तत्प्रयुक्ता कुण्डलिता न प्रणश्यतीति न किन्तु प्रणश्यत्येव ननु खल्वित्यर्थः ॥ ३१ ॥

ननु कथं पुरसङ्गमनस्य वितथत्वं वर्ण्यते वास्तवत्वमेव किन्न स्यादित्याशङ्क्य युक्त्यसहत्वान्नैवमित्याह—

न पुरान्वयश्च नव चिद्वपुषः
परमार्थतो भवति तर्कसहः ।
नभसो यथा घटसमागमनं
न ततोऽपि लिङ्गघटितो व्रजति ॥ ३२ ॥

न पुरान्वय इति । पुरान्वयः पुरसम्बन्धश्च चिद्वपुषः नव परमार्थतो न भवति । तत्र हेतुः तर्कसह इति । नेत्यनुषज्यते । यतोऽयं तर्कसहो युक्तिसहो न भवत्यतः परमार्थतो न भवतीत्यर्थः । तर्कश्च पूर्वोक्तसंयोगाद्यन्यतमानुपपत्तिरेव निरवयवस्य वस्तुत उपाधिसम्बन्धाभावे दृष्टान्तमाह—नभस इति । घटसमागमनं घटसम्बन्धः नेति सम्बध्यते । संयोगाद्यनुपपत्तेस्तत्रापि समत्वादित्यर्थः । फलितमाह—न ततोऽपीति । वस्तुतः पुरसम्बन्धानुपपत्तिस्तच्छब्दार्थः । अपिशब्देन पूर्वोक्तानुपपत्तिः समुच्चीयते । लिङ्गघटितः पुरविशिष्ट इत्यर्थः ॥ ३२ ॥

ननु नभसः किमिति घटादिसंयोगाद्यनुपपत्तिः येनैतद्दृष्टान्तेनात्मनः पुरसम्बन्धानुपपत्तिर्वर्ण्येतेति चेत्तत्र किं घटो नभोमात्रेण संयुनक्ति उत नभःप्रदेशेन। नाद्यः। घटानवच्छिन्नाकाशाभावप्रसङ्गात् घटसम्बन्धस्यैव घटावच्छेदपदार्थत्वात् सर्वत्र तत्कार्यशब्दाद्युपलम्भप्रसङ्गाच्च। ननु तस्य प्रदेशवृत्तित्वान्न सर्वत्रोपलम्भ इति चेन्न निरवयवस्याकाशस्य प्रदेशाभावात्। न द्वितीयः। निरवयवस्य नभसः घटसम्बन्धात्पूर्वं प्रदेशाभावादित्याह—

नभसः प्रदेशविरहान्नभसो

न घटः प्रदेशपरिवेष्टनकृत्।

न नभः समस्तमपि वेष्टयते

नभसोऽविशेषविरहापतनात्॥ ३३॥

नभस इति। परिवेष्टनमवच्छेदः अवशेषविरहापतनात् घटानवच्छिन्नाकाशाभावापातादित्यर्थः॥ ३३॥

दृष्टान्तोक्तिविकल्पमुखेनाप्यात्मनि पुरसम्बन्धाभावमुपपादयति-

परमात्मभागपरिवेष्टनकृ-

न्न पुरं तथानवयवो हि परः।

न च कृत्स्नमेव परमं पुरुषं

पुरवस्तु वेष्टयितुमुत्सहते॥ ३४॥

परमात्मेति। तथेत्यादौ योजनीयं यथा घटः आकाशमेकदेशेन कार्त्स्न्येनेन वा परिवेष्टयितुमनलं तथा पुरमपि परमात्मभागपरिवेष्टनकृन्न भवति। भागः एकदेशः तत्र हेतुः—अनवयव इति। हि यतः परः परमात्मा अनवयवः निरवयवः अत उपाधिस्तस्यैकदेशाभावादेव न

तत्परिवेष्टनकृत्स्वं पुरस्येत्यर्थः । नापि कात्स्न्र्येन परमात्मवेष्टकत्वं पुरस्येत्याह—नचेति ॥ ३४ ॥

विपक्षे बाधकमाह—

यदि कृत्स्न एव परमः पुरुषः

पुरवेष्टितो भवति जीवतया ।

न तदीश्वरो भवितुमुत्सहते

न च जीवजातमपरं सकलम् ॥ ३५ ॥

यदि कृत्स्न एवेति । जीवतयेति जीवभावेन पुरवेष्टित इति सम्बन्धः । यदि पुरं परात्मानं कात्स्न्र्येनावच्छिन्द्यात्तदा तदनवच्छिन्नस्यावशिष्टांशस्याभावात् । अवच्छिन्नस्य च जीवत्वान्नेश्वरः सिद्ध्येदित्यर्थः । पुरस्य कात्स्न्र्येन चैतन्यावच्छेदकत्वे दूषणान्तरमाह—न चेति । अपरं त्वत्तोऽन्यत् पुरस्य सर्वात्मना चैतन्यावच्छेदकत्वे पुरान्तरावच्छेद्यांशाभावात् । प्रतीयमानं जीवनानात्वमपि न स्यादित्यर्थः ॥ ३५ ॥

प्रतीयमानजीवनानात्वाङ्गीकारे प्रतीयमानगुरुशिष्यादिभावो न स्यादित्याह—

गुरुशिष्यसंगतिरतो न भवे-

न्न च बन्धमोक्षनियमो घटते ।

विषयं विना सकलमापतति

स्फुटमत्र वेदवचनं च वृथा ॥ ३६ ॥

गुरुशिष्येति । अतः जीवनानात्वप्रतीतिमात्रस्यासंभवादित्यर्थः । बन्धमोक्षनियमः प्रतीयमानबन्धमोक्षव्यवस्था न केवलं गुरुशिष्यादिभावाद्यनुपपत्तिः पुरस्य कात्स्न्र्ये न चैतन्यावच्छेदकत्वे किन्तु ब्राह्म-

णक्षत्रियादिभेदाभावात् तत्तदधिकारितत्तत्कर्माभावेन कर्मकाण्डा-प्रामाण्यं कर्माभावे च तदधीनशुद्ध्याद्यभावेनाधिकार्यभावात् ज्ञान-काण्डस्याप्यप्रामाण्यमित्यपि दुष्परिहरानुपपत्तिः स्यादित्याह--

विषयं विनेति। विषयं प्रतिपाद्यम् अधिकारिणोऽप्युपलक्षणम्। अत्र कार्त्स्न्येनावच्छेदपक्षे वृथा पतति वृथा स्यादित्यर्थः॥ ३६॥

अत्र केचित्—जीवनानात्वाभावे गुरुशिष्यभावादिव्यवस्था न स्यादिति वदतां मूलकाराणां व्यावहारिकजीवनानात्वमेवाभिमतम्। अन्यथा कृत्स्नचैतन्यस्य पुरवेष्टनेनैकजीवभावेपि स्वप्न इव भ्रान्त्या जीवनानात्वप्रतीत्युपपत्तेः। क्वचित्त्वेकजीववादवचनं गुर्वादेरपि स्वाप्नपदार्थवत्कल्पितत्वाभिधानं च जाग्रद्बोधेनेव स्वाप्नपदार्थस्य तत्त्वज्ञानेन स्वव्यतिरिक्तसकलस्यापि द्वैतस्य निवृत्तिप्रदर्शनपरं न व्यावहारिकजीवनानात्वनिराकरणपरं तथा च तद्वचनं तत्तद्विद्वद्दृष्ट्य-भिप्रायमिति वर्णयन्ति तदपि सम्प्रदायसिद्धत्वादङ्गीकार्यमेव। तस्मा-दात्मनः पुरसम्बन्धस्य दुर्निरूपत्वात् न स वास्तवः किन्तु कल्पित एवेत्युपसंहरति—

> **न पुरान्वयोऽत उपपत्तिसहः**
> **परमार्थतोऽस्ति परमात्मदृशः।**
> **वियतो घटान्वयवदेव ततः**
> **परिकल्पितं पुरसमागमनम्॥ ३७॥**

न पुरान्वय इति। अतः यतः उपपत्तिसहः युक्तिसहो न भवति पुरान्वयः अतः सः अस्य परमात्मदृशेः परमार्थतो न भवति आकाशस्येव घटादिसम्बन्धः। ततः यतः परमार्थतो न सम्भवति ततः समागमनं सम्बन्धः॥ ३७॥

पुरसम्बन्धस्य कल्पितत्वप्रदर्शनफलमात्मनो वस्तुतो गमनाद्य-

भावमुपसंहरति—

यत एवमेतदुपपत्तिपथं
न तव प्रयाति विरहय्य तमः ।
परलोकमार्गगमनं स्वतमः
परिकल्पितं चलनवन्नभमः ॥ ३८ ॥

यत एवमिति । एवमुक्तप्रकारेण तव चिद्वपुषः एतत्पुरसंगमनं तमो विरहय्य उपपत्तिपथं युक्तपदवीं न प्रयाति नोपारोहति यतः अत इति सम्बन्धः । चलनवत्—घटाद्यौपाधिकचलनवत् ॥ ३८ ॥

ननु कथमन्यलिङ्गगमनस्यान्यत्रात्मनि प्रतीतिरित्याशङ्क्य धर्मिणोः परस्परतादात्म्याध्यासात् परस्परधर्माध्यासाच्चेत्याह—

पुरधर्ममात्मनि विकल्प्य तथा
स्वचिदात्मतां च पुरधर्मतया ।
स्वपुरं स्वयं च दृढमेकतया
परिकल्पयन् व्रजसि मूढमतिः ॥ ३९ ॥

पुरधर्ममिति । लिङ्गस्य मूर्त्ततया गमनादिकं तद्धर्मः तमात्मन्यविचलकूटस्थस्वरूपे स्वस्मिन् विकल्प्याध्यस्य तथा स्वचिदात्मतां स्वस्यात्मनश्चिदात्मतां चैतन्यं पुरधर्मतया लिङ्गधर्मत्वेन विकल्प्येत्यनुषज्यते तदेवं धर्माध्यासो दर्शितः धर्माध्यासमाह—स्वपुरमिति । स्वस्योपाधिभूतं लिङ्गं स्वयं स्वात्मानं चैकतयैक्येन परिकल्पयन् त्वं व्रजसीत्यर्थः । उभयविधाध्यासे हेतुमाह—मूढमतिरिति । सपर्यगाच्छुक्रमकायमव्रणम्, कूटस्थमचलं ध्रुवम्, घटोनीयतेनाकाशं तद्वज्जीवोनभोपम इति श्रुतिप्रतिपन्नं स्वस्य शरीरराहित्यं गमनादिराहित्यं चाजानन्निः-

त्यर्थः । स्वस्वरूपाज्ञानादेव गमनादिसंसार इत्यर्थः ॥ ३९ ॥

तस्मात्संसारस्याविद्याकल्पितत्वात्त्वं सर्वदा नित्यमुक्त एवेत्युपसंहरति—

परिपूर्णचिद्रसघनः सततं
स्वमहिम्नि तिष्ठसि निरस्तमले ।
न तथाऽपि तत्त्वमितिवाक्यकृतां
मतिमन्तरेण तव केवलता ॥ ४० ॥

परिपूर्णेति । रसस्वरूपं पूर्णचैतन्यैकस्वरूप इत्यर्थः । सततं संसारदशायामपि स्वमहिम्न्यसङ्गोदासीनसच्चिदानन्दस्वरूपे निरस्तमले वस्तुतो निरस्तकर्तृत्वभोक्तृत्वादिमले । ननु यदि नित्यनिर्मुक्तस्वरूप एवाहं वर्ते तर्हि श्रवणादिवैयर्थ्यं तत्राह—न तथापीति । नञः केवलतेत्यत्र सम्बन्धः । तथापि नित्यमुक्तत्वेपीत्यर्थः । तत्त्वमिति वाक्यकृतां तत्त्वमादिवाक्यजन्यां मतिं ब्रह्मात्मसाक्षात्काररूपान्तःकरणवृत्तिमन्तरेण केवलता प्रतीयमानाविद्यातत्कार्यरहितता न भवति । सर्वदा नित्यमुक्तत्वेपि ब्रह्मात्माकारसाक्षात्कारं विना अनाद्यविद्या तत्कार्यानर्थप्रतिभासस्यानिवृत्तेस्तदर्थं श्रवणादिकमावश्यकमित्यर्थः ॥ ४० ॥

ननु नित्यमुक्तस्वरूपश्चेदहं तर्हि श्रवणादिकं विनापि किमिति तथा स्पष्टं न प्रतिपद्यत इतिचेत् किं चक्षुरादिना किमिति न प्रतिपद्यते इत्युच्यते किं वा स्वरूपचैतन्येन । नाद्यः । करणानां बहिर्विषयत्वेन प्रत्यगात्माविषयत्वात् । न द्वितीयः । तमसावृतत्वात् । तथा च यावच्छ्रौतात्मसाक्षात्कारं तवाविद्यकपुरोपाधिकप्रयुक्तसंसारप्रतीतिर्भवत्येवेत्याह—

न तव प्रतीचि करणानि बहि-
र्विषयाणि येन करणानि सदा ।
सहजं च गाढमतिमूढतमं
तम इत्यतः पुरमनुव्रजसि ॥ ४१ ॥

न तवेति । प्रतीचि सर्वप्रत्यक्तमस्वरूपे करणानीन्द्रियाणि न प्रवर्त्तन्त इति शेषः । तत्र हेतुः—बहिर्विषयाणीति । येन हेतुना करणानि बाह्यविषयाणि तेनेत्यर्थः । सहजमनादिसिद्धं गाढं दृढमतिमूढतममतिशयेन स्वस्वरूपावारकमित्यर्थः । इतिशब्दो हेतौ । यस्मादनादिसिद्धमज्ञानं तत्स्वरूपावारकमतः तत्कल्पितपुरमनुव्रजसि पुरोपाधिकगमनादिसंसारं प्राप्नोषीत्यर्थः ॥ ४१ ॥

एवं नित्यमुक्तस्यात्मन आविद्यकपुरोपाधिक एव संसार इत्युक्तं तत्र श्रुतिमपि प्रमाणयति—

स समान इत्युपनिषद्वचनं
प्रतिपादयत्युदितमर्थमतः ।
स्वमतीषिकेति न कदाचिदपि
प्रतिपत्तिरत्र भवतो भवतु ॥ ४२ ॥

स समान इति । स समानः सन्नुभौ लोकावनुसंचरतीत्याद्युपनिषद्वाक्यं सः असङ्ग आत्मासमानः बुद्ध्याद्युपाधिना समानः बुद्ध्यादितादात्म्यापन्नः सन्नित्यर्थः । उभाविहलोकपरलोकौ जाग्रत्स्वप्नौ वा अनुसंचरति बुद्ध्यादौ गच्छति स्वमपि गच्छतीत्यर्थः । उदितमसङ्गस्यात्मनः बुद्ध्याद्युपाधिकमेव कर्तृत्वादिकं न वास्तवमिति मयोक्तमर्थं प्रतिपादयति तथा चास्मदुक्तेऽर्थे स्वबुद्धिपरिकल्पितत्व-

भ्रान्तिर्न कर्त्तव्येत्याह—अत इति । यतः श्रुतिरप्येवमाहातः अत्रास्मदुक्तेऽर्थे स्वमनीषिकेति प्रतिपत्तिः स्वबुद्धिविरचितेति प्रतीतिरित्यर्थः ॥ ४२ ॥

ननूपाधिद्वारापि कथं सर्वगतस्यात्मनो गमनादिकं संभवति तत्र तत्प्रतीतेरप्यभावादिति चेन्न हि सर्वगतस्य परस्य गमनं ब्रूमः किन्तु पुरोपाधिद्वारा तद्गतचिदाभासाविविक्तस्यैवेत्याह—

पुरहेतुकं यदभवच्च विभोः
परिकल्पितं किमपि चित्सदृशम् ।
जलपात्रहेतुकमिव द्युमणे-
स्तदसंततं भवति तद्व्रजति ॥ ४३ ॥

पुरहेतुकमिति । विभोः सर्वगतस्यात्मनः पुरहेतुकं पुरोपाधिकमत एव परिकल्पितं किमप्यनिर्वचनीयं यत्सदृशं चिदाभासो ऽभवत्तत् चित्सदृशं चिदाभासाविविक्तचैतन्यमित्यर्थः । असंततमव्याप्तं परिच्छिन्नं भवति । तथा च तत्परिच्छिन्नचिदाभासाविविक्तचैतन्यमेव व्रजति न सर्वगतचैतन्यमित्यर्थः । कूटस्थवस्तुरूपस्योपाधिद्वारानिर्वचनीयरूपापत्तौ तद्द्वारागमने च दृष्टान्तमाह—जलपात्रहेतुकमिव द्युमणेरिति । यथा द्युमणेः सूर्यस्य जलपात्रोपाधिकं सूर्याभासाख्यमनिर्वचनीयरूपान्तरं भवति । जलपात्रे च पूर्वस्मिन्देशे नीयमाने तन्निष्ठसूर्याभासाविविक्तपश्चिमदेशगामि सूर्यप्रतिबिम्बमपि गच्छतीव तद्वदित्यर्थः ॥ ४३ ॥

नन्वेवमपि परलोकगमनादिकं न सम्भवति पुरस्य जडत्वेनास्वतन्त्रत्वादत एव न तदुपाधिकचैतन्याभासस्यापि । न चेश्वराधिष्ठितस्य तस्य गमनं सम्भवतीति वाच्यम् । असङ्गोदासीनस्वभावस्य

तस्याधिष्ठातृत्वायोगादित्याशङ्क्य यथाऽसङ्गस्वभावस्यापि तव पुरोपाधिकः संसारः तथा असङ्गोदासीनस्वभावस्यापि परमात्मनो मायोपाधिकमधिष्ठातृत्वादिकमुपपद्यत इति दर्शयितुं परमात्मनि मायासद्भावं साधितं दर्शयति--

जडशक्तिरस्ति च परस्य विभोः
परमात्मनस्तम इति प्रथिता ।
पुरमष्टकं तव यथा भवति
श्रुतितः प्रसिद्धमिदमप्यखिलम् ॥ ४४ ॥

जडशक्तिरिति । साधारणविक्षेपशक्तिमती परतन्त्रा माया न च तत्सद्भावे मानाभावः तस्या अविद्याऽभिन्नत्वात् । अविद्यायाश्चानुभव सिद्धत्वादित्याह -- तम इति । प्रथितेति । तथासङ्गचैतन्यस्वभावस्य न केवलमनुभवतस्तत्सिद्धिः किन्तु श्रुतितोपीत्याह--श्रुतित इति इदं परमात्मनो मायावत्त्वं तव पुरवत्त्वं च श्रुतितः अस्मान्मायी सृजते स समानः सन्नित्यादिश्रुतितोपि प्रसिद्धमित्यर्थः ॥ ४४ ॥

ततः किमत्राह --

पुरहेतुकं तव यथा च वपु-
र्भवतीह जीववचसो विषयः ।
जडशक्त्युपाधिकममुष्य तथा
परमेश्वरत्ववपुरुद्भवति ॥ ४५ ॥

पुरहेतुकमिति । यथा असङ्गस्वभावस्य तव पुरोपाधिकं जीववचसो विषयः जीवपदवाच्यमित्यर्थः वपुः स्वरूपं भवति । तथा अमुष्यासङ्गोदासीनस्वभावस्य परमात्मनः जडशक्त्युपाधिकं सत्त्व-

प्रधानया विक्षेपशक्तिमत्या वा माययोपाधिना प्रयुक्तं परमेश्वरस्य वपुर्नियन्तृत्वादिस्वरूपमुद्भवति भवतीत्यर्थः ॥ ४५ ॥

तस्मात्परमेश्वरपरतन्त्र एव पुरोपाधिके जीवः परलोकादिकं गच्छतीति फलितं दर्शयितुं परमेश्वराधीन एवास्य सर्वोऽपि संसार इत्यत्र श्रुतिसम्वादमाह—

पुरहेतुरूपघटितस्य दृशे-
र्जडशक्त्युपाधिपरमेश्वरतः ।
भयमुद्भवत्यनवबोधवशा-
दिति च त्रयीशिरसि राजपथः ॥ ४६ ॥

पुरेति । पुरहेतुकं यद्रूपं तद्घटितस्य तद्विशिष्टस्य दृशेः चैतन्यस्य पुरोपाधिकचिदाभासाविविक्तस्येत्यर्थः । जडशक्त्युपाधिपरमेश्वरतः मायोपाधिकपरमेश्वरात् । भयं-संसारः । ननु जीवेश्वरयोरुभयोरपि चैतन्यस्वरूपत्वाविशेषात्कथमीश्वरप्रयुक्तः संसारो जीवे भवेदित्या शङ्क्य वस्तुतश्चैतन्यस्वरूपत्वाविशेषेपि स्वाश्रयव्यामोहकावरण शक्तिमदविद्योपाधिकत्वेन जीवस्य स्वस्वरूपानभिज्ञत्वादीश्वरस्य स्वाश्रयाव्यामोहकसत्त्वप्रधानविक्षेपशक्तिमदविद्योपाधिकत्वेन स्वाभाविकस्वरूपाभिज्ञत्वात् तत्प्रयुक्तः संसारस्तस्मिन्भवतीत्याह— अनवबोधेति । स्वाभाविकस्वरूपाज्ञानवशादित्यर्थः । इत्येवंरूपेण त्रयीशिरसि एष ह्येव साधु कर्म कारयतीत्यादिवेदान्तेषु राजपथः प्रसिद्ध इत्यर्थः ॥ ४६ ॥

अतः परमेश्वराधीनमेवास्य मरणकाले परलोकादिगमनमिति फलितं दर्शयति—

परमेश्वरेण विभुना रणयन्
परिबृंहितः शकटवद्व्रजसि ।
शकटं हि शाकटिकयोगवशा-
द्व्रजति स्वयं न परतन्त्रतया ॥ ४७ ॥

परमेश्वरेणेति । नियमित इति शेषः । रणयन् हिक्किकोर्ध्वश्वासादिशब्दं कुर्वन् परिबृंहितः कर्मादिसंसारसंभृतः व्रजति परलोकं गच्छति । स्वतन्त्रेश्वराधिष्ठितस्यैव जीवस्य गमनमित्यत्र दृष्टान्तमाह- शकटवदिति । दृष्टान्तं विवृणोति—शकटं हीति । शाकटिकः शकटाधिष्ठाता तद्योगस्तत्सम्बन्धस्तद्वशादेव व्रजति न स्वयमेव तत्र हेतुः—परतन्त्रतयेति । जडत्वेनास्वतन्त्रत्वादित्यर्थः । यथा लोके दध्यादिभाण्डसंभारसंभृतं शकटं केनचित्पुरुषेणाधिष्ठितमेव सदतिभारेण शब्दं कुर्वद् गच्छति न स्वयमेव । एव जीवोऽपि कर्मसंभारसंभृतः मरणवेदनासमुपजात हिक्किकादि शब्दं कुर्वन् प्राज्ञो परमेश्वरेणाधिष्ठित एव गच्छति न स्वयमेवेत्यर्थः ॥ ४७ ॥

ननु शकटस्याचेतनत्वाद्युक्तं चेतनाधिष्ठानेन गमनं जीवस्तु स्वयं चेतनस्वभावतया स्वतन्त्रः कथं चेतनान्तराधिष्ठितो गच्छेत् तत्राह—

पुरवेष्टितः पुरवशानुगतः
पुरतन्त्रचिन्निभविभिन्नवपुः ।
दिवि यातनाभुवि च कर्मफला-
न्यनुभूय भूय इह संभवति ॥ ४८ ॥

पुरवेष्टित इति । पुरावच्छिन्नः अत एव पुरवशानुगतः पुरपरतन्त्रः यद्यपि जीवः स्वयं चेतनस्वभावतया स्वतन्त्रस्तथापि परतन्त्रपुरता-

दात्म्याध्यासादात्मानमपि परतन्त्रं मन्यते । अतोऽस्य पराधीनत्वे भ्रान्त्या ऽन्यप्रेरणेनैव गमनं युक्तमित्यर्थः । अत एव जीवपरयोरेकत्वान्नाधिष्ठानाधिष्ठेयभाव इत्यपि शङ्का न कर्त्तव्येत्याह—पुरतन्त्रेति । पुरोपाधिकं यच्चिन्निभ चित्सदृशं चिदाभासः तेन विभिन्नवद्विभिन्नं वपुः स्वरूपं यस्य जीवस्य स तथोक्तः । ननु कर्मफलभोगार्थं परलोकं गतस्य भोगेन कर्मक्षयात् देहान्तरापादकाभावात्तत्त्वज्ञानं विनापि तत एव मुक्तिः स्यात । अतः किमिति तस्माद्वैराग्यमपेक्ष्यत इत्याशङ्क्याह—दिवीति । दिवि स्वर्गे यातनाभुवि-नरकभूमौ कर्मफलानि सुखदुःखात्मकान्यनुभूय भूयः भोगेन तत्कर्मक्षयानन्तरमिह लोकेसम्भवति नानायोनौ जायत इत्यर्थः । यद्यपि स्वर्गाद्यारम्भकपुण्यादीनि क्षीणानि तथाप्यनारब्धानामपि कर्मणां बहूनां सत्त्वात्तेभ्यः पुनर्जन्म भवत्येव । इममर्थं श्रुतिरपि दर्शयति "यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्त्तन्ते रमणीयचरणा रमणीयां योनिमापद्येरन् कपूयचरणाः कपूयां योनिमापद्येरन्" इत्यादिना तत्र च यावच्छब्देन स्वर्गादिभोगार्थं प्रारब्धकर्माण्येवोच्यन्ते न तु सकलं कर्म रमणीयचरणाः कपूयचरणाः इत्यादिश्रुतिविरोधात् । चरणशब्दस्य कर्मवाचित्वात्सूत्रकारोपि "कृतात्ययेनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" इति स्वर्गादिभोगक्षयानन्तरमपि कर्मान्तरसद्भावं दर्शयति । अनुशयशब्दस्य कर्मान्तरवाचित्वेन भाष्यकारैर्व्याख्यातत्वात् । तस्मात्स्वर्गादिभोगार्थं प्रारब्धेतरकर्मणस्तत्त्वज्ञानं विना नाशायोगात् । तस्माच्च नानाविधयोनिसम्बन्धसम्भवान्न मुक्तिरिति क्षुद्रफलात्तस्माद्वैराग्यमावश्यकमित्यर्थः ॥ ४८ ॥

नन्वेवमपीश्वरस्य जीवसंसारहेतुत्वमनुपपन्नम् तथात्वे तस्य वैषम्यनैर्घृण्यप्रसङ्गादिति चेन्न । तत्तत्प्राणिसमुपार्जितपुण्यापुण्यानुरोधेन फलदातृत्वात् न चैतावता तस्य स्वातन्त्र्यभङ्गः कर्मणोऽप्यधि-

ष्ठातृत्वेन स्वातन्त्र्याप्रच्यवात्तथाचेश्वराधिष्ठितकर्मवशाज्जीवस्य याव-त्तत्त्वज्ञानोदयं घटीयन्त्रवत् गतागती भवन एवेत्यभिप्रेत्याह—

सुकृतदुष्कृतकर्मवशादयं
दिवमथो यमसादनमेव वा ।
अनुभवेन समाप्य पुनर्मही-
तलमबोधवशादवरोहति ॥ ४९ ॥

सुकृतेति । अयं पुरोपाधिको जीवः यमसादनं नरकमनुभवेन भोगेनाबोधवशात् स्वस्वरूपाज्ञानात् ॥ ४९ ॥

ननु केवलकर्मफलात्स्वर्गादेः पुनरावृत्तिश्रवणात् ततो वैराग्यं भवतु उपासनासमुच्चितस्य तस्य केवलस्य वोपासनस्य यत्फलं हिरण्यगर्भादिप्राप्तिः सा तु नित्यैव न स पुनरावर्त्तत इति श्रुते-स्ततस्तत्त्वज्ञानं विनापि पुरुषार्थसिद्धेः कथं ततो वैराग्यमित्या-शङ्क्याह—

यदि वा समुच्चयवशात्पुरुषः
कमलासनं व्रजति कामुकधीः ।
पुनरेव मानवमिमं तु विना
परिवर्तमाव्रजति मूढमतिः ॥ ५० ॥

यदि वेति । समुच्चयवशात्कर्मोपासनासमुच्चयवशात्केवलाद्वा उपास-नादित्यभिप्रेत्योक्तं यदि वेति । कमलासनं कार्यब्रह्म कामुकधीः रागी पुनः भोगावसाने मानवं मनुसम्बन्धिनमिमं वर्त्तमानं परिवर्त्तं कल्पं विना आव्रजत्यायाति कल्पान्तरेऽवरोहतीत्यर्थः । कर्मसमुच्चितकेवलोपास-

नस्य यत्फलं हिरण्यगर्भावाप्तिः न सा नित्या कर्मफलत्वेनानित्यत्वानुमानात् । न च "न स पुनरावर्त्तत" इति श्रुतिविरोधः यस्मिन् कल्पे ब्रह्मलोकप्राप्तिः तत्कल्पावृत्तिनिषेधपरत्वात्तस्याः अन्यथेमं मानवमावर्त्तं नावर्तन्त इति श्रुताविममिति विशेषणवैयर्थ्यप्रसङ्गात्तस्मात्तस्या-पुरुषार्थत्वात् पुरुषार्थस्य च तत्त्वज्ञानं विनाऽसम्भवात् ततोपि नरकादिव वैराग्यमावश्यकमेवेत्यर्थः ॥ ५० ॥

ननु ब्रह्मलोकं गतानां पुनरावृत्तिरिति वक्तुं न शक्यम् ब्रह्मणा सह ते सर्व इति स्मृतिविरोधात् अभिमतक्रममुक्त्यभावप्रसङ्गाच्च । ततस्तस्य पुरुषार्थत्वान्न ततो विरक्तिरित्याशङ्क्य कामुकधीपदसूचितं विशेषमाह—

अथ वा स तत्र परमात्ममतिः
परिमुच्यते सकलबन्धनतः ।
क्रमयोगमुक्तिरुदिता श्रुतिषु
प्रतिशाखमेवमुपपन्नतरा ॥ ५१ ॥

अथ वेति । स ब्रह्मलोकं गतः तत्र ब्रह्मलोके परमात्ममतेः परमात्मसाक्षात्कारात्सकलबन्धनतः सकलसंसारात् क्रमयोगमुक्तिः क्रममुक्तिरित्यर्थः । श्रुतिषु न स पुरावर्तत इत्यादिषूदिता प्रतिपादिता यत्र ब्रह्मलोकं गतानां तत एव मुक्तिः श्रूयते तत्रापि विरक्तानां ब्रह्मसाक्षात्काराद्देव मुक्तिरभिमता न ब्रह्मलोकगमनमात्रेण कामिनस्तदनुपपत्तेः । स कामभिर्जायते तत्र तत्रेति श्रुतेः । अत एव परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति साक्षात्कृतात्मनामेव मुक्तिं श्रावयति । एवं सति क्रममुक्तेरपि नानुपपत्तिः तथा चोपासनाफलस्याप्यपुरुषार्थत्वात्ततो वैराग्यमावश्यकमित्यर्थः ॥ ५१ ॥

एवमिष्टादिकारिणां केवलकर्मिणां धूमादिमार्गेण पितृलोकं गच्छतामुपासनसमुच्चितकर्मिणां केवलोपासकानां वा अर्चिरादिमार्गेणाब्रह्मलोकं गच्छतामविवेकिनां जुगुप्सितां गतिं ततो वैराग्यार्थमुपवर्ण्येदानीं पापिनामतिजुगुप्सितां तिर्यग्भवादिलक्षणां गतिं ततो वैराग्यार्थमाह —

देवयानपितृयानयोः पथो-
र्ज्ञानकर्मरहितत्वकारणात् ।
नैकमप्यनुसरन्ति ये पुनः
क्षुद्रजन्तव इहोद्भवन्ति ते ॥ ५२ ॥

देवयानेति । देवयानपथः अर्चिरादिमार्गः पितृयानपथः धूमादिमार्गस्तयोर्मध्येऽन्यतरमार्गमपि ये पापिनो नानुसरन्ति । तत्र हेतुः ज्ञानेति । ज्ञानमुपास्तिः । ते पापिनः इह भूलोके क्षुद्रजन्तवः श्वविड्वराहादयः सन्त उद्भवन्ति जायन्त इत्यर्थः । न च तृतीया गतिरप्रमाणिकेति वाच्यम् । अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्त्तीनी भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति श्रुतेरेव तत्र प्रमाणत्वादित्यर्थः ॥ ५२ ॥

एवं पुरोपाधिकचैतन्यस्य स्वरूपाज्ञानवशात् तत्तत्कामनानुष्ठितपुण्यापुण्योपासनालक्षणकर्मभिर्ब्रह्मादिपिपीलिकान्तामतिजुगुप्सितातिदुःखोपेतनानाविधयोनिगमनागमनलक्षणसंसारगतिमुपवर्णितामुपसंहरति —

इति कामुकस्य तव संसरणं
शतशो बभूव बत मूढमतेः ।

इह विप्रजन्मनि विरक्तमतिः
कुरु साधनं यदपवर्गकरम् ॥ ५३ ॥

इतीति । इत्युक्तप्रकारेण मूढमतेः मोहावृतस्वरूपस्य अत एव कामुकस्य क्षुद्रफलाभिलाषिणः तव पुरोपाधिकस्य शतशः अपरिमितं संसरणं बभूव । यदर्थं संसारगतिः प्रदर्शिता तद्दर्शयति । इहेति । इह मनुष्यजन्मनि तत्रापि विप्रजन्मनि यस्मादितः पूर्वमविवेकिनस्तव कर्मफलरागात् ब्रह्मादिपुत्तिकान्तशरीरेषु घटीयन्त्रवत् गतागतमभूत्। अत इदानीं विवेकी भूत्वा हिरण्यगर्भपर्यन्तात् भोगात् ससाधनाच्छर्दितगृध्रमांसादेरिवातिविरक्तः सन् अपवर्गकरं साधनं कुर्वित्यर्थः। इह विप्रजन्मनीत्यनेन नित्यादिसत्कर्मानुष्ठानेन शुद्ध्यादिद्वारावैराग्यसम्पादनयोग्यतोच्यते यद्यस्मिन्नपि जन्मनि विवेकवैराग्यं न भवेत्कदापि तर्हि न भवेत् मानुष्यादिव्यतिरिक्तजन्मनोऽतितामसत्वेन विवेकादेरसंभवात् । मनुष्यजन्मनः विद्यायोग्यत्वं तदितरस्य तदयोग्यत्वं च श्रीभागवतेऽप्युक्तम् । "सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान् सरीसृपपशून् खगदंशमत्स्यान् । तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः" इति ॥ ५३ ॥

किं तदपवर्गसाधनं तदाह—

श्रवणादिक शमदमादिपरः
परमात्मनः परमभागवतः ।
कुरु तावता परममेव पदं
परमात्मनस्त्वमवलोकयसि ॥ ५४ ॥

श्रवणादिकमिति । श्रवणं नामद्वैते ब्रह्मणि वेदान्तानां शक्तितात्पर्यावधारणम्;आदिपदेन मननादिकं गृह्यते । ननु किं श्रवणानुष्ठाने विवेक-

वैराग्यमेवाधिकारिणा ऽपेक्ष्यते नान्यदप्यस्तीत्याह—शमदमादिपर इति। शमोऽन्तरिन्द्रियनिग्रहः दमो बहिरिन्द्रियनिग्रहः आदिपदेनोपरत्यादिकं मुमुक्षा च गृह्यते परमात्मन इति कर्मणि षष्ठी परमात्मविषयश्रवणादिकमित्यर्थः। साधनान्तरमप्याह—परमभागवत इति। देवतागुरुभक्तिमानित्यर्थः। ननु यदेतन्महता प्रयासेनानुतिष्ठेतेत्युच्यते किं ततोऽप्यन्यत् मोक्षसाधनज्ञानाय कर्त्तव्यमस्ति नेत्याह—तावतेति। उक्ताधिकारिनिर्वर्त्यश्रवणादिमात्रेण ॥ ५४ ॥

एवं संसारमहानलसंतप्तस्य तच्छान्तये दृढवैराग्यादिपूर्वकं श्रवणादिकमनुष्ठेयमित्युक्त्वा विपक्षे बाधकमाह तत्र प्रोत्साहाय—

यदि तन्न पश्यसि हरेः परमं

पदमम्बुशीतलमिवेद्धशिराः।

न खलु प्रदीप्तशिरसोऽस्ति सुखं

तव दुःखपावकशिखाभिरहो ॥ ५५ ॥

यदीति। तच्छ्रुतिप्रसिद्धं हरेः परमं पदं यदि न पश्यसि श्रवणादिनेति शेषः। तदा दुःखपावकशिखाभिः आध्यात्मिकादिदुःखमेव पावकः तज्ज्वालाभिः प्रदीप्तशिरसः संतप्तचित्तस्य तव सुखं नास्तीत्यर्थः। तत्र दृष्टान्तमाह—अम्ब्विति। यदीद्धशिराः ज्वलत्पावकप्रदीप्तशिराः पुमान् तच्छामकं शीतलमम्बु आप्तवाक्यश्रवणादिना न पश्यति तदा दुःखहेतुपावकशिखाभिः प्रदीप्तशिरसस्तस्य यथा सुखं नास्ति तद्वदित्यर्थः ॥ ५५ ॥

तदेवं नित्यमुक्तासङ्गात्मनस्तवाध्यात्मिकादिसंसारदुःखमात्माज्ञानविजृम्भितान्तःकरणाद्युपाधिनिबन्धनं न तु वास्तवं वास्तवं तु नित्यमुक्तसच्चिदानन्दात्मकं त्वत्स्वरूपमेव तादृशसंसारनिवृत्ति-

साधनं च दृढवैराग्यादिपूर्वकमनुष्ठितश्रवणादिसाध्यं त्वत्स्वरूपज्ञानमेव नान्यत् । तदभावे च तव न कदापि संसारानलसंतापान्निवृत्तिरित्युवर्ण्येदानीं त्वमप्यस्मदुक्तप्रकारेण वैराग्यादिपूर्वमनुष्ठितश्रवणादिसाध्यज्ञानं विना मम कदाचिदपि संसाररोगान्निवृत्तिर्न संभवतीति ज्ञात्वा तत्सिध्यर्थं तत्साधनज्ञान एव सम्यगभिलाषं कुरु हिरण्यगर्भपर्यन्तं भोगाच्च ससाधनात् कुम्भीपाकदिव सम्यग्विरक्तो भवेति फलितमुपसंहरति—

एवं विज्ञाय तापत्रयमतिगहनं मोहमूलं परस्मि-
न्नात्मन्यात्मप्रकाशे त्वयि परमसुखे निष्कले निष्कलङ्के।
सत्ये नित्यस्वभावे परिहृतसकलद्वैतकूटानुषङ्गे
सम्यग्ज्ञानानुरागं कुरु विषयगतं छिन्धि निर्बन्धमेनम् ।५६।

एवमिति । अस्मदुक्तप्रकारेण तापत्रयमाध्यात्मिकादिलक्षणमतिगहनं दुस्तरं मोहमूलमिति बहुव्रीहिः । आत्मप्रकाशे स्वप्रकाशे परमसुखेऽनवच्छिन्नसुखे परिहृतसकलद्वैतकूटानुषङ्गे वस्तुतो निरस्तबाह्याभ्यन्तरप्रपञ्चसमूहसम्बन्धे एवं भूते त्वयि विषये सम्यग्ज्ञानानुरागं तत्त्वज्ञानाभिलाषं कुरु । विषयगतं विषयो ब्रह्मलोकादि तद्गतं तद्विषयमेतन्निर्बन्धं सुखसाधनत्वाभिनिवेशं छिन्धि त्यज । ब्रह्मलोकादिविषयादत्यन्तं विरक्तो भवेत्यर्थः ॥ ५६ ॥

एवं वैराग्यनिरूपणानन्तरं पदार्थशोधनजिज्ञासाप्रयुक्तशिष्यस्य प्रश्नमवतारयति--

इत्युक्त्वोपरते गुरौ पुनरयं जिज्ञासया प्रेरित-
स्तत्त्वंशब्दनिगद्यलक्ष्यविषयं शिष्यो गुरुं पृच्छति ।

वैराग्येऽतिदृढीकृते सति यतः प्राज्ञो यतिर्मन्यते
संदीप्तं शिरसीव पावकमिदं संसारदुःखं महत् ॥ ५७ ॥

इत्युक्त्वेति । गुरौ उपरते तूष्णींभूते सति पुनः दृढवैराग्योपयोगिसंसारस्वरूपपरिज्ञानानन्तरमित्यर्थः । जिज्ञासया पदद्वयलक्ष्यार्थविषयजिज्ञासया प्रेरितः प्रयुक्तः सन्नित्यर्थः । तत्त्वंशब्दनिगद्यलक्ष्यविषयं तत्त्वं शब्दाभ्यां निगद्यः प्रतिपाद्यो यो लक्ष्यविषयः—लक्ष्यपदार्थः तं तत्त्वं पदद्वयलक्ष्यार्थमित्यर्थः । सम्यक् संसारस्वरूपपरिज्ञानजन्यवैराग्यपदार्थजिज्ञासयोर्हेतुहेतुमद्भावं दर्शयति—वैराग्य इति । अतिदृढीकृते सति सम्यक्संसारपरिज्ञानेनेति शेषः । प्राज्ञः दृढविवेकी यतिः इदं महत्संसारदुःखं शिरसि प्रदीप्तं पावकमिव मन्यते यतः ततः गुरुं तत्त्वंशब्दनिगद्यलक्ष्यविषयं पृच्छतीत्यन्वयः ॥ ५७ ॥

ननु वैराग्यस्याथशब्दोपात्ताधिकारिविशेषणत्वेन समन्वयविचारात्प्रागेव सिद्धत्वात्कथं तस्य तार्त्तीयप्रथमपादविचारफलतेत्याशङ्क्य सत्यं तत्र हि यत्कृतकं तदनित्यमिति न्यायमात्रेण वैराग्यमुत्पन्नमधिकारिविशेषणं भवति । अत्र तु तस्यैव वैराग्यस्य सम्यक् संसारस्वरूपपरिज्ञानेनातिदार्ढ्यं भवतीत्यभिप्रेत्य पदार्थप्रश्नानुकूलं वैराग्यं तद्दार्ढ्यं स्वस्मिन्निर्वृत्तं सहेतुकं शिष्यो दर्शयतीत्याह—

वैराग्यं विषयेषु पूर्वमपि मे जातं हरेरर्चना—
यज्ञादिक्रियया निरस्तफलया किं त्वस्य दार्ढ्यं गतम् ।
संसारस्य निरूपणेन धिगिदं कर्मादिजन्यं फलं-
विश्वं नश्वरमम्बुबुद्बुदसमं पश्चामनान्तं जगत् ॥ ५८ ॥

वैराग्यमिति । विषयेषु स्वर्गादिविषयेषु पूर्वमपि श्रीमद्भिः । संसारस्वरूपनिरूपणात्पूर्वमपि पूर्वं वैराग्यजननहेतुमाह—हरेरित्यादिना । यज्ञा-

दीत्यादिपदेन वेदानुवचनदानादयो गृह्यन्ते । भक्तिश्रद्धापुरस्सर-विष्णुपूजायज्ञादिना परिपन्थिकल्मषनिबर्हणे सति नित्यानित्य-विवेकेन वैराग्यजन्मेत्यर्थः । ननु यज्ञस्य ज्योतिष्टोमादेः स्वर्गा-दिफलत्वात्कथं कल्मषनिबर्हकत्वमित्याशङ्क्य यद्यपि फलकाम-नयानुष्ठितस्य स्वर्गादिहेतुत्वमेव तथापि फलकामनां विने-श्वरार्पणबुद्ध्यानुष्ठितस्य तस्य कल्मषनिबर्हकत्वमस्त्येवेत्यभिप्रेत्योक्तं निरस्तफलयेति । फलकामनां विनानुष्ठितत्वं निरस्तफलत्वं यदि पूर्वमेव वैराग्यं जातं तर्हि संसारनिरूपणेन कृतेन किं फलितमित्याकाङ्क्षा-पूर्वकमाह—किंत्वित्यादिना । अथेदानीं संसारनिरूपणानन्तरमित्यर्थः । दार्ढ्यं गतं वैराग्यमित्यनुषङ्गः । तद्दार्ढ्यमेवाभिनयति-धिगिदमित्यादिना । कर्मादीत्यादिपदेनोपासना गृह्यते । पितृब्रह्मलोकादिप्राप्तिः फलशब्दार्थः इदं कर्मादिजन्यं ब्रह्मलोकान्तफलं धिक् कुत्सितं तुच्छमित्यर्थः । तत्र हेतुः—विश्वमिति । सकलं चेतनाचेतनात्मकमित्यर्थः । पद्मास-नान्तं हिरण्यगर्भपर्यवसानं जगत् यतो नश्वरम् आशुविनाशि तत इत्यर्थः । आशुविनाशे दृष्टान्तत्वेनोपात्तमम्बुबुद्बुदसममिति जलफेनसममित्यर्थः ॥ ५८ ॥

एवं शिष्यः संसारनिरूपणफलं स्वस्मिन्निर्वृत्तं दृढवैराग्यं प्रदर्श्येदानीं वैराग्यदार्ढ्ये सति किमपरमवशिष्टं वाक्यार्थस्य चादावेवोपदिष्टत्वात् तस्य चाविरुद्धतयोपपादितत्वादित्याशङ्का-पूर्वकपदार्थप्रश्नं दर्शयति—

किन्तु त्वंपदलक्ष्यमर्थमधुना कर्तृत्वभोक्तृत्वयो-
र्जाग्रद्भूगतयोरपोहमुखतो वाञ्छाऽवगन्तुं मम ।
कर्तृत्वादिकमस्य किं निजमभूत्स्वाभाविकं जाग्रतः
किं वा तत्परतः कुतश्चिदभवच्चैतन्यधातोरिति ॥ ५९ ॥

किन्त्वित्यादिना। यद्यपि मम ब्रह्मात्मत्वं श्रीमद्भिरुपदिष्टमविरुद्धतयोपपादितं च तथापि तदहमेतावत्कालं बाह्यरागाक्षिप्तत्वान्मत्तमातङ्ग इव स्वमस्तकार्पितरत्नमालामनादृत्याऽसंभावितं मन्यमान आसमिदानीं तु भगवदनुग्रहेणातितरां विषयेषूद्विग्नमनसो भवदुपदिष्टमर्थं च सम्भावितं मन्यमानस्य मम पदार्थज्ञानाभावात्परमपुरुषार्थसाधनवाक्यार्थापरोक्षानुभवो न जायते अतस्तत्कारणपदद्वयलक्ष्यार्थजिज्ञासा वर्त्तते तत्रापि त्वंपदार्थस्य मत्स्वरूपस्यात्यन्तःमनर्थव्रातोपेततया प्रतीयमानत्वेन प्रथमं तदेवावगन्तुं वाञ्छा विद्यते इत्यर्थः। अधुना प्रथममित्यर्थः। ननु त्वंपदलक्ष्यार्थोपि समन्वयाध्याये पदवृत्तिनिरूपणावसरे "आद्ये सूत्रे त्वंपदस्योदितस्त्वादि"[१ ५५२] स्यादिना प्रत्यङ्मात्रमेवेति दर्शित इति चेत्सत्यम्। तत्र हि विधिमुखेन तदर्थो दर्शितः। अत्र त्वतद्व्यावृत्तिमुखेन तज्जिज्ञासेत्याह—कर्तृत्वभोक्तृत्वयोरिति। एतच्चानात्मधर्माणां कृशत्वादीनां सर्वेषामुपलक्षणं जाग्रद्भूः जाग्रत्स्थानं स्पष्टाभिप्रायेण जाग्रद्ग्रहणमपोहो व्यावृत्तिः मिथ्यात्वनिश्चयो वापोहमुखतः तद्द्वारा देहादेरात्मत्वनिषेधेन कर्तृत्वादेरात्मधर्मत्वनिषेधद्वारा मत्स्वरूपं ज्ञातुमिच्छामीत्यर्थः। तदर्थं चिन्तामाह—कर्तृत्वादिकामिति। अस्य जाग्रतः चैतन्यधातोरिति सम्बन्धः धातुशब्दः स्वरूपवाची। निजमित्यस्य व्याख्या स्वाभाविकामिति। तत्कर्तृत्वादिकं किं चेतनस्य मम कर्तृत्वादिकं स्वाभाविकम् उताविद्याप्रयुक्तमिति विमर्शार्थः। यद्याद्यः तदा मम कर्त्राद्यपोहासंभवात् न निष्प्रपञ्चब्रह्मात्मैक्यप्राप्तिर्भवति। द्वितीये तु कर्तृत्वाद्यपोहेन मत्स्वरूपज्ञानसंभवात्सा भवतीति विमर्शकस्याभिप्रायः। यद्यपि शास्त्रादौ संसारनिरूपणप्रस्तावे च कर्तृत्वादिकं परोपाधिकमात्मन्यध्यस्तमिति दर्शितं तथापि तदपवादेन त्वंपदलक्ष्यवस्तु तत्र न प्रदर्शितमतः सर्वातद्धर्मापवादेन केवलः प्रत्यगात्मा त्वंपदलक्ष्यार्थो ज्ञातव्य इति पुनर्विमर्शोपपत्तिरिति भावः॥ ५१॥

ननु पदार्थज्ञानमात्रमेव वाक्यार्थज्ञाने कारणं नतु लक्ष्यार्थज्ञानमिति नियमः । त्वंपदवाच्यार्थश्च कर्त्रादिविशिष्टो ज्ञात एवातः किमर्थं कर्तृत्वाद्यपवादेन केवलप्रत्यगात्मज्ञानमित्याशङ्क्य यत्र वाच्यार्थमादाय वाक्यार्थबोधस्तत्र तथा भवतु इह तु लक्ष्यार्थमादायैव वाक्यार्थस्य बोधात् कर्तृत्वाद्यपवादेन तज्ज्ञानमावश्यकमेव । अन्यथा बधिरं प्रति प्रयुक्तशब्दवत् स्वार्थाबोधकमेव स्यात् । अतस्तद्बोधः सम्पादनीय इत्याह—

यावत्त्वंपदलक्ष्यवस्तुविषयो बोधो न मे वर्तते
तावन्मे बधिरेषु गीतमिव तच्छ्रौतं वचोऽनर्थकम् ।
तस्मात्त्वंपदलक्ष्यवस्तुविषयः कर्तृत्वभोक्तृत्वयोः
जाग्रद्भूगतयोरपोहमुखतो बोधो ममोत्पाद्यताम् ॥६०॥

यावदिति । श्रौतं वचस्तत्त्वमादिवाक्यमनर्थकं स्वार्थब्रह्मात्मैक्याबोधकमित्यर्थः । उत्पाद्यतां युक्तिभिरिति शेषः ॥ ६४ ॥

तत्र तावदाचार्यः कर्तृत्वाद्यपवादेन केवलस्वरूपं ज्ञापयितुं कर्तृत्वादेरात्मधर्मत्वं निराकरोति ।

कर्त्रादेरवभासकत्वमगमः शुद्धः स्वयं भास्वर-
श्चैतन्येन निजेन तेन भवतः कर्त्रादिबुद्धिर्भ्रमः ।
कूटस्थस्य चिदात्मनस्तव कुतः कर्तृत्वभोक्तृत्वयोः
शङ्का जागरितेऽपि कारकगणं कर्त्रादिकं पश्यतः ॥६१॥

कर्त्रादेरिति । आदिपदेन भोक्त्रादिकं गृह्यते । अवभासकत्वं द्रष्टृत्वम् । अगमः प्राप्तवानसि । अत एव शुद्धः कर्तृत्वादिरहितः । अभेदं

विवक्षितम् । आत्मा कर्तृत्वादिरहितः तद्द्रष्टृत्वात् यो यद् द्रष्टा स न तद्वान् यथा रूपादिद्रष्टा देवदत्तो रूपादिमान्न भवतीति। ननु द्रष्टृत्वं दर्शनकर्तृत्वं ततः कथं कर्तृत्वनिषेध इत्याशङ्क्य न हि दर्शनक्रियाश्रयत्वेन द्रष्टृत्वं ब्रूमः किन्तु स्वरूपचैतन्येनैवेत्याह—निजेन चैतन्येनेति । तर्ह्यहं कर्त्तेत्यादिप्रतीतेः का गतिः तत्राह—तेनेति । येन हेतुना स्वप्रकाशस्त्वं कर्तृत्वादिरहितस्तेन भवतः स्वप्रकाशचैतन्यस्वरूपस्य तव कर्त्रादिबुद्धिः कर्तृत्वादिप्रत्ययः भ्रमः बुद्ध्याद्युपाधिपरिकल्पित एव। न च बाधकाभावः। प्रमितिकरणाभावस्यैव बाधकत्वात्। तथा हि कर्तृत्वादिप्रमितौ किमिन्द्रियं करणमुतानुमानादिरेव।नान्त्यः।अपरोक्षत्वावगमात्। आद्येऽपीन्द्रियशब्देन चक्षुरादिकं विवक्षितमुत मनः। नाद्यः। तस्य बाह्यमात्रविषयत्वात्। न द्वितीयः। मनोगम्यत्वे प्रमाणाभावात्। ननु सति मनोव्यापारे कर्तृत्वाद्युपलम्भः असति तस्मिन् सुषुप्ते न तदुपलम्भ इत्यन्वयव्यतिरेकावेव तत्र मानमिति चेन्न । तदन्वयव्यतिरेकयोः प्रथमापेक्षितकर्तृत्वाद्युपादानकारणविषयतयाऽन्यथासिद्धत्वात् । ननु क्लृप्तमुपादानमात्मेति नोपादानापेक्षेति चेन्न तस्य तदुपादानत्वे मानाभावात्। ननु कारणान्तराभावादात्मैवोपादानमिति वक्तव्यम् न चान्तःकरणं तदुपादानं तस्य करणत्वेन चक्षुरादिवत्तदुपादानत्वाभावादिति चेन्न । अन्योन्याश्रयात्। अनन्यथासिद्धकार्यानुपपत्त्या आत्मनस्तदुपादानत्वे क्लृप्ते उपादानकारणाकाङ्क्षाया अन्यतः शान्तत्वादन्तःकरणान्वयव्यतिरेकयोः कर्तृत्वादिप्रमितिकरणत्वविषयत्वमन्तःकरणस्य च प्रमितिकरणत्वे सिद्धेः कार्यस्यानन्यथासिद्धतया आत्मनस्तदुपादानत्वकल्पनमिति। नचान्तः करणस्यैवात्मनः कर्तृत्वादिकं प्रत्यन्वयव्यतिरेकौ स्तः न वा तत्र प्रमाणान्तरमस्ति येन तस्य तदुपादानत्वं सिद्धवत्क्रियेत । आत्मनोऽसङ्गत्वश्रुतिविरोधाच्च न कर्तृत्वाद्युपादानत्वकल्पना संभवति किं च सुषुप्ते कर्तृत्वाद्यभावादपि तदप्रतीत्युपपत्त्या व्यतिरेकस्या-

न्यथा सिद्धेर्नान्तः करणस्य प्रमितिकरणत्वकल्पना सम्भवति। न च तदा तदभावकल्पना गुरुशरीरेति वाच्यम्। किं कृत्याद्याश्रयत्वं कर्तृत्वादि उत तदनुकूलशक्तिमत्त्वम्। नाद्यः। प्रत्यक्षात्मविशेषगुणानामवश्यवेद्यत्वेन तदभावे कर्तृत्वाद्यभावस्यावश्यकत्वात्। ननु कृत्याद्याश्रयत्वयोग्यत्वं तदिति चेत्। तद्धि तदनुकूलशक्तिमत्त्वमेव तद्व्यतिरिक्ते तस्मिन्मानाभावात्। तदेवास्त्विति चेत्तर्हि शक्तेरतीन्द्रियत्वेन मनोग्राह्यत्वानुपपत्तिः। न च स्वप्रकाशत्वादेव कर्तृत्वादिकं भासत इति वाच्यम्। अनेकस्वप्रकाशकल्पने गौरवात्। तस्मात्प्रमितिकरणाभावादात्मचैतन्यमात्रभास्यत्वात् शुक्तिरूप्यादिप्रतीतिवत् कर्तृत्वादिप्रतीतिर्भ्रान्तिरेवेति भावः। कूटस्थस्यात्मनोऽपरिणामित्वादपि न तव कर्तृत्वादिकमित्याह—कूटस्थस्येति। ननु बुद्ध्यादीनां स्वतो जडत्वात् व्यापारासम्भवादात्मप्रेरितत्वेनैव कार्यकरत्वं वक्तव्यम्। तथा च विकारित्वेन कर्तृत्वादिकं प्राप्तमित्याशङ्क्य बुद्ध्यादीनां जडत्वेपि चेतनात्मनो निरीक्षणमात्राद्व्यापारः सम्भवत्येव न तावन्मात्रेणास्य कर्तृत्वमायातीत्यभिप्रेत्याह—जागरणेऽपीति। जाग्रत्कालेपि कर्त्रादिकारकावभासकत्वमेवात्मनः तत्प्रेरकत्वं किमु वक्तव्यं सुषुप्त्यादौ कर्त्रादिकारकाभाववति तत्प्रेरकत्वाभाव इत्यभिप्रायेणापिशब्दप्रयोगः। अथवा जागरणे अपि शब्दात् स्वप्नेपीत्यर्थः॥ ६१॥

आत्मसन्निधिलक्षणनिरीक्षणमात्रेण बुद्ध्यादीनां व्यापारः न तावतात्मनः कर्तृत्वमायातीत्येतत्सदृष्टान्तमाह—

व्यापारं सकलस्य भासयति यो भास्वत्करो भास्करो
नासौ कर्तृतया जनस्य विदितो भूमौ द्युलोकस्थितः।
एवं स्वे महिमन्यवस्थितवतः संघातमुत्पश्यतः
स्वव्यापारसमन्वितं तव कुतः कर्तृत्वमुत्प्रेक्ष्यते॥ ६२॥

व्यापारमिति। व्यापारं लौकिकवैदिकलक्षणं सकलस्य जनस्य व्यापारमिति सम्बन्धः। भास्वत्करः भास्वन्तः कराः किरणाः यस्य स तथोक्तः असौ भास्करः भूमौ भूलोके कर्तृतया व्यापारकर्तृत्वेन न विदितः सूर्यस्य कर्तृत्वासम्भवे हेतुत्वेन द्युलोके स्थित इति विशेषणम्। एवं सूर्यवत् स्वे महिमन्यवस्थितवतः कूटस्थासङ्गे स्वरूपेऽवस्थितवतः इदं च कर्तृत्वासंभवे हेतुः। स्वव्यापारसमन्वितं स्वस्वव्यापारयुक्तं संघातं कार्यकरणसंघातमुत्पश्यतः भासकस्य तव चैतन्यात्मनः कः कर्तृत्वमुत्प्रेक्षते न कोपीत्यर्थः। एतदुक्तं भवति—जीवलोको हि पूर्वमन्धकारावृतः स्वस्वव्यापारे प्रवर्तितुमशक्नुवन् दिवि सूर्योदयमात्रेण स्वस्वव्यापारे प्रवर्तत इति एतावता न सूर्यस्य व्यापारकर्तृत्वं प्रसिद्धमस्ति एवं बुद्ध्यादिकं स्वतो जडं प्रवर्तितुं मशक्नुवत् चैतन्यात्मनिरीक्षणात् स्वस्वव्यापारे प्रवर्तत इति एतावतानात्मनः कर्तृत्वमायातीति ॥ ६२ ॥

नन्वेवमपि भोक्तृत्वं चेतनस्यैव वक्तव्यम् नाचेतनस्य बुद्ध्यादेस्तस्य सुखदुःखसाक्षात्कारलक्षणभोगानुपपत्तेः। तस्यापि साक्षात्कारवत्त्वे द्रष्टृत्वमपि तस्यैव स्यान्न त्वात्मनः। तथा चात्मनो भोक्तृत्वे कर्तृत्वमप्यायात्येव कर्त्तुरेव भोक्तृत्वादित्याशङ्क्य बुद्ध्यादेः स्वतो जडत्वेपि तत्साधकचैतन्यस्य तस्मिन् चैतन्यासञ्जकत्वेन बुद्ध्यादेश्चैतन्यव्याप्ततया चैतन्यवद्भानाद् भोक्तृत्वमपि संभवतीत्यभिप्रेत्याह—

भूतानि पञ्च मोहसमुद्भवानि
संघातरूपपरिणाममुपागतानि।
कुर्वन्ति कर्मफलमश्नुवते च तेषां
साक्षी त्वमन्तरविलुप्तचिदेकरूपः ॥ ६३ ॥

भूतानीति। पृथिव्यादीनि मोहसमुद्भवानि मोहात्समुद्भवो येषां

तानि तथोक्तानि संघातरूपपरिणाममुपागतानि कार्यकरणसंघात-रूपेण परिणामं प्राप्तानि स्थूलसूक्ष्मदेहद्वयाकारेण परिणतानीति यावत् । कर्म लौकिकं वैदिकं च फलं स्वर्गादिकं स्रगादिविषयभोगं चाश्नुवते प्राप्नुवन्ति । न चाचेतनस्यापि साक्षात्कारलक्षणभोगाश्रयत्वे तस्य भासकत्वप्रसङ्गः । तच्चैतन्यस्यागन्तुकत्वात् । किन्तु यद्बलाद-चेतनस्यापि चैतन्यप्राप्तिः तस्य सर्वान्तरस्यालुप्तचित्स्वरूपस्या-त्मन एव भासकत्वमित्याह—तेषामिति । कार्यकरणरूपेण परिणता-वियदादिभूतानामित्यर्थः । अन्तः अन्तर इति यावत् । अविलुप्तचिदेक-रूपः अविनाशिचैतन्यस्वरूपः ॥ ६३ ॥

नन्वात्मनोऽविलुप्तचिदेकरूपत्वमनुपपन्नं बुद्ध्यादौ चैतन्या-सञ्जकत्वेन विकारित्वादित्याशङ्क्यात्मनः स्वस्मिन्विकारं विनापि सन्निधिमात्रेण देहद्वयाकारपरिणतावियदादिभूतेषु चैतन्यासञ्जकत्वं तावन्मात्रेण तेषां चैतन्यव्याप्त्या चैतन्यवद् भानं च सदृष्टान्तमाह—

> क्षीरस्य पूर्णे चषके निरस्तो
> मणिर्यथा मारकतो महार्हः ।
> क्षीरं समस्तं क्षणमात्रतस्तत्
> करोति तच्छायमनूनतेजाः ॥ ६४ ॥

क्षीरस्य पूर्ण इति । क्षीरेण पूर्ण इत्यर्थः । चषके कांस्यादिविनिर्मित-पात्रविशेषे निरस्तः प्रक्षिप्तः स्थापित इति यावत् । मारकतो मणिः मरकतरत्नं महार्हः—अनर्घः । तत्र हेतुः अनूनतेजाः उज्ज्वलप्रकाशयुक्त इत्यर्थः । तत् क्षीरमिति सम्बन्धः । क्षणमात्रतः क्षीरसम्बन्धमात्रेणे-त्यर्थः । तच्छायं तस्य मरकतमणेश्छायेव छाया यस्य क्षीरस्य तत्तथा तत्समानवर्णमित्यर्थः ॥ ६४ ॥

दार्ष्टान्तिकमाह—

तथा तमः संभवमच्छमन्त-
र्बहिर्जडिम्नाऽन्वितमन्तरात्मा ।
जगच्चिदेकच्छवि चित्स्वरूपः
करोति सान्निध्यवशेन विश्वम् ॥ ६५ ॥

तथेति । तमसः संभवो यस्य जगतः तत्तमः संभवं जगत्तच्च कीदृशमन्तः स्वच्छन्देहाभ्यन्तरे अतिस्वच्छन्देहाद्बहिः जडिम्नान्वितं जाड्येन युक्तमधिभूतस्य पृथिव्यादेरन्तः करणादिवदतिस्वच्छत्वाभावात् जाड्यान्वितत्वव्यपदेशः अन्तरात्मा सर्वान्तरप्रत्यगात्मा चिदेकच्छवि चित्समानाकारं चैतन्यव्याप्तमिवेत्यर्थः । विश्वं सर्वं जगदिति सम्बन्धः ॥ ६५ ॥

एवमविकारिकूटस्थासङ्गचैतन्यस्वभावात्मस्वरूपसन्निधानेनाहंकारादेरेव चैतन्यव्याप्त्या कर्तृत्वभोक्तृत्वादिकं न त्वात्मनः तादृशचैतन्यस्वभावात्मैव त्वंपदार्थ इति दर्शितम् । एवमप्यात्मनश्चैतन्यैकरसत्वं न संभवति । अनात्मप्रतियोगिकभेदवैशिष्ट्यस्य सत्वात् । न च कल्पितप्रतियोगिकभेदेपि न वास्तवैकरसत्वभङ्ग इति वाच्यम् । एवमप्यात्मान्तरप्रतियोगिकभेदवैशिष्ट्यस्य सत्वात् धर्मप्रतियोगिनोः सत्वेन तद्भेदस्य सत्वात् न चात्मभेदोऽसिद्ध इति वाच्यम् सर्वानुभवसिद्धत्वादित्याशङ्कयोपाधिभेदादेवात्मनो भेदप्रत्ययः न तु स्वत इति सदृष्टान्तमाह—

तान्येव कार्यकरणानि बहुप्रकारं
भेदं च बिभ्रति भवानपि तत्र लग्नः ।
भेदेन भाति जलपात्रनिविष्टमूर्ति-
मार्तण्डमाण्डलवदन्वयमन्तरेण ॥ ६६ ॥

तान्येवेति। यानि कार्यकरणानि चैतन्यसन्निधानाच्चैतन्यव्याप्त्या कर्तृत्वादिकं भजन्ते तान्येव बहुप्रकारं भेदं बिभ्रति न त्वात्माभेदं बिभर्तीत्यर्थः। तर्हि कथमात्मनि भेदे प्रत्ययः तत्सम्बन्धवशादित्याह—भवानपीति। अद्वितीयासङ्गात्मस्वभावो भवानपि तत्र भिन्नेषु कार्यकरणेषु उग्रः प्रतिबिम्बितः सन् तदविवेकात् भेदेन भाति न तु वस्तुत इत्यर्थः। तत्र दृष्टान्तः—जलपात्रेति। जलपात्रे निविष्टा प्रतिबिम्बिता मूर्तिः स्वरूपं यस्य तच्च तन्मार्ताण्डमण्डलं चेति तथोक्तं तद्वदित्यर्थः। यथैकस्मिन्नपि सूर्ये जलपात्रोपाधिभेदात् भेदप्रत्ययः तद्वदित्यर्थः। नन्वेवमप्युपाधिसम्बन्धवैशिष्ट्यस्य विद्यमानत्वान्नैकरसत्वमित्याशङ्क्योपाधिसम्बन्धस्यापि कल्पितत्वान्नैवमित्यभिप्रेत्याह—अन्वयमन्तरेणेति। वास्तवसम्बन्धं विना भेदेन भातीत्यर्थः ॥६६॥

एवमात्मभेदस्यौपाधिकत्वासमर्थनफलं समष्टिव्यष्ट्यात्मकत्रिविधभोक्तृसाक्षितया सर्वत्रात्मन एकत्वसिद्धिरित्याह—

अध्यात्ममेवमधिभूतमथाधिदैवं
सूत्रं विराजमपि पश्यसि साक्षिभूतः।
साक्षित्वकारणमशेषजगन्निदान-
मज्ञानमात्मचिदवज्वलितं सदैव ॥ ६७ ॥

अध्यात्ममिति। व्यष्टिस्थूलसूक्ष्मदेहद्वयोपाधिकं चैतन्यमधिभूतं व्यष्टिपृथिव्याद्युपाधिकं चैतन्यं तस्य च भोक्तृत्वम् "इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मध्वि"त्यादिना प्रदर्शितमधिदैवं व्यष्टिदेवाद्युपाधिकं चैतन्यं सूत्रं समष्टिसूक्ष्मभूताद्युपाधिकचैतन्यं विराजं समष्टिस्थूलभूताद्युपाधिकं चैतन्यम्। एतत्सर्वं त्वं पश्यसि। दर्शनविकारं व्यावर्त्तयति—साक्षिभूत इति। विकारं विना स्वप्रकाशसाक्षिरूपेणैव पश्यसीत्यर्थः। ननु कथमविकारिणः साक्षित्वं

तद्धि साक्ष्यसम्बन्धाधीनं सम्बन्धश्च विकारमन्तरेण न संभवतीत्यात्मनः कूटस्थत्वं भग्नमित्याशङ्क्य विकारं विनाप्यविद्यया साक्ष्यसम्बन्धोपपत्तेर्न कूटस्थत्वभङ्गः। न वा साक्षित्वाभाव इत्यभिप्रेत्याह— साक्षित्वकारणमिति। साक्षित्वप्रयोजकमित्यर्थः। अज्ञानस्य स्वातन्त्र्यं व्यावर्त्तयति— सदैवात्मचिदवज्वलितमिति। सर्वदात्मचैतन्यभास्यमेवेत्यर्थः॥६७॥

तदेवं सर्वैरपि कार्यकारणाद्युपाधिभिरात्मैक एव भेदेन भातीत्यात्मनः सर्वशरीरेष्वेकत्वमुक्तं तत्र किं प्रमाणमित्याकाङ्क्षायामनुमानमित्याह—

> देहव्यक्तिर्विप्रतीत्यास्पदत्वं
> याता सर्वा तावकी तावकीव।
> देहव्यक्तिर्देहताकारणेन
> तस्मादात्मा सर्वभूतस्थ एकः॥ ६८॥

देहव्यक्तिरिति। देह एव व्यक्तिः देह इत्यर्थः। विप्रतीत्यास्पदत्वं यातैकस्य वा भोगायतनमनेकस्य वेति विवादास्पदत्वं प्राप्ता विवादविषयेति यावत्। अत्र विप्रतीत्यास्पदत्वं याता सर्वा देहव्यक्तिरिति पक्षनिर्देशः। तावकी तव भोगसाधिकेति साध्यनिर्देशः देहताकारणेन देहत्वादिति हेतुनिर्देशः। तावकी देहव्यक्तिरिवेति दृष्टान्तोपादानं तस्मादित्यादिना फलितप्रदर्शनं त्वद्देहव्यतिरिक्तानि सर्वाणि शरीराणि त्वदात्मनो भोगसाधनानि शरीरत्वात्त्वच्छरीरवदित्यनुमानात् सर्वस्यापि शरीरस्यैकात्मभोगसाधनत्वे सर्वशरीरेष्वैकात्म्यं सिद्ध्यतीत्यर्थः। एवमेवोत्तरप्रयोगेष्वनुमानप्रकारोभिप्रायश्च द्रष्टव्यः॥ ६८॥

एवं स्थूलदेहपक्षीकारे सर्वशरीरेष्वैकात्म्यं प्रसाध्येदानीमन्तःकरणपक्षीकारेणापि तत्साधयति—

बुद्धिव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ।
बुद्धिर्व्यक्तिर्बुद्धिताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ६९ ॥

बुद्धिव्यक्तिरिति ॥ ६९ ॥

बाह्येन्द्रियदशकपक्षीकारेणापि तत्साधयति—

अक्षव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ।
अक्षव्यक्तिस्त्वक्षताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७० ॥

अक्षव्यक्तिरिति । अक्षपदमिन्द्रियपरम् ॥ ७० ॥

इन्द्रियादिजन्यबुद्धिवृत्तिपक्षीकारेणापि तत्साधयति-

ज्ञानव्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ।
ज्ञानव्यक्तिर्ज्ञानताकारणेन
तस्मादात्मा सर्वभूतस्थ एकः ॥ ७१ ॥

ज्ञानव्यक्तिरिति । ज्ञानं बुद्धिवृत्तिः ॥ ७१ ॥

बुद्धिवृत्तिजन्यस्फुरणपक्षीकारेणापि तत्साधयति—

संविद्व्यक्तिर्विप्रतीत्यास्पदत्वं
याता सर्वा तावकी तावकीव ।

संविद्व्यक्तिः संविदात्मत्वहेतो-

स्तस्मादात्मा सर्वभूतस्थ एकः ॥ ७२ ॥

संविद्व्यक्तिरिति । संवित्प्रमाणफलं स्फुरणम् ॥ ७२ ॥

इष्टविषयसंविज्जन्यरागपक्षीकारेणापि तत्साधयति—

रागव्यक्तिर्विप्रतीत्यास्पदत्वं

याता सर्वा तावकी तावकीव ।

रागव्यक्ती रागताकारणेन

तस्मादात्मा सर्वभूतस्थ एकः ॥ ७३ ॥

रागव्यक्तिरिति । राग इच्छा ॥ ७३ ॥

अनिष्टसंविज्जन्यद्वेषपक्षीकारेणापि तत्साधयति—

द्वेषव्यक्तिर्विप्रतीत्यास्पदत्वं

याता सर्वा तावकी तावकीव ।

द्वेषव्यक्तिर्द्वेषताकारणेन

तस्मादात्मा सर्वभूतस्थ एकः ॥ ७४ ॥

द्वेषव्यक्तिरिति । द्वेषः क्रोधः । एवं सुखादावपीति द्रष्टव्यम् ॥ ७४ ॥

तर्हि शरीरादीनामेकस्यात्मनो भोगसाधनत्वे सर्वेष्वपि शरीरेषु तस्य भोक्तृत्वादिकमापतितमित्याशङ्क्य तस्य सर्वशरीरेष्वपि साक्षितयैकरूपत्वात्तत्सन्निधिबलायातचेतनभावबुद्ध्यादेरेव कर्तृत्वादिसंसारः । तदविवेकादात्मन्यपि सोऽविवेकिभिरारोप्यते बालैरिव

शुद्धेऽप्याकाशे तलमालिन्यादि न तु वस्तुतः संसारोस्तीत्युपसंहरति—

एवं सतीदमविवेकनिबन्धनं ते
कर्तृत्वमात्मनि विभाति न वस्तुभूतम् ।
बालेन कल्पितमतीव विशुद्धरूपे
व्योम्नीव भूम्नि मलिनत्वमबोधहेतोः ॥ ७५ ॥

एवं सतीति । आत्मनः सर्वशरीरेष्वेकरूपतया साक्षित्वे सतीत्यर्थः । अविवेकनिबन्धनं बुद्ध्याद्यविवेकहेतुकं ते आत्मनि तव स्वरूपभूते प्रत्यगात्मन्यतीवविशुद्धरूपे व्योम्नि मलिनत्वमिव भूम्नि व्योम्नि परिच्छिन्नत्वमिवेति शेषः । नन्वात्मनो देहादिव्यतिरेके सिद्धे तत्साक्षित्वादिकमुक्तं सिद्ध्यति तदेव तु न सिद्ध्यति तत्र प्रमाणाभावात् प्रत्युत ब्राह्मणोहमित्यादिरूपेणात्मबुद्धेर्देहादिविषयत्वमेव दृश्यते ततः कथमात्मनो नित्यमुक्तत्वं प्रत्युत देहादिव्यतिरेकासिद्धौ कर्तृत्वादिकमप्यात्मन एवापतितमिति गतं सर्वं गजशौचमिति चेन्न । देहादिकं स्वव्यतिरिक्तद्रष्टृकं दृश्यत्वाद्धटवदित्यनुमानेन तद्व्यतिरेकस्यापीह विवक्षितत्वात् । ब्राह्मणोहमित्यादिप्रतीतेश्च तादात्म्याध्यासनिमित्तत्वात् । न चाप्रयोजको हेतुः । उक्तसाध्याभावे जडदेहादिप्रकाशकाभावेन तदसिद्धिप्रसङ्गात् । देहादेः स्वस्वव्यापारे प्रवृत्त्यनुपपत्तेश्च । तस्मात् देहादेरेव कर्तृत्वादिकं नत्वात्मन इति भावः ॥७५॥

ननु देहादिव्यतिरिक्तचैतन्याभावे देहादिप्रकाशकाभावेन तदसिद्धिप्रसञ्जनं स्वव्यापारे प्रवृत्त्यनुपपत्त्यापादनं चायुक्तमादित्यादेस्तत्प्रकाशकस्य विद्यमानत्वादित्याशङ्क्याह—

बाह्यैरसौ रविनिशाकरवह्निवाग्भि-
र्ज्योतिर्गणैरुपकृतोऽपि हि कर्मजातम् ।

निर्वर्त्तयन्न खलु तावकमन्तरेण
चैतन्यसन्निधिबलं पुरुषः करोति ॥ ७६ ॥

बाह्यैरिति । असौ कार्यकरणोपाधिकः पुरुष इति सम्बन्धः । वाक्शब्दः ज्योतिर्गणैरुपकृतः ज्योतिर्गणैः प्रयुक्तः प्रकाशलक्षणोपकारवानपीत्यर्थः । कर्मजातं लौकिकवैदिकलक्षणं निर्वर्त्तयन्नपीत्यनुषज्यते । तावकं त्वत्स्वरूपभूतं चैतन्यसन्निधिबलं चैतन्यसन्निधिलक्षणं बलमन्तरेण विना न करोति कर्त्तुं न शक्नोतीत्यर्थः । यद्यपि शरीरः पुरुषः सूर्यादिबाह्यज्योतिर्गणैः प्रयुक्तप्रकाशलक्षणोपकारवान् सर्वकर्म निर्वर्त्तयन्नपि दृश्यते तथापि बाह्यज्योतिर्व्यतिरिक्तत्ववत् स्वरूपान्तरज्योतिर्विना पुरुषेण कर्म कर्त्तुमशक्यमेव बाह्यज्योतिर्भिस्तमोविरोधिलक्षणप्रकाशजननेऽप्यान्तरज्योतिर्विनाऽविद्याविरोधिलक्षणचैतन्याख्यप्रकाशाजननात् तादृशप्रकाशस्य च प्रवृत्तौ कारणत्वात् । ननु वाग्ज्योतिषस्तमोविरोधिलक्षणप्रकाशहेतुत्वादविद्याविरोधिप्रकाशहेतुत्वमेवेति न तदर्थमप्यान्तरज्योतिरपेक्षेति चेन्न हि वाक्साक्षादविद्याविरोधिप्रकाशहेतुर्जडत्वात् किन्तु चैतन्याभिव्यञ्जकवृत्त्युत्पादनेनैव ततस्तद्व्यतिरिक्तं चैतन्यज्योतिरवश्यमङ्गीकार्यमेवेति भावः ॥ ७६ ॥

ननु पुरुषस्य ज्योतिर्द्वयोपकृतस्यैव स्वव्यापारे प्रवृत्तौ स्वप्नेऽपि बाह्यज्योतिरपेक्षा स्यात् अविशेषात् । तथा च स्वप्ने चैकेन ज्योतिषोपकारसिद्धौ जाग्रत्यपि बाह्यज्योतिषैव तत्सिद्धिरिति न व्यतिरिक्तचैतन्यापेक्षेत्याशङ्क्याह—

ज्योतिर्द्वयान्तरित एव हि कर्मजातं
सर्वं करोति पुरुषोऽन्नमयः सदैव ।
कर्मादिकारणविनिर्मितमस्य बाह्यं
ज्योतिस्त्वनित्यमनिमित्तकमान्तरं चित् ॥७७॥

ज्योतिर्द्वयेति । बाह्याभ्यन्तरलक्षणज्योतिर्द्वयव्याप्तः अन्नमयः स्थूलदेहोपाधिकः पुरुषो हि शारीरः कर्मजातं कुर्वन् चक्षुरादिकरणमुपादायैव प्रवर्त्तत इतिज्योतिर्द्वयोपकृत एव करोति । उभयज्योतिः प्रयुक्तोपकारस्य जागरणे संभवात् । विज्ञानमयस्तु पुरुषः स्वप्ने कर्मजातं कुर्वन् चक्षुरादिकरणमनुपादायैव प्रवर्त्तते तस्य तत्रोपरमात् । तथा च विज्ञानमयस्य स्वावभासकान्तरज्योतिरपेक्षायामपि न बाह्यज्योतिरपेक्षा तत्कृतोपकाराभावादित्यर्थः । ननूपकाराभावेन स्वप्ने बाह्यज्योतिषोऽनपेक्षेत्ययुक्तं बाह्यज्योतिषोपि जाग्रति प्रवृत्तिकारणत्वेन स्वप्नेपि तस्यावश्यकत्वे यस्य कस्य चिदुपकारस्य वक्तुं शक्यत्वादित्याशङ्क्य बाह्यं हि ज्योतिरन्नमयपुरुषादृष्टेनैवोपार्जितमिति तस्यैवोपकरोति न तु विज्ञानमयस्यापि तददृष्टानुपार्जितत्वादित्यभिप्रेत्याह—कर्मादीति । अस्यान्नमयपुरुषस्य कर्मादि कारणविनिर्मितमिति सम्बन्धः । आदिशब्देनाविद्यालक्षणं कारणमुच्यते । कर्मादिविनिर्मितत्वादेवानित्यं तर्ह्यान्तरज्योतिरपि तथैवेति विज्ञानमयस्यान्तरज्योतिःसम्बन्धोपि न भवेदित्याशङ्क्यान्तरज्योतिषो नित्यसिद्धत्वेन कर्मोपार्जितत्वाभावात् साधारण्यमेवेत्यभिप्रेत्याह—अनिमित्तकमिति। कर्माद्यजन्यमित्यर्थः । आन्तरं ज्योतिरित्यनुषज्यते तस्य स्वरूपं विविति ॥ ७७ ॥

ननु भवतु नाम बाह्यज्योतिरन्नमयकर्मोपार्जितं तत्कृतोपकारो विज्ञानमयस्यापि किन्न स्यात् न हि स्वेन प्रतिष्ठितो दीपः स्वस्यैवोपकरोतीत्याशङ्क्य विज्ञानमयस्य बाह्यज्योतिःप्रयुक्तोपकारस्य कस्यापि वक्तुमशक्यत्वान्मैवमित्यभिप्रेत्याह—

श्रोत्रादिजन्यमतिवृत्तिषु बाह्यशब्दा-

द्यर्थाकृतिर्विशति कर्मवशेन कर्त्तुः ।

बोधाकृतिस्तु तव सन्निधिमात्रहेतु-
र्धीवृत्तिषु प्रविशति स्वरसेन नित्यम् ॥ ७८ ॥

श्रोत्रादीति । श्रोत्रादीन्द्रियजन्या या मतिवृत्तयो बुद्धिवृत्तयस्तासु शब्दाद्यर्थाकृतिः शब्दरूपाद्यर्थाकारः प्रविशति प्रतिबिम्बतीत्यर्थः । कर्त्तुरन्नमयपुरुषस्य कर्मवशेनादृष्टवशेन। एतदुक्तं भवति । श्रोत्रादीन्द्रियाणां बाह्यशब्दादिभिः सम्बन्धात् पुरुषस्यादृष्टवशेन या बुद्धिवृत्तयो भवन्ति तास्वेव शब्दद्याकृतिप्रवेशो भवति नान्यासु तादृशस्य च वाग् ज्योतिषः स्वाकारवृत्तिप्रवेश एवोपकारः । आदित्यादिज्योतिषस्तु चक्षुरादिजन्यस्वाकारवृत्तौ प्रवेश एवोपकारः । रूपाकारवृत्तौ च तमोनिवृत्तिरेवोपकारः । स्वप्ने चेन्द्रियादीनामुपरतत्वात् तत्सम्बन्धजन्यवृत्तिर्नास्तीति न बाह्यज्योतिः कृत उपकारः सम्भवतीति । न च प्रदीपदृष्टान्तोऽत्र युक्तः कर्मणां प्रतिनियतफलत्वेन सामान्यतो दृष्टन्यायस्यात्राप्रवृत्तेरित्यर्थः । आन्तरज्योतिरुपकारस्तु नैवं कर्मादिनिमित्तः किन्तु स्वाभाविक एव तस्य बोधव्याप्तिरूपस्य तत्सन्निधिमात्रायत्तत्वादिन्द्रियद्वारानपेक्षणादित्याह—बोधाकृतिरिति । बोधस्वरूपं स्वरसेन स्वभावतः ॥ ७८ ॥

नन्वान्तरज्योतिरुपकारोऽप्यागन्तुक एव वृत्तेरागन्तुकत्वेन तत्र चैतन्यप्रतिफलनस्याप्यागन्तुकत्वस्यावश्यंभावात् ततस्तस्य कर्माधीनत्वमपि स्यात् तथा च तदुपकारः स्वप्ने न भवेदित्याशङ्क्य दृष्टान्तमुखेनागन्तुकत्वाभावमाह—

स्वाभाविकी हि वियदन्वितता घटादेः
क्षीरादिवस्तुघटना पुनरन्यहेतुः ।
एवं धियामपि चिदन्वितताऽनिमित्ता
शब्दादिवस्तुघटना खलु कर्महेतुः ॥ ७९ ॥

स्वाभाविकीति । घटादेः वियदन्वितता आकाशसम्बन्धिता स्वाभाविकी स्वानन्तरभाव्यागन्तुककारणानपेक्षत्वात् क्षीरादिवस्तुघटना पुनः क्षीरादिपदार्थसम्बन्धस्त्वन्यहेतुः आगन्तुकः स्वानन्तरभाव्यागन्तुककारणापेक्षत्वात् एवं घटादेरिव धियां बुद्धिवृत्तीनामपि चिदन्वितता चैतन्यव्याप्तताऽनिमित्ता स्वाभाविकी शब्दादिवस्तुघटनाशब्दादेर्ज्योतिः सम्बन्धः कर्महेतुः कर्महेतुक इत्यर्थः। यथा लोके घटस्य वियता सम्बन्धः घटोत्पत्त्यनन्तरभाविकारणानपेक्षत्वाद् धूमस्येव वह्निना सम्बन्धः स्वाभाविक इति प्रसिद्धः क्षीरादिसम्बन्धस्त्वागन्तुककारणापेक्षत्वात् वह्नेरिव धूमसम्बन्ध आगन्तुक इति प्रसिद्धः। एवं बुद्धिवृत्तेरागन्तुकत्वेपि तस्याः सर्वगतान्तरज्योतिषः प्रतिफलनरूपः सम्बन्धः वृत्त्यनन्तरभाविकारणान्तरानपेक्षत्वात् स्वाभाविक एव बाह्यज्योतिःसम्बन्धस्त्विन्द्रियाद्यपेक्षत्वादागन्तुक एव। न च वृत्तौ सत्यां बाह्यज्योतिः सम्बन्धस्यापि नान्यापेक्षेति वाच्यम्। स्वप्नाकारेणात्मना स्थितायामपि तस्यामिन्द्रियादिविरहेण तद्दर्शनादान्तरज्योतिःसम्बन्धस्य तदापि वृत्तिमदन्तःकरणसाक्षित्वेन सत्त्वात्। किंच जाग्रत्यपि सत्यामेवान्तःकरणवृत्तौ शब्दाद्युपकारसमये आदित्याद्युपकारो न दृश्यते अस्ति तु तदाप्यान्तरज्योतिरुपकार इति स स्वाभाविक एव अतो न स्वप्ने तदभावप्रसङ्ग इत्यर्थः। तस्मादन्नमयादेरप्यनुग्राहकत्वेन तद्व्यतिरिक्तचैतन्यात्मनो वक्तव्यत्वात् न तस्य कर्तृत्वादिकमिति भावः॥ ७९॥

नन्वेवमात्मनः कर्तृत्वभोक्तृत्वाभावेपि प्रमाणफलाश्रयत्वं वक्तव्यम् अन्यस्याभावात् नचान्तःकरणं तदाश्रयो भवितुमर्हति तस्य जडत्वेन प्रमित्याश्रयत्वानुपपत्तेस्तथाचात्मनो विकारित्वं प्राप्तमित्याशङ्क्याह—

संवेदनं यदिह मानफलं प्रसिद्धं
तच्च प्रमातरि विकारिणि निष्ठितं नः ।
तस्य प्रमातुरपि साक्षितयाऽन्तरात्मा
सर्वस्य तिष्ठति भवानविकाररूपः ॥ ८० ॥

संवेदनमिति । संवेद्यतेऽनेनेति सम्वेदनं प्रमा । इह व्यवहारभूमौ मानफलं चक्षुरादिप्रमाणफलं प्रमातरि चित्तादात्म्यमापन्नायां बुद्धौ यद्यप्यन्तःकरणं केवलं जडं तथापि चैतन्यव्याप्तं सत्प्रमाणफल-प्रमित्याश्रयो भवत्येव । न च स्वरूपज्ञानस्य प्रमाणफलत्वं येन तदा-श्रयत्वमन्तःकरणस्यानुपपन्नं स्यात् । तस्यानादिसिद्धत्वेन प्रमाण-फलत्वाभावात् । तथा च प्रमाणफलं बोधव्याप्तवृत्तिरूपं ज्ञानं बोध-तादात्म्यापन्नान्तःकरणे विकारिण्येव वर्त्तते न केवलत्वमपि अतो न कथमपि तव विकारित्वमित्यर्थः । किं तर्हि केवलस्य चैतन्यस्य कृत्यं यदि बुद्ध्यादिरेव प्रमाता कर्त्ता भोक्ता च भवेदित्याशङ्क्य तत्स-त्तास्फूर्तिप्रदत्वमेवेत्याह-तस्येति । न केवलं प्रमाणफलाश्रयस्य प्रमातुरेव सत्तास्फूर्तिप्रदं किन्तु सर्वस्यापीत्याह—सर्वस्येति । साक्षित्वेनावस्थान-फलमाह—अविकाररूप इति । यथा लौकिकस्साक्षी स्वसाक्ष्यपुरुषादिग-तव्यापारजातं स्वासने स्थित्वाऽविकार्येव पश्यति एवमन्तरात्मापि स्वमहिम्नि सच्चिदानन्दरूपे स्थित्वैव सर्वं पश्यति अतोऽयमविकार्ये-वेत्यर्थः ॥ ८० ॥

ननु तर्ह्यात्मनि कर्तृत्वादिप्रत्ययो न स्यात् न हि लौकिकं साक्षिणं तत्कर्त्तेति कश्चिद्व्यपदिशतीति चेन्न—बुद्ध्याद्यविवेकेन तदुपपत्तेरित्याह—

कर्त्रादिसन्निधिबलेन तवापि कर्तृ-
भोक्तृप्रमातृवपुरापतति भ्रमेण ।
तद्बुद्धिसंश्रयमनात्मगतं प्रतीचि
शुद्धेऽपि पश्यसि तमःपटलावृताक्षः ॥८१॥

कर्त्रादीति । तवाप्यविकारिकूटस्थासङ्गचैतन्यस्वभावस्यापीत्यर्थः । कर्तृभोक्तृप्रमातृवपुः भ्रमेणापतति प्राप्नोति । उक्तमेव स्पष्टयति—तद्बुद्धिसंश्रयमिति । त्वं तमःपटलावृताक्षः तमसावृतासङ्गानन्दस्वरूपचैतन्यः सन् शुद्धेऽपि प्रतीचि तद्बुद्धिसंश्रयं धर्मिणोस्तादात्म्यबुद्धिनिमित्तकमनात्मगतबुद्ध्यादिगतं कर्तृत्वादिकं पश्यसि तादात्म्याध्यासवशाद्बुध्यादिगतमपि त्वयि पश्यसीत्यर्थः ॥ ८१ ॥

एवमात्मनः कर्तृत्वाद्यवभासकत्वान्न तद्धर्मकत्वमात्मन इत्युक्तम् । इदानीं कर्तृत्वादेर्दृश्यत्वात् द्रष्ट्रात्मधर्मत्वं नास्तीत्यनुमानेन साधयति—

कर्तृत्वादि च दृश्यवर्गपतितं द्रष्टुः स्वभावः कथं
संभाव्येत तव प्रसन्नविमलस्वच्छप्रकाशात्मनः ।
यद्यद् दृश्यतया जगत्यभिमतं सर्वस्य तत्तद्भवेद्-
दूरं द्रष्टुरिति प्रसिद्धमखिलं भूभृत्समुद्रादिकम् ॥८२॥

कर्तृत्वादि चेति । द्रष्टुः प्रसन्नविमलस्वच्छप्रकाशात्मनस्तवेति सम्बन्धः । स्वभावो धर्मः कथं सम्भाव्येत न कथमपीत्यर्थः । अनुमानोपयोगितया सोदाहरणं व्याप्तिमाह—यद्यदिति । जगति यद्यत् दृश्यतया दृश्यत्वेन सर्वस्य सर्वजनस्याभिमतं तत्तदखिलं भूभृत् समुद्रादिकं द्रष्टुर्दूरं न धर्मो भवेदिति प्रसिद्धमिति सम्बन्धः । तथा

चेदमनुमानं कर्तृत्वादिकमात्मधर्मो न भवति दृश्यत्वात् भूभृदादिवदिति विवक्षितम् ॥ ८२ ॥

तदेवमात्मानात्मनोर्द्रष्टृदृश्यादिभावमाश्रित्य "आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येति" इति [बृ० ४।३।६] श्रुतिगत्यनुरोधेन न्यायतश्च कर्तृत्वादिप्रहाणेन विशुद्धचिज्ज्योतिरात्मेति दर्शितम् । इदानीमागमापाये तदन्वयव्यतिरेकपरं स यत्र प्रस्वपितीत्यादिवाक्यमादायात्मशुद्धिमाह—

एतस्माच्च न जाग्रतस्तव भवेत्स्वाभाविकी कर्तृता
यद्येषा स्वत एव किं न भवति स्वप्नेऽपि ते तिष्ठतः ।
यत्स्वप्ने परिपश्यसि त्वमखिलं त्वन्मायया निर्मितं
कर्तृत्वादि न सत्यमत्र घटते कार्त्स्न्यानभिव्यक्तितः॥८३॥

एतस्मादिति । एतच्छब्दार्थमेवागमापायित्वमाह—यदीति । यद्येषा कर्तृता जाग्रतस्तव स्वतः स्वाभाविक्येव स्यात् स्वप्नेपि तिष्ठतस्तव चैतन्यवत् सा तथा किं न स्यात् स्वरूपस्य तदानीमपि भावात् । ततः कर्तृत्वादेरागमापायरूपत्वेन व्यभिचारात् त्वद्रूपस्य चावस्थात्रयानुयायित्वात् रज्जुसर्पवन्न तत्र कर्तृत्वादिकं वास्तवमित्यर्थः । ननु स्वप्नेपि जाग्रतीव कर्तृत्वादिव्यवहारो दृश्यते तत्कथं कर्तृत्वादेरागमापायित्वमित्याशङ्क्य स्वप्ने कर्तृत्वादिव्यवहारस्य मायामात्रत्वेन जाग्रद्विलक्षणत्वान्मैवमित्याह—यदिति । यत् रथादिकं स्वप्नदृष्टरथादेर्मायिकत्वे सौत्रं हेतुमाह—कार्त्स्न्येति । स्वोचितकारणेनाजन्यत्वादित्यर्थः । न हि स्वप्नद्रष्टुः स्वप्नदृष्टरथादिनिर्माणोचितकारणमस्ति । अतस्तदभावेपि जायमानत्वात् तन्मायिकमित्यर्थः । फलितमाह—कर्तृत्वादीति । अत्र स्वप्ने ॥ ८३ ॥

सूत्रस्थकार्त्स्न्यपदस्यार्थान्तरमाह—

कार्त्स्न्यं हीष्टमबाधनं न खलु तत्स्वप्नस्य जाग्रद्धिया
बाधाद्बाधितमेव सत्यमिति चेन्नैवं विरोधान्मिथः ।
सत्यत्वे न हि बाधितत्वघटना बाधे च सत्यं कुतः
सत्यं बाधितमित्यतीव पदयोः सम्बन्धिता दुर्घटा ॥८४॥

कार्त्स्न्यमिति । अबाधनं बाधाभावः । तथा चाबाध्यत्वेनानुत्पन्नत्वात् बाधितत्वादिति सौत्रहेतोरर्थः । नचासिद्धिरित्याह-न खल्विति । तदबाधनं स्वप्नस्याबाधाभावे सर्वानुभवं प्रमाणयति—जाग्रद्धियेति । जाग्रद्बोधेन बाधदर्शनादित्यर्थः । बाधितमपि तत्सत्यमेवेति कश्चित्तन्मतमनूद्य निराकरोति—बाधितमिति । बाधितमपि सत्यमेवेति चेन्नैवं मिथो विरोधात् । बाधितत्वसत्यत्वयोः परस्परं विरोधादित्यर्थः । विरोधमेव स्पष्टयति—सत्यत्व इति । बाधितत्वघटना बाधितत्वसंभवः । वस्तुनो बाधे च तद्वस्तु कुतः सत्यं स्यात् न कुतोपि तयोः परस्पराभावनियतत्वादित्यर्थः । बाधितं सत्यमिति पदप्रयोगोपि व्याहतत्वान्न संभवतीत्याह—सत्यमिति । सत्यं बाधितमितिपदयोः सम्बन्धिता समानाधिकृतता अतीव दुर्घटा दुरुपपादा व्याहतेरित्यर्थः । सत्यपदस्य लोके बाधानर्हे व्युत्पन्नत्वाद्बाधितपदस्यानृत एव व्युत्पन्नत्वादिति भावः ॥ ८४ ॥

ननु सूत्रकारो मायामात्रं त्विति स्वप्नस्य मायिकत्वं दर्शयन् तस्य वास्तवत्वमेव मनुते अन्यथा अविद्यामात्रमित्येवासूचयिष्यदित्याशङ्क्य सूत्रकारस्याविद्यामयेपि स्वप्ने मायिकत्ववचनं न तस्य वास्तवत्वाभिप्रायं तथात्वे बाधितं स्वप्नं वास्तवं बोधयतस्तस्यानाप्तत्वप्रसङ्गात् किन्त्वज्ञानस्यैव मायात्वज्ञापनाय तदपि प्रपञ्चो

नाविद्यात्मकः किन्तु सर्वसाधारणेश्वरमायामय एवेति मन्दबुद्धिभिः सत्यत्वेनाभिमतप्रपञ्चस्याविद्यात्मकत्वेन ज्ञाननिवर्त्यत्वं दर्शयितुमित्यभिप्रेत्य मायाविद्ययोरेकत्वसाधनमुखेन जाग्रतोप्याविद्यकत्वं साधयाम इति प्रतिजानीते—

मायामेनां जागरे लोकसिद्धा-
मुक्त्वा तद्वत्स्वप्नमायां विविच्य ।
शक्तिव्याप्ती तत्र सिद्धे गृहीत्वा
मायासिद्धं जागरं साधयामः ॥ ८५ ॥

मायामिति । लोकसिद्धां लौकिकमायिकहस्त्याद्युपादानत्वेन सिद्धामित्यर्थः । उक्त्वा अविद्यात्वेन प्रतिपाद्येत्यर्थः । तद्वत् लौकिकमायावत् स्वप्नमायामपि विविच्याविद्यात्वेन प्रदर्श्य तत्राविद्यात्वेन निर्णीतयोः लौकिकस्वप्नमाययोः सिद्धे प्रसिद्धे शक्तिव्याप्ति गृहीत्वा मायापदशक्तिं मायामयत्वव्याप्तत्वेनाभिमतलिङ्गानां दृश्यत्वजडत्वादीनामविद्यामयत्वव्याप्तिं च वृद्धप्रयोगसहचारदर्शनाभ्यां गृहीत्वा सिद्धे मायात्वेन सिद्धे तत्राज्ञान इति वा माया सिद्धं सर्वसाधारणेश्वरमायामयत्वेनाभिमतं जागरं जाग्रत्प्रपञ्चं मायात्वेन मायाशब्दप्रयोगेण दृश्यत्वाद्यनुमानेन चाविद्यात्मकत्वेन साधयाम इत्यर्थः ॥ ८५ ॥

तत्रादौ लौकिकमायायाः स्वरूपं निर्धारयन् तस्या अविद्यातिरिक्तत्वं निषेधति—

लोके हि मायाधिगता न माया
तमोऽरिक्ताऽस्ति निरूप्यमाणा ।

व्याप्तिश्च शक्तिश्च निरूप्यमाणा

भविष्यतीहैव तु नेतरत्र ॥ ८६ ॥

लोके हीति । लोके मायाविगता मायाविगतत्वेन प्रसिद्धा-या माया सा निरूप्यमाणा विचार्यमाणा तमोऽतिरिक्ता नास्ति द्रष्टृ-विद्यातिरेकेण निरूपयितुं न शक्यत इत्यर्थः । ननु किमिति न शक्येत मायाशब्देनाविद्यातिरिक्तवस्तुनः प्रतिपादनात् सर्वं दृश्यमानत्वलिङ्गेना-विद्यातिरिक्तत्वानुमानाच्चेत्यत्राह व्याप्तिरिति । सर्वदृश्यत्वादेर्व्याप्तिः मायापदशक्तिशब्दश्चेहैव अविद्यायामेव भविष्यति नेतरत्राऽवि-द्याव्यतिरिक्तवस्तुनीत्यर्थः । दृश्यत्वस्याविद्यामयत्वेन व्याप्यत्वात् सर्वदृश्यत्वमपि तेन व्याप्तं भवत्येव न हि संभवति धूमो वह्नि-व्याप्यो नीलधूमस्तु तद्व्याप्यो न भवतीति शक्तिश्चाविद्यायामेवेति वक्ष्यत इति भावः ॥ ८६ ॥

ननु लोके मन्त्रादियुक्त एव पुरुषे मायाविशब्दप्रयोगो दृश्यते न हि मन्त्रादिरविद्या भवति अतोऽविद्याव्यतिरिक्तैव मायेत्या शङ्क्याह —

मायाविनो न मणिमन्त्रमथौषधं वा

मायेति शक्यमिह वर्णयितुं कुतश्चेत् ।

सत्यं हि तत्सकलमिष्टमियं त्वसत्या

माया ततोऽन्यदिह किंचन वर्णनीयम् ॥ ८७ ॥

मायाविन इति । मणिश्च मन्त्रश्च मणिमन्त्रमिति समाहारद्वन्द्वः औषधं मूलिकाविशेषः मायाविनो मणिमन्त्रौषधं वा मायेति वर्ण-यितुं न शक्यं मण्यादीनां प्रत्येकमननुगमादित्यर्थः । दूषणान्तराभि-धित्सया पृच्छति — कुतश्चेदिति । विरोधादित्याह सत्यं हीति । हि यतः

तन्मन्त्रादिकं सकलं सत्यमिष्टमियं माया तु असत्याऽप्रसिद्धा अतः सत्यासत्ययोः परस्परविरोधान्न मण्यादिकं माया भवति। ततश्चा-न्यन्मण्यतिरिक्तमेव किञ्चिन्मायाशब्दवाच्यं वर्णनीयमित्यर्थः। ननु सत्यस्यैव मण्यादेर्मायाशब्दवाच्यत्वं भवतु न चासत्यवाचक मायापदवाच्यत्वं सत्यस्यानुपपन्नमिति शङ्क्यम्। मायापदस्यासत्य वाचकत्वेनाद्याप्यकल्पनात्। किंच ज्ञायमानेऽर्थे तद्वाचकशब्दप्रयोगो वृद्धानां न च मायाविगतं मन्त्राद्यतिरिक्तं किंचित्पार्श्वस्थेनानुभूयते यन्मायापदवाच्यं स्यात्। नन्वनुमानेन ज्ञायत इति चेन्न—अनुमान स्य कारणमात्राविषयस्योभयसिद्धमन्त्रादिविषयत्वेनार्थान्तरत्वात्। न च मन्त्राद्यतिरिक्तमायाकार्यत्वं कार्यस्यानुमीयत इति वाच्यम्। व्याप्तेरसिद्धेः न चार्थापत्त्या तत्परिज्ञानम् अन्यथाप्युपपत्तेः। नापि शब्दा च्छक्तेरद्याप्यनिरूपणात् ततः कथमियं त्वसत्येति। मायाया असत्यत्वं सिद्धवत्कृत्य मन्त्राद्यतिरिक्तत्वमुच्यते इति चेदुच्यते न तावन्मा-याशब्दस्य मन्त्रादिवाचकत्वं संभवति। अननुगमादित्युक्तम्। एकार्थत्वे संभवत्यनेकार्थकल्पनायोगाच्च। न च मन्त्राद्यतिरिक्तमायाया अननु-भूयमानत्वात् तच्छब्दप्रयोगानुपपत्तिः। अनुमानेनैव तज्ज्ञानात्। तथा हि वृद्धादीनां हि न केवलमण्यादियुक्ते पुरुषे मायाविशब्दप्रयो-गोस्ति। हस्त्यादिमिथ्यावस्तुदर्शनविरहदशायां मान्त्रिकत्वादिना हि न केवलमण्यादियुक्ते पुरुषे मायाविशब्दप्रयोगोस्ति। हस्त्यादि-मिथ्यावस्तुदर्शनविरहदशायां मान्त्रिकत्वादिना परिज्ञातेपि पुरुषे तच्छब्दप्रयोगादर्शनात् न हि गायत्रीं शिवं हरिं वा भजन्तं वज्रवैदूर्या-दिखचिताङ्गुलीयकादियुक्तं दशमूलकषायादिपरिज्ञानिनं वा माया-वीति व्यवहरन्ति। ननु मन्त्रादिविशेष एव मायाशब्दवाच्य इति चेन्न। तद्विशेषस्य मिथ्यावस्तुकार्यदर्शनं विना दुर्ज्ञेयत्वात् तर्हि तेनैव तज्ज्ञायत इति चेन्न। आवश्यकमिथ्यावस्तुदर्शनेनानुमेयस्य कारणस्य मिथ्यत्वेनैवानुमितत्वात्। मन्त्रादेश्च सत्यत्वेन तथानुमाना-

संभवात्। तस्मान्मिथ्यावस्त्वेव लोके मायापदवाच्यमिति इयं मिथ्याभूतगजादिकारणत्वेनानुमिता माया असत्येति मायाया असत्यत्वं सिद्धवत्कार उपपन्न इति भाव ॥ ८७ ॥

ननु मायाविनो मन्त्राद्याहितं गजादिविभ्रमानुगुणं किञ्चित्सामर्थ्यमस्तीति वक्तव्यम्। असमर्थस्य विभ्रमहेतुत्वानुपपत्तेः। तथा च सामर्थ्यमेव मायापदवाच्यमित्याशङ्कामनुवदति—

सामर्थ्यमस्य मणिमन्त्रनिमित्तमस्ति
माया भविष्यति जनभ्रमहेतुरेषा।
इत्युच्यते यदि तदप्यतिफल्गु कस्मात्
सामर्थ्यमप्यवितथं हि तदिष्टमस्य ॥ ८८ ॥

सामर्थ्यमिति। अस्य मायाविनः मणिमन्त्रनिमित्तमिति बहुव्रीहिः अस्य मणिमन्त्रनिमित्तं जनभ्रमहेतुर्यत्सामर्थ्यमस्ति एषा माया भविष्यतीति उच्यते यदीति सम्बन्धः। मन्त्रादेर्मायात्वपक्षोक्तदोषस्यात्रापि संभवादिदमप्यसाध्वित्याह—तदप्यतिफल्गिवति। अतितुच्छमित्यर्थः। तदेव दूषणमाकाङ्क्षापूर्वकमाह—तस्मादित्यादिना। अस्य मायाविनः तन्मन्त्रादिनिमित्तं सामर्थ्यमपि अवितथं सत्यं हि यतः अत इत्यर्थः। एतदुक्तं भवति। मन्त्राद्याहितं सामर्थ्यं न तावदसत्यं भवितुमर्हति असत्यादसत्यजन्मानुपपत्तेः अविद्यातो व्यतिरेकाभावप्रसङ्गाच्च। अविद्याव्यतिरिक्तासत्यवस्तुनि मानाभावात् सत्यत्वे तस्य गजादिविभ्रमेणानुपस्थितत्वात् उपस्थापकान्तराभावाच्च शक्यभेदेन शक्तिभेदादननुगमाच्च न तस्य मायापदवाच्यत्वमिति ॥ ८८

यत्तु कश्चिन्मायाविनो मन्त्राद्यनाधेयशक्तिविशेष एव मायेत्याह तदपि विकल्पासहत्वेन दूषयति—

न च शक्तिरस्थि सहजा यदि वा
जनिताऽस्ति केनचिदिति ब्रुवतः ।
परिपुष्कलं स्वमतनिर्वहणं
भवितुं क्षमं तदनिरूपणतः ॥ ८९ ॥

न चेति । सहजा शरीरेण सहोत्पन्ना केनचिदुपदेष्टृपुरुषेण जनितोत्पादिता परिपुष्कलं सम्पूर्णं समीचीनमित्यर्थः । स्वमतनिर्वहणं स्वमतनिर्वाहः सा शक्तिः किं सहजा उत केनचित्कृतोभयथाप्येवं ब्रुवतः स्वपक्षनिर्वाहः समीचीनो न भवेदित्यर्थः । तत्र हेतुमाह—तदनिरूपणत इति । सहजत्वादेरनिरूपणादित्यर्थः ॥ ८९ ॥

सहजत्वपक्षे दुर्निरूपत्वमाह—

न च शुक्रशोणितसमागमने
न च गर्भशायिन इयं विदिता ।
न च मातृयोनिविवरादुदरा-
दपसर्पतो बहिरियं घटते ॥ ९० ॥

न च शुक्रेति । शुक्रशोणितसमागमने शुक्रशोणितसम्बन्धदशाया-मियं सहजशक्तिर्न घटते । गर्भशायिनः जरायुवासिनश्चेयं न विदिता । उदरादित्यवधौ पञ्चमी । मातृयोनिविवरादिति हेतौ पञ्चमी । अपसर्पतो निर्गच्छतः उदराद्बहिर्मातृयोनिद्वाराऽपसर्पतोपीयं न घटत इत्यर्थः । एतदुक्तं भवति । सहजातत्वं हि सहजत्वं तत्र कदा सहजन्म किं निषेक-काले शक्तेः शरीरेण जन्म । उत गर्भवासावस्थायाम् । अथवा मातु-रुदरात् बहिर्निःसरणवेलायाम् । न सर्वथापि सर्वशरीरेषु तस्या उपलम्भ प्रसङ्गात् । न हि साधारणकारणाज्जायमानायास्तस्याः शरीरविशेषेण सहोत्पत्तिः संगच्छत इति ॥ ९० ॥

न द्वितीयः उपदेष्टृपुरुषेण मन्त्रादिप्रदानव्यतिरेकेणान्यस्या-
करणात्तस्य च मायात्वाभावादित्याह—

मणिमन्त्रमौषधमितीदृशकं
विरहय्य नापरमिहार्पयति ।
पुरुषोऽपि कश्चिदत एवमियं
परतोऽपि नास्य घटनामटति ॥ ६१ ॥

मणीति । ईदृशकं वस्त्विति शेषः । अपरं मन्त्राद्यतिरिक्तं माया-
ख्यं वस्तु इह शिष्ये पुरुषो नार्पयति नादधाति पुरुषः उपदेष्टा अतः
यतो नार्पयति अतः एवं सहजत्ववदियं शक्तिरस्य मायाविनः
न घटनामटत्युत्पत्तिं न प्राप्नोतीत्यर्थः ॥ ६१ ॥

ननु यद्यपि शक्तिः सहजत्वादिरूपेण निरूपयितुं न शक्यते
तथापि प्रसिद्धत्वादेव लोके काचनमायाभ्युपेया । सा च मायावि-
शक्तिरेव भविष्यति मायायाः कार्यैकोन्नेयकारणधर्मत्वाच्छक्तेश्चैवं-
रूपत्वात् । न च शक्तेः सत्याया विभ्रमेणानुपस्थितत्वात्कथं माया-
पदप्रयोगस्तद्विषय इति वाच्यम् । सत्यत्वासत्यत्वाकारमनपेक्ष्य
भ्रमहेतुत्वाकारेण कार्यानुमितेन तस्या मायापदवाच्यत्वोपपत्तेरिति
शङ्कते—

अन्यस्य विभ्रमकरी पुरुषस्य शक्ति-
राकारमन्यमनपेक्ष्य मनीषिता चेत् ।
वाच्येह लौकिकजनव्यवहारभूमौ
मायागिरस्तदपि दुर्घटमिष्टहानेः ॥ ६२ ॥

अन्यस्येति । मायाविनोऽन्यस्येत्यर्थः । पुरुषस्य मायाविनः अन्यं भ्रमहेतुत्वादन्यमाकारमनपेक्ष्य समीक्षिता विभ्रमेणानुमिता सती इह लौकिकजनव्यवहारभूमौ मायागिरः मायापदस्य वाच्या चेत् । वाच्येत्यङ्गीक्रियते चेदित्यर्थः । तद् दूषयति— तददुर्घटमिति । किमेतदाचार्यमताननुसारिण एकदेशिनश्चोद्यम् । उत तदनुसारिणः । नाद्य इत्याह— इष्टहानेरिति । विभ्रमहेतुत्वेन कार्योन्नेयकारणत्वं काचादेश्च मायातिरिक्तदोषत्वमित्यादेरिष्टस्य हानेरित्यर्थः ॥ ६२ ॥

द्वितीये तु मायायाः सत्यत्वं भाष्यकृद्वचनविरुद्धमित्याह—

मायामयत्ववचनादखिलं मृषेति
यद्भाष्यकारवचनं तदसंगतं स्यात् ।
प्रत्यक्षमुत्सृजसि कारणमन्यदन्य-
द्यत्किंचिदानयसि कष्टमतः किमन्यत् ॥ ६३ ॥

मायामयत्वेति । अखिलं स्वप्नदृष्टं सर्वं मृषैव कुतः मायामयत्ववचनान्मायामात्रमिति सूत्रकारवचनादिति यद्भाष्यकारवचनं तदकारणमनर्थकं बाधितं स्यात् । मायायाः सत्यत्वे मायाकार्यस्य स्वप्नपदार्थस्य मृषात्ववचनानुपपत्तेरित्यर्थः । किञ्चाविद्याया भ्रान्त्युपादानस्य स्वात्मनि प्रत्यक्षत्वादज्ञानमेव मिथ्याहस्त्याद्युपादानं मायापदवाच्यमस्तु सामान्योपस्थितस्य त्यागायोगादनुपस्थितकल्पनायोगाच्चेत्यभिप्रेत्य पक्षद्वयसाधारणदूषणमाह—प्रत्यक्षमिति । प्रत्यक्षतोऽनुभूयमानं सामान्यतोदृष्टेनात्रापि प्राप्तमविद्याख्यं कारणमुत्सृज्यान्यदन्यच्छक्त्यादिकं यत्किंचित् भ्रान्तिकारणत्वायोग्यमानयसि कारणत्वेन प्रापयसि अतोऽन्यत्किं कष्टमित्यर्थः ॥ ६३ ॥

नन्वज्ञानस्य प्रत्यक्षेण प्रसिद्धावपि न मायायाः प्रसिद्धिस्तस्यास्ततोऽतिरिक्तत्वात् यतो जगन्निर्माणनिपुणपरमेश्वरशक्तिरेव श्रुतिस्मृतिभ्यां मायेत्युच्यते अत कथं प्रसिद्धिपरित्याग इत्याशङ्क्याज्ञानस्यैव परमेश्वरशक्तित्वात् तत्प्रसिद्धेरेवास्या अपि प्रसिद्धिरिति प्रसिद्धित्यागोऽस्त्येवेत्याह—

अज्ञानमेव च भविष्यति शक्तिरेषा
सर्वप्रपञ्चजननी परमेश्वरस्य ।
मायाश्रुतिस्मृतिवचोभिरुदीर्यमाणा
शक्तिग्रहो हि परविभ्रमहेतुशक्तौ ॥ ९४ ॥

अज्ञानमेवेति । नन्वज्ञानमेव मायेत्यनुपपन्नं यतो नाज्ञानिनि पार्श्वस्थे मायाविशब्दः प्रयुज्यत इत्याशङ्क्याज्ञान एव मायापदस्य शक्तिर्गृह्यते इत्याह—शक्तिग्रहोपीति । अज्ञानस्य हि द्वे शक्ती कार्यबलादवगम्येते प्रतिनियतविक्षेपविभ्रमजननी काचिदन्यसाधारणविभ्रमजननी काचित् ते च शक्ती साधारणासाधारणक्षोभकमण्यादिकाचादिदोषाभ्यामभिव्यज्येते । तत्रान्यसाधारणविभ्रमजनकशक्तिमत्यज्ञाने मायाशब्दव्युत्पत्तिर्गृह्यते न त्वसाधारणविभ्रमजनकशक्तिमति । तथाचाज्ञानमेव मायेति नानुपपन्नमिति भावः ॥ ९४

नन्विन्द्रो मायाभिः पुरुरूप ईयत इत्यादिना ब्रह्मणो बहुभवनसर्वज्ञत्वादौ मायायाः प्रयोजकत्वं श्रूयते । ततो लौकिकमायापदस्याज्ञानवाचकत्वेपि वेदे तस्य प्रसिद्धार्थसर्वज्ञादिपदसमभिव्याहारबलेनाज्ञानातिरिक्तमायायामेव व्युत्पत्तिर्वक्तव्या । स्वाश्रये व्यामोहहेतोरज्ञानस्य सर्वज्ञत्वाद्युपपादकत्वानुपपत्तेरित्याशङ्क्य निराकरोति—

न च प्रसिद्धार्थपदान्तराणां
प्रयोगसान्निध्यवशेन शक्तिः ।
ग्रहीष्यतेऽस्येति समञ्जसं स्या-
दलौकिके शब्द इदं हि युक्तम् ॥ ९५ ॥

न च प्रसिद्धेति । प्रसिद्धार्थपदान्तराणां सर्वज्ञादिपदानां प्रयोग-साम्निध्यवशेन समभिव्याहारबलेनास्य मायापदस्य शक्तिर्ग्रहीष्यत-इत्येतन्न समञ्जसं स्यादिति सम्बन्धः । तत्र हेतुः—अलौकिक इति । हिशब्दो हेतौ । यतः अलौकिके लोकाव्युत्पन्नशक्तिक एव यूपाहवनी-यादौ शब्दे इदं प्रसिद्धार्थसमभिव्याहारेण व्युत्पत्तिरित्येतद्युक्तमतो-मायाशब्दे तन्न समञ्जसमित्यर्थः । अज्ञानस्य हि साधारणासाधारण-विक्षेपशक्तिद्वयवदाश्रयभेदेन व्यामोहकाव्यामोहकत्वमप्यनुभवसिद्धं भूतसर्वज्ञत्वाद्युपपत्तिगृहीतं च कल्प्यते । धर्मिधर्मोभयकल्पनातोऽस्य लघुत्वात् । ततोऽज्ञानस्य स्वाश्रयभूतेश्वराधीनस्य तद्व्यामोहकत्वा-भावात् तेनैव तस्य सर्वज्ञत्वाद्युपपत्तिरिति भावः ॥ ९५ ॥

ननु मायाशब्दस्याप्यलौकिकत्वात् प्रसिद्धार्थपदसमभिव्याहारे णैव व्युत्पत्तिरित्याशङ्क्याह —

अयं तु मायेति न शब्द एव-
मलौकिको लौकिक एव तस्मात् ।
यदर्थवाची जगति प्रसिद्ध-
स्तमेव वेदेऽपि स वक्ष्यतीह ॥ ९६ ॥

अयन्त्विति । मायेत्ययंशब्दस्त्वलौकिको न भवति किन्त्वेवमुक्त-प्रकारेण लोकव्युत्पन्नत्वाल्लौकिक एव । ननु लोकव्युत्पन्नस्यापि वेदे-

ऽर्थान्तरे व्युत्पत्तिः किं न स्यादित्याशङ्क्य लोकवेदाधिकरणन्याय-विरोधान्नैवमित्याह—तस्मादित्यादिना । यतो मायाशब्दो लोकव्युत्पन्नस्त-स्मात् यदर्थवाची यस्य साधारणविभ्रमजनकशक्तिमदज्ञानस्य वाचको जगतिप्रसिद्धस्तं साधारणशक्तिमदज्ञानरूपमर्थमेवेह वेदे स माया-शब्दो वक्ष्यति । लोकवेदाधिकरणन्यायादित्यर्थः ॥ ९६ ॥

ननूद्भिच्चित्रादिशब्दानां लोके खननसाधनद्रव्यविशेषे वर्णविशेषे च योगवृत्याप्रसिद्धार्थानामप्युद्भिदा यजेत पशुकामः चित्रया यजेत पशुकाम इत्येवमादौ यजत्यर्थसामानाधिकरण्यादिनाऽलौकिककर्म-परत्वमवसीयते तत्कथं लोके व्युत्पन्नानां शब्दानां वेदे व्युत्पत्त्यन्तर-राहित्यमिति शङ्कते—

ननूद्भिदादेर्यदि नाम लोके
प्रसिद्धमर्थान्तरवाचकत्वम् ।
तथाऽपि भावार्थनिपीडितस्य
विजानते कर्मणि शक्तिमस्य ॥ ९७ ॥

ननूद्भिदादेरिति । उद्भिदादिपदस्येत्यर्थः । यदि नाम यद्यपीत्यर्थः । भावार्थनिपीडितस्य धात्वर्थसामानाधिकरण्येन संकुचितस्येत्यर्थः अस्य—उद्भिदादि पदस्य ॥ ९७ ॥

उद्भिदादिपदस्य अलौकिककर्मपरत्वमस्तीत्येतदङ्गीकरोति—

सत्यं न गत्यन्तरमस्ति तत्र
ततस्तथा निश्चितमत्र नैवम् ।
मायागिरोऽज्ञाननिवेदनेऽपि
न कदाचिदत्रानुपपत्तिरास्ति ॥ ९८ ॥

सत्यमिति । तर्हि तद्वन्मायापदस्यापि वेदेऽर्थान्तरे व्युत्पत्तिप्रसङ्गः । न वैषम्यादित्याह—न गत्यन्तरमिति । तत्रोद्भिदादौ ततः यतो गत्यन्तरं नास्ति ततस्तथाऽलौकिककर्मपरत्वेन युक्तं हि तत्रोद्भिदादिशब्दस्यालौकिककर्मपरत्वं गत्यन्तराभावात् । तथा ह्युद्भिदादिशब्दस्य वेदेऽपि लोकप्रसिद्धार्थत्वाश्रयणे किमेतद्वाक्यमुद्भिदादिगुणविधिपरं किं वा तद्विशिष्टयागविधिपरम् । नाद्यः । एकस्मिन्वाक्ये पश्वादिफलोद्देशेनापूर्वत्वाद्यागविधौ यागोद्देशेन गुणविधौ चाङ्गीकर्त्तव्ये यागस्य गुणविधिं प्रति साध्यतया प्राधान्यं सिद्धत्वनिर्देश्यत्वलक्षणमुद्देश्यत्वं ज्ञातज्ञायमानत्वलक्षणमनूद्यमानत्वं तथा फलं प्रति साधनत्वेन गुणत्वं प्राधान्यविरुद्धमुद्देश्यत्वविरुद्धमनुष्ठेयत्वमनूद्यमानत्वविरुद्धमज्ञातज्ञाप्यत्वलक्षणविधेयत्वं चेति विरुद्धत्रिकद्वयापत्तेः । न द्वितीयः—उद्भिद्वतेति मत्वर्थलक्षणाप्रसङ्गात् । तस्याश्चान्याय्यत्वात् । न च सोमेन यजेतेत्यत्रेव सा न दोषायेति वाच्यम् युक्तं हि तत्र लोके लताविशेषरूढस्य सोमपदस्य लक्षणां विना यजत्यर्थपरत्वानुपपत्तेर्लक्षणापरत्वम् । नचोद्भिदादिशब्दा लोके द्रव्यादिविशेषे रूढ्या वर्त्तन्ते किन्तूद्भिनतीत्यादियोगेनैव योगश्च कर्मण्यपि कथं चित्संभवत्येव । ततो धात्वर्थसामानाधिकरण्यादुद्भिदादिशब्दानामलौकिकार्थपरत्वमेवोचितं नैवं मायाशब्दस्य काचिदनुपपत्तिरस्ति यया वेदे तस्यार्थान्तरपरत्वमाश्रीयेतेत्याह—अत्र नैवमित्यादिना । अत्र मायापदे एवमुद्भिदादाविव गत्यन्तरं नेति न किन्त्वस्त्येवेत्यर्थः । तदेवाह—मायागिर इति ॥ ६८ ॥

ननु कथमनुपपत्त्यभावः यावता स्वाश्रयावारकस्याज्ञानस्य सर्वज्ञेश्वरोपाधित्वमनुपपन्नमेव तस्मात्तदुपाधिभूतमायाऽज्ञानातिरिक्ता स्वीकर्त्तव्येत्याशङ्क्याज्ञानस्याकारभेदस्य वर्णितत्वात् सत्वगुणप्राधान्येन स्वाश्रयाव्यामोहकत्वाकारेणैव तदुपाधित्वं न तु स्वाश्रयमोहकत्वाकारेण अतो न काचिदनुपपत्तिरित्यभिप्रेत्याह—

अज्ञानं जडशक्तिमात्रवपुषा सर्वेश्वरस्येष्यते
सर्वज्ञत्वविरोधि तन्न च भवेदुक्तप्रकारेण नः।
सर्वज्ञेश्वरसंश्रया भवति सैवाज्ञानमाया श्रुतौ
तस्माद्वुद्धिदिवेति वर्णनमिदं वैषम्यदुष्टं तव ॥ ९९ ॥

अज्ञानमिति। जडशक्तिमात्रवपुषेति मात्रपदेन स्वाश्रयव्यामोहक-त्वाकारो व्यावर्त्यते। सर्वेश्वरस्येष्यते उपाधिरिति शेषः। ततः किं तत्राह— सर्वज्ञत्वेति। तत्तादृशमज्ञानमुक्तप्रकारेणाश्रयभेदेन स्वाश्रयाव्या-मोहकत्वं व्यामोहकत्वमित्युक्तप्रकारेण तस्माल्लोकसिद्धमज्ञानमेव श्रुतौ स्मृतौ च मायापदवाच्यं न तूद्भिदादिवदर्थान्तरमित्याह— सर्वज्ञेश्वरेति। सा लोकप्रसिद्धा ऽज्ञानमायाज्ञानाख्या माया तथाचोद्भिद्दृ-ष्टान्तो विषम इत्याह— तस्मादिति ॥ ९९ ॥

नन्वज्ञानमात्रस्य मायात्वेऽतिप्रसङ्ग इत्याशङ्क्य शक्तिग्रहोपि पर-विभ्रमहेतुशक्तावित्युक्तमेवार्थं प्रपञ्चयति—

मायाऽनिर्वचनीयमेव तु तमो मायाविनो गीयते
द्रष्टॄणां भ्रमकारणं विषयता मायाविता तस्य तु।
तं हस्त्यादिविकल्पनाघटितवन्मूढाशया जन्तवो
रज्जुं सर्पतयैव तद्विरहितं जानन्त्यबुद्धत्वतः ॥ १०० ॥

मायेति। द्रष्टॄणां भ्रमकारणमनिर्वचनीयं यत्तमः तदेव मायाविनो मायेति गीयते ततो नातिप्रसङ्ग इत्यर्थः। ननु तादृशमज्ञानं किं मायाविपुरुषनिष्ठमुत द्रष्टृपुरुषनिष्ठम्। नाद्यः। तस्याज्ञानाभावात्। अन्यथा तस्यापि भ्रमप्रसङ्गात्। न द्वितीयः। द्रष्टॄणामपि मायाविपद-

वाच्यत्वप्रसङ्गादित्याशङ्क्य न मायाश्रयत्वेन मायावित्त्वप्रसङ्गः मायाविषयस्यैव मायावित्वादित्याह—विषयतेति । तस्य तादृशाज्ञानस्य मायाविन इति वा विषयता मायाविता न तदाश्रयता ततो न द्रष्टृणां मायावित्वमित्यर्थः । द्रष्टुर्भ्रमकारणाज्ञानविषयत्वमेव मायावित्वमित्यत्रान्वयव्यतिरेकौ प्रमाणमिति वक्तुमन्वयं तावदाह— तामिति । तं मायावित्वेनाभिमतम् । हस्त्यादिविकल्पनाघटितवत् हस्ताद्यारोपघटितवत् हस्त्यादिभावयुक्तवदित्यर्थः । तद्विरहितं वस्तुतो हस्त्यादिभावविरहितमबुद्धत्वतः हस्त्यादिभावविरहितत्वेन तस्याज्ञातत्वादित्यर्थः। मूढाशया जन्तवः तद्विरहितं तमबुद्धत्वतः रज्जुसर्पतयेव हस्त्यादिविकल्पनाघटितवत् जानन्तीति सम्बन्धः ॥१००॥

हस्त्यादिभावरहितत्वेन यदा तन्न जानन्ति तदा तस्मिन् हस्त्यादिभावकल्पनेत्यन्वयो दर्शितः । इदानीं व्यतिरेकमाह—

सम्यग्ज्ञानबलेन तं विरहितं हस्त्यादिभिर्यत्क्षणे
जानीयुस्तदनन्तरं न स भवेद्धस्त्यादियुक्तः पुमान् ।
तेनाऽस्मत्तम एव तत्र विषये मायाऽस्तु मायाविनः
सोऽज्ञातो वयमज्ञकोटिपतिता मायी स तेनोच्यते।१०१।

सम्यग्ज्ञानेति । तं मायाविनं सम्यग्ज्ञानबलेन यत्क्षणे यस्मिन्काले हस्त्यादिभिरारोपितहस्त्यादिभिर्विरहितं जानीयुः हस्त्यादिभावरहितं जानीयुरित्यर्थः । तदनन्तरं ज्ञानानन्तरं सः मायाविपुमान् हस्त्यादियुक्तो न भवेत् हस्त्यादिभावभ्रान्तिविषयो न भवेदित्यर्थः । फलितमाह—तेनेति । येनास्माकं मायाविस्वरूपाज्ञाने तस्मिन् हस्त्यादिकल्पना तज्ज्ञाने तु सा न तेनेत्यर्थः । तत्र विषये गजादिकार्ये

विषये अस्मत्तमः द्रष्टृज्ञानमेव मायाविनो मायास्तु मायाविनो माया-श्रयत्वं वारयति—सोऽज्ञात इति । सः मायावी अज्ञातः अज्ञानविषय एव न तु तदाश्रय इत्यर्थः । द्रष्टृणामज्ञानविषयत्वं निराकरोति मायावित्व-व्युदासाय वयमिति द्रष्टारः अज्ञकोटिपतिताः अज्ञानाश्रयकोटिनि-विष्टाः फलितमाह —मायीति । सः मायावित्वेनाभिमतस्तेन येनाज्ञान-विषयस्तेनेत्यर्थः ॥ १०१ ॥

ननु द्रष्टृभ्रमकारणाज्ञानविषयत्वं मायावित्वमित्यनुपपन्नं तादृश-शुक्त्यादौ मायावित्वप्रसिद्ध्यभावात् अतोऽज्ञानविषयत्वादन्यदेव मायावित्वं वाच्यमिति शङ्कते—

नन्वेवं सति रज्जुखण्डलकमप्यज्ञातमज्ञानिभि-
र्मायावीति गिरोच्यतां न तु तथा लोके प्रसिद्धिः क्वचित् ।
तेनाज्ञातविलक्षणत्वमुचितं मायाविनो लौकिका
मायावीति पुमांसमेव निपुणं येनाऽऽहुरत्यादरात् ॥ १०२ ॥

नन्वेवं सतीति । अज्ञानविषयस्य मायावित्वे सतीत्यर्थः । रज्जु-खण्डलकं रज्जुखण्ड इत्यर्थः । नन्वस्तु रज्ज्वा अपि मायावित्वं न प्रसिद्धिविरोधादित्याह—नन्विति । तथा मायावित्वेन प्रसिद्धिः रज्ज्वा इति शेषः । फलितमाह—तेनेति । येन कारणेनाज्ञानविषयत्वाविशेषेपि मनुष्यमेव मायावीति निपुणमवैमत्येन व्यवहरन्ति लौकिकाः न तु रज्ज्वादिकं तेनेत्यर्थः ॥ १०२ ॥

अज्ञानविषयत्वं मायावित्वमिति नोच्यते समुद्राद्यानेतुर्माया-वित्वाभावप्रसङ्गात् किन्तु मायाविनोपि कदाचित् गजादिभावा-पत्तिदशायामज्ञानविषयत्वमस्तीत्येतावन्मात्रं मायावित्वं तु मन्त्रादिना स्वेच्छया नियमेनाज्ञानक्षोभकत्वमेव तथा चाज्ञानविषयत्वाविशेषेऽ-

प्यवान्तरविशेषस्य विद्यमानत्वात् पुरुष एव मायावित्वव्यपदेशो न रज्ज्वादाविति सदृष्टान्तं समाधत्ते--

नैवं भ्रान्तिनिमित्तकारणमयं संगृह्य पूर्वक्षणे
मन्त्रादिप्रचुरं प्रयत्नजनितं तज्जीवने वर्तते।
तेनात्रैव तु लोकरूढिरभवन्मायाविता गोचरा
यद्वद्ब्राह्मणताप्रसिद्धिरभवन्मुक्त्वा परिव्राजकान् ॥१०३॥

नैवमिति । भ्रान्तिनिमित्तकारणमज्ञानक्षोभद्वारेति शेषः । क्षोभकमन्त्रादिप्राप्तौ हेतुः—प्रचुरप्रयत्नजनितमिति । बह्वायासप्राप्तमित्यर्थः । अयं मायावी पुरुषः प्रचुरप्रयत्नजनितं भ्रान्तिनिमित्तकारणं मण्यादि संगृह्य सर्वक्षणे सर्वदा तज्जीवनः तत् क्षोभकमण्यादिकमेव जीवनं जीवनोपायो यस्य स तथोक्तः तत्परो वर्त्तत इत्यर्थः । मन्त्रादेर्जीवनोपायत्वान्नियमेन मन्त्रादिनाऽज्ञानं क्षोभयन् वर्तत इत्यर्थः । तेन यद्यपि रज्ज्वादेरपि सादृश्यादिदोषद्वाराज्ञानक्षोभकत्वमस्ति तथापि तस्य कादाचित्कत्वात् न तत्र मायावित्वप्रसिद्धिः किन्त्वत्रैवेत्याह—तेनेति । येनायं नियमेन तत्परो वर्तते तेनात्र मायाविपुरुष एव मायाविता गोचरा मायावित्वविषया लोकरूढिः लोकप्रसिद्धिः न रज्ज्वादावित्यर्थः । उभयत्राज्ञानविषयत्वाविशेषेऽप्यवान्तरविशेषान्मायावित्व प्रसिद्ध्यप्रसिद्ध्योर्दृष्टान्तमाह—यद्वदिति । यथा गृहस्थपरिव्राजकयोरुभयोरपि ब्रह्मणत्वाविशेषेऽपि परिव्राजकशब्देन ब्राह्मणशब्दसमभिव्याहारे यज्ञोपवीतादिसाहित्यराहित्याभ्यां गृहस्थादावेव ब्राह्मणत्वप्रसिद्धिः न तु परिव्राजके तद्वदित्यर्थः ॥ १०३ ॥

तस्माल्लौकिकमायापदस्यानिर्वचनीयाज्ञान एव प्रसिद्धत्वात् वैदिकमायापदमप्यज्ञानमेव बोधयेत् न तदतिरिक्तं सर्वदृश्यत्वादि-

लिङ्गमप्यव्यभिचारेण प्रसिद्धमायायामाविद्यकत्वेनावगतव्याप्तिकत्वा-दाविद्यकत्वमेव जाग्रत्प्रपञ्चस्य साधयतीति फलितमुपसंहरति—

एवं तावल्लोकसिद्धा न माया
मिथ्याज्ञानाद्भिद्यतेऽतश्च तत्र ।
शक्तिव्याप्तिप्रत्ययौ वर्णयित्वा
वेदाल्लिङ्गाच्चान्यमायात्वसिद्धिः ॥ १०४ ॥

एवं तावदिति एवमुक्तप्रकारेण लोकसिद्धा लोके मिथ्यागजादि-हेतुत्वेन सिद्धा मायामिथ्याज्ञानात् मिथ्या च तदज्ञानं चेति मिथ्या-ज्ञानमनिर्वचनीयाविद्या ततो न भिद्यते । अतश्च यतो न भिद्यते अतस्तत्रानिर्वचनीयाविद्यायां शक्तिव्याप्तिप्रत्ययौ वर्णयित्वा माया-पदस्य शक्तिज्ञानं दृश्यत्वादिलिङ्गस्याविद्यकत्वेन व्याप्तिप्रत्ययं च वर्णयित्वा वेदान्मायया ह्यन्यदिवेत्यादिवेदाल्लिङ्गाद् दृश्यत्वादि-लिङ्गाच्च अन्यमायात्वसिद्धिः । अन्यस्य लोकसिद्धमायिक-हस्ताद्यन्यस्य जाग्रतोपि मायात्वसिद्धिः आविद्यकत्वसिद्धि-रित्यर्थः । १०४ ।

इममेव श्लोकार्थं प्रपञ्चयति—

जाग्रद्भूमौ या प्रसिद्धेह माया
निर्णीता सा तावदज्ञानमेव ।
तस्यां शक्तिव्याप्तिविज्ञानसिद्धे-
र्विज्ञातव्या सैव वेदानुमानात् ॥ १०५ ॥

जाग्रद्भूमाविति । इह जाग्रद्भूमाविति सम्बन्धः । प्रसिद्धा मिथ्यागजादिकारणत्वेन प्रसिद्धा या सा अज्ञानं प्रत्यगात्मनो द्रष्टुरज्ञानमेव निर्णीता तस्यामज्ञानाभिन्नमायायां शक्तिव्याप्तिविज्ञानसिद्धेः मायापदशक्तिज्ञानस्य दृश्यत्वादेरविद्यामयत्वेन व्याप्तिज्ञानस्य च सिद्धेः। साऽज्ञानाभिन्ना मायैव वेदानुमानाद्वेदादनुमानाच्च पूर्वोक्ताज्ज्ञातव्या जाग्रदुपादानत्वेन ज्ञातव्येत्यर्थः ॥ १०५ ॥

नन्वेवमपि मायापदस्याज्ञाने शक्तिर्ग्रहीतुं न शक्यते स्वप्नमायाया अज्ञानत्वाभावात्। अन्यथा सूत्रकारस्य स्वप्ने मायिकत्वनिर्देशानुपपत्तेः । अत एव दृश्यत्वादिलिङ्गमपि नाविद्यामयत्वेन व्याप्तमित्याशङ्क्याह—

स्वप्नेऽप्येवं स्वप्नदृङ्मोहमात्रा-
दन्या काचिन्न प्रसिद्धाऽस्ति माया ।
तत्रैवायं सूत्रकारस्य तस्मा-
न्मायाशब्दो वर्तते नापरत्र ॥ १०६ ॥

स्वप्नेऽप्येवमिति । एवं जाग्रद्वत् स्वप्नेपि स्वप्नदृढमोहमात्रादन्या काचिन्माया प्रसिद्धा नास्ति । अन्यथा मायापदस्यानेकार्थत्वप्रसङ्गादित्यर्थः । अत एव सूत्रकारस्य स्वप्ने मायाशब्दप्रयोगोपि मायाया अज्ञानाभिन्नत्वाभिप्रायेणैव युज्यत इत्याह—तत्रैवायमिति । यस्मादन्या माया नास्ति तस्मात्सूत्रकारस्य तत्राज्ञान एवायं मायाशब्दो वर्तते नापरत्राज्ञानव्यतिरिक्त इत्यर्थः ॥ १०६ ॥

ननु स्वप्नकारणाज्ञाने मायाशब्दप्रयोगोऽनुपपन्नः । तस्य परसाधारणभ्रमजनकत्वाभावात् स्वाश्रयव्यामोहकत्वाच्च तथा च मायाशब्दं प्रयुञ्जानस्य सूत्रकारस्याज्ञानातिरिक्तैव मायेत्यभिमतम्। अन्य-

थाऽविद्यामात्रमित्येवासूत्रयिष्यदित्याशङ्क्य मायापदस्य प्रयोजनान्तरविवक्षया प्रयुक्तत्वान्मैवमित्याह—

शक्तिव्याप्तिप्रत्ययौ कारयिष्य-
न्स्वप्ने स्थित्वा प्रत्यगज्ञानमात्रे।
मायावाचा लोकवत्सूत्रकारो
वेदे लिङ्गं चोपनेतुं प्रवृत्तः॥ १०७॥

शक्तिव्याप्तिप्रत्ययाविति। सूत्रकारो मायाशब्दलिङ्गयोः प्रत्यगज्ञानमात्रे शक्तिव्याप्तिप्रत्ययौ कारयिष्यन् सन् स्वप्ने स्थित्वा मायावाचा प्रवृत्तः मायामात्रमिति मायाशब्देन प्रवृत्तः किमर्थं लोकवत् वेदं लिङ्गं चोपनेतुं लौकिकशक्तिव्याप्तिग्रहानुरोधेन वैदिकमायाशब्दं दृश्यत्वादिलिङ्गं च प्रत्यगज्ञानमात्रविषयतया नेतुमेव स्वप्नेऽपि मायाशब्दं प्रायुङ्क्तेत्यर्थः—एतदुक्तं भवति। न तावत्स्वप्नकारणेऽज्ञाने मायापदप्रयोगानुपपत्तिः। मूलाज्ञानस्यैव तत्कारणत्वात्। तस्य चान्यसाधारणभ्रमजनकत्वान्मिथ्याभूतत्वगुणयोगेन प्रयोगसंभवाच्च। न मायापदप्रयोगस्य प्रयोजनाभावः। यतः सर्वसम्प्रतिपन्नमिथ्याभावगजाद्युपादानमायायां गृहीतशक्तिकमायापदप्रयोगे वैदिकमायापदस्यापि मिथ्याभूतवस्तुवाचकत्वं सिद्ध्यतीति॥ १०७॥

भगवता सर्वेश्वरेण हरिणा मायाज्ञानयोरुभयोरपि चैतन्यावरणलक्षणस्यैकस्य कृत्यस्य दर्शितत्त्वादपि तयोरैक्यमित्याह—

अज्ञानमावरणमावरणं च माया
सर्वेश्वरेण हरिणा दृढमभ्यधायि।

चैतन्यवस्तुन इति प्रतिपद्यमाना-
स्तत्त्वं तदेकमिति निश्चयतः प्रतीमः ॥ १०८ ॥

अज्ञानमिति । आवरणशब्दः करणसाधनः सर्वेश्वरेण हरिणाऽज्ञानं-चैतन्यवस्तुनः आवरणं माया च चैतन्यवस्तुन आवरणमिति दृढमभ्य-धायीति प्रतिपद्यमाना जानन्तो वयं तत्तत्वं मायाविद्यास्वरूपमेकमिति निश्चयतः प्रतीमः निश्चयेन जानीम इत्यर्थः । १०८ ।

भगवता मायाशब्दाभिलप्यस्याज्ञानशब्दाभिलप्यत्ववज्ज्ञान निवर्त्योक्तेरपि तयोः स्वरूपमेकमेवेत्याह—

ज्ञानं निवर्तकमपि द्वितयस्य तस्य
गीतागतः करुणया भगवानुवाच ।
तेनापि तत्त्वमिदमेकमिति प्रतीति-
रानीयते कथितलक्षणतुल्यभावात् ॥ १०९ ॥

ज्ञानमिति । तस्य मायाविद्यालक्षणस्य द्वितयस्यापि ज्ञानमखण्ड-साक्षात्कारो निवर्तकमिति गीतागतो भगवान् करुणयोवाच तेनापि येनैवमुवाच तेनापीदं तत्त्वं मायाविद्यास्वरूपमेकमिति प्रतीतिरानीयते जायत इत्यर्थः । तत्र हेतुः कथितलक्षणतुल्यभावादित्यज्ञानलक्षणत्वेन कथितं यल्लक्षणं ज्ञाननिवर्त्यत्वलक्षणं तस्य मायायामपि तुल्यत्वादि-त्यर्थः ॥ १०९ ॥

भगवता गीतायां कैर्वचनैर्मायाविद्याशब्दाभिधेययोश्चैतन्या-वारकत्वाख्यस्वरूपलक्षणज्ञाननिवर्त्यत्वाख्यस्वरूपलक्षणयोरेकत्वमुक्त-मित्याकाङ्क्षायां तानि वचनानि प्रतीकेनोदाहरति—

नाहं प्रकाश इति तावदनेन मायाऽ-
ज्ञानेन चाऽऽवृतमितीतरदप्यभाणि।
मामेव ये तु परमं पुरुषं प्रपन्ना
ज्ञानेन तु प्रभृतिना च धिया निवृत्तिः॥ ११०॥

नाहं प्रकाश इतीति। "नाहं प्रकाशः सर्वस्य योगमायासमावृत" इत्यनेन माया अभाणि मायाऽऽवारकत्वेन कथितेत्यर्थः। अज्ञानेनेति च्छेदः। अज्ञानेनावृतमिति। अनेन चेतरदज्ञानमप्यावारकत्वेनाभाणीत्यर्थः। "मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते। ज्ञानेन तु तदज्ञानं येषां नाशितमात्मन" इत्यादिना धियाऽखण्डसाक्षात्कारेण निवृत्तिर-विद्यानिवृत्तिरभाणीत्यर्थः। मामेवेत्यस्य व्यख्या परमं पुरुषमिति प्रपद्यन्त इत्यस्यानुकरणं प्रपन्ना इति जानन्त इत्यर्थः। ज्ञानेन तु प्रभृतिना ज्ञानेन त्वित्यादिनेत्यर्थः॥ ११०॥

नन्वज्ञानं हि ज्ञानप्रागभाव इति कणभुगादिसंमतं माया च निखिलजगत्प्रकृतिर्भावरूपैव तत्कथमनयोरैक्यं संभावयितुं शक्यते। ननु भगवद्वचनबलादेकत्वं प्रतीम इति चेन्न न यतो वचनस्यातिभार इत्याशङ्क्य प्रथमाध्यायोक्तमज्ञानभावत्वं स्मारयति—

ज्ञानस्य प्रागभावादपरमभिहितं प्रत्यगज्ञानमेत-
त्संसारव्याधिबीजं कथितनयवशादेव बुध्या स्वबुद्ध्या।
ज्ञानेनाज्ञाननाशं कथयति भगवानेष गीतागतः स-
न्नज्ञानात्प्रागभावश्चग इति घटते तत्त्वये तत्प्रसूतेः॥ १११॥

ज्ञानस्येति। अथवाऽज्ञानस्य ज्ञानाभावरूपत्वान्मायायाश्च भाव-रूपत्वात्कथमनयोरैक्यं संभवतीत्याशङ्क्य भगवद्वचनबलादेवा-ज्ञानस्य न प्रागभावत्वमपि सिद्ध्यतीत्याह—ज्ञानस्येति। अभिहितम-

सत्यपीति । अलुप्तचित्यविकारिकूटस्थचैतन्ये त्वयि सत्यपि जाग्रद्दशावगतं यत्कर्तृभोक्तृप्रमातृमुखमन्यदपि किञ्चिद्भोगोपकरणादिकमिह स्वप्ने नास्ति । तत्कर्तृत्वादिकमखिलं ते स्वाभाविकं भवितुं नोत्सहते विरोधादिति सम्बन्धः ॥ ११३ ॥

किंच स्वाभाविकधर्मतद्वतोरन्यतरसद्भावेऽन्यतरविरहाभावस्य वह्नितदौष्ण्ययोर्दर्शनादपि न कर्तृत्वादेः स्वाभाविकत्वमित्यभिप्रेत्याह—

स्वाभाविकी हुतभुजः खलु नोष्णता तं
जातु प्रमुञ्चति न तामपि जातवेदाः ।
एवं भवन्तमपि जागरितोपलब्धं
स्वप्ने भवानपि च जागरितं न मुञ्चेत् ॥ ११४ ॥

स्वाभाविकीति । उष्णतोष्णस्पर्शः तं वह्निं जातु कदाचिदपि ताम्-उष्णताम्, एवम्-उष्णतावद् भवन्तमविलुप्तचैतन्यस्वरूपं त्वामपि जागरितोपलब्धकर्तृत्वादीति शेषः । स्वप्ने न विमुञ्चेद्यदि तत्स्वाभाविकं स्यादिति शेषः । भवानपि जागरितं जाग्रद्दृष्टकर्तृत्वादिकं न प्रमुञ्चेदिति सम्बन्धः ॥ ११४ ॥

नन्वात्मनि सति कर्तृत्वादेर्विरहो नास्त्येव स्वप्नेपि तदनुभवात् सुषुप्ते तत्प्रतीतिकारणाभावादेव तदप्रतीतेः । न च जाग्रत्स्वप्नकर्तृत्वयोः सत्यमिथ्याभेदेन भिन्नतयैकत्वानुपपत्तेः आत्मनि सति कर्तृत्वादेर्विरह एवेति शङ्क्यं भवन्मते सर्वस्यापि मिथ्यात्वेन वैषम्याभावादतः कथं व्यतिरेकेण स्वाभाविकत्वाभाव इत्याशङ्क्य वैषम्याभावोऽसिद्ध इत्याह—

स्वप्ने न जागरितमस्ति मृषात्वहेतोः
स्वप्नस्य सत्यमिति जागरितं वदन्ति ।
स्वप्नस्य बाधनबलादनृतत्वमुक्तं
तस्माच्चिदेव तव रूपमतोऽन्यदार्त्तम् ॥ ११५ ॥

स्वप्ने इति । स्वप्ने जागरितं कर्तृत्वादि नास्ति स्वप्नस्य मृषात्वाज्जागरितस्य च सत्यत्वादित्यर्थः । तर्हि किं जाग्रत्पारमार्थिकसत्यं नेत्याह—सत्यमिति । जागरितं वदन्तीति व्यावहारिकसत्यमित्यर्थः । ननूभयोरप्याविद्यकत्वाविशेषे व्यावहारिकप्रातीतिकभेदः किंनिबन्धन इत्याशङ्क्य सति प्रमातरि बाध्यत्वाबाध्यत्वनिबन्धन इत्युक्तं स्मारयति—स्वप्नस्येति । बाधनं बाधः सति प्रमातरि बाधबलादित्यर्थः । उक्तं न प्रमातरीत्यादावित्यर्थः । जाग्रतश्च तस्मिन्सत्यबाधात् व्यावहारिकत्वमुक्तमिति च द्रष्टव्यम् । फलितमाह—तस्मादिति । यस्माच्चैतन्यमेवावस्थात्रयेप्यनुस्यूतं जाग्रत्कर्तृत्वादिकं चागमापायि तस्मात् चिदेवासङ्गकूटस्थचैतन्यमेव तव रूपं स्वाभाविकस्वरूपमतश्चैतन्यादन्यत् जाग्रद्दृष्टमार्त्तं मिथ्येत्यर्थः । तथा च श्रुतिः'अतोऽन्यदार्त्तमि'ति ॥ ११५ ॥

ननु जाग्रतोपि मिथ्यात्वे तत्त्वज्ञानहेत्वभावात् संसारनिवृत्तिर्न स्यादित्याशङ्क्य यथाऽसत्यस्यापि स्वप्नव्याघ्रादेर्जाग्रद्बोधहेतुत्वं तद्वज्जाग्रतोऽसत्यस्यापि तत्त्वबोधहेतुत्वं संभवतीति "सूचकश्च हि श्रुतेराचक्षते च तद्विद" इति सूत्रं द्वितीयाध्यायोक्तं चार्थमनुसृत्याह—

स्वप्नोपलब्धमखिलं वितथं तथापि
तत्सूचयत्यवितथं परमार्थवस्तु ।

जाग्रद्दशावगतमप्यनृतं तथापि

तद्वत्तदप्यवगतिक्षममेव भूम्नः ॥ ११६ ॥

स्वप्नोपलब्धमिति । तत्स्वप्नोपलब्धं सूचयति बोधयति अवितथं सति प्रमातर्यबाध्यमत एव स्वप्नापेक्षया परमार्थवस्तु जाग्रत्पदार्थं तद्वत्स्वप्नोपलब्धवज्जाग्रद्दशावगतमपि वस्तु यद्यप्यनृतं तथापि तज्जाग्रद्वस्त्वपि भूम्नः अनवच्छिन्नपरमानन्दब्रह्मात्मनः अवगतिक्षममेव ब्रह्मात्मसाक्षात्कारसमर्थमेवेत्यर्थः ॥ ११६ ॥

एवं जाग्रद्दृष्टस्यागमापायित्वेन मिथ्यात्वमुक्त्वा स्वप्नदृष्टस्यागमापायित्वेन तदाह—

स्वप्नभ्रमोऽपि सुकृतादिनिबन्धनत्वा-

त्तावत्परिस्फुरति यावददृष्टमस्ति ।

क्षीणे तु तत्र लयमेति जगन्निदाने

गाढे तमस्यनुभवावगते प्रतीचः ॥ ११७ ॥

स्वप्नभ्रमोऽपीति । सुकृतादीत्यादिपदेन दुष्कृतमुच्यते । यावददृष्टमस्ति तावत्परिस्फुरतीति सम्बन्धस्तत्रादृष्टे प्रतीचस्तमसीति सम्बन्धः । अथवा ननु स्वप्नवज्जारितस्याप्यसत्यत्वे व्यवहारकाल एव बाधः किं न स्यादिति चेत्किं सविलासाज्ञाननिवृत्तिलक्षणो बाधः किं न स्यादित्यापाद्यते । उत मिथ्यात्वनिश्चयलक्षणः । नाद्यः । स्वप्नस्यापि तदभावात्स्वप्नभोगप्रदकर्मनाशे सति तस्य कारणाज्ञानात्मनावस्थानस्यैवाङ्गीकारात्तदिदमुक्तं तत्रादृष्टे क्षीणे सत्यनुभवावगते जगन्निदाने गाढे प्रतीचस्तमसि प्रत्यग्विषयतमसि लयमेतीति । न द्वितीयः। स्वप्नारम्भकं हि कर्म क्षुद्रतरमतस्तस्य शीघ्रमुपरमा-

त्स्वप्नदृष्टवस्त्वपि न परिस्फुरति । स्वप्नान्तरेण च न संवाद्यते । तस्य कर्मान्तरारब्धत्वात् । अतस्तस्य जाग्रज्ज्ञाननिवर्त्यत्वबुद्धया मिथ्यात्वनिश्चयो भवति । जाग्रद्दृष्टस्य च पित्रादिपदार्थस्यैकस्मिन् शरीरे एककर्मारब्धत्वाज्जाग्रदन्तरेपि संवादोऽस्तीति न तस्य व्यवहारकाले बाध इत्यभिप्रेत्याह—स्वप्नभ्रमोऽपीति ॥ ११७ ॥

ननु सुकृतदुष्कृतकर्मणां क्रियारूपत्वात् क्रियायाश्च कारकसमानकालीनत्वेन कारकविरहदशायां तदभावात् कथं स्वप्नादिभोगस्तन्निमित्तो भवेदित्याशङ्कय यद्यपीदानीं क्रियायाः परिदृश्यमानस्थूलरूपेणावस्थानं न सम्भवति तथापि सूक्ष्मरूपेण यावत्फलभोगमवस्थानसम्भवान्नोक्तानुपपत्तिरित्याह –

निष्पादिता सकलकारकवर्गसाध्या
सर्वेण कारकगणेन सहैव तावत् ।
तिष्ठेत्क्रिया परमसूक्ष्मतयेक्ष्यमाणा
सर्वेश्वरेण पुरुषः फलमेति यावत् ॥ ११८ ॥

निष्पादितेति । अस्यैव व्याख्या सकलेति कारकं कर्त्रादि ननु सूक्ष्मरूपस्यापि क्रियारूपत्वात्कथं कारकवर्गं विनाऽवस्थानमित्याशङ्कयोक्तं कारकगणेन सहैवेति । कारकवर्गोपि सूक्ष्मरूपेण तिष्ठतीति नानुपपत्तिरित्यर्थः । परमसूक्ष्मतयेतीत्थं भावे तृतीयाऽतिसूक्ष्मरूपेण तिष्ठेदित्यर्थः । नन्वदृष्टस्य यावत्फलभोगमवस्थानसम्भवे तस्यैव फलदातृत्वात्किमीश्वरेणेत्याशङ्कयाह—ईक्ष्यमाणा सर्वेश्वरेणेति । पुरुषो यावत्फलमत्ति तावत्सर्वेश्वरेणेक्ष्यमाणाधिष्ठितैव तिष्ठेत् न तु स्वतन्त्रेत्यर्थः । यद्यपि यावत्फलभोगमदृष्टमस्ति तथापि तस्य केवलस्य जडतया फलदातृत्वानुपपत्तेः ईश्वरोप्यपेक्षणीय इति भावः ॥ ११८ ॥

ननु स्वप्नजागरितयोर्भ्रान्तित्वे कर्मनिबन्धनत्वं कुतः न हि रज्ज्वां सर्पभ्रमो यागादिकर्मनिबन्धन इत्याशङ्क्य भ्रमान्तरेपि कर्माधीनत्वमविरुद्धं वक्तव्यं च। अन्यथा रज्ज्वां कस्यचित् मालारोपेण सन्तोषः कस्याचित्सर्पारोपेण दुःखमिति वैचित्र्यानुपपत्तेरित्यभिप्रेत्याह—

स्वप्नश्च जागरितमप्युभयं तवैव
मोहप्रसूतमपि कर्मफलं विभाति।
कर्मक्षये तदखिलं परमात्ममाया-
माश्रित्य सूक्ष्ममवतिष्ठत एव लीनम् ॥ ११६ ॥

स्वप्नश्चेति। तर्हि कर्ममूलत्वात्संसारस्य सुषुप्त्यादौ तत्क्षये तत्क्षयसंभवात्तत्त्वज्ञानं नाभ्यर्थनीयमित्याशङ्क्य तत्त्वज्ञानं विनाऽज्ञाननिवृत्त्यनुपपत्तेः। तां विना कर्मणस्तज्जन्यसंसारस्य चात्यन्तक्षयानुपपत्तेः ज्ञानमर्थवदेवेत्यभिप्रेत्याह—कर्मक्षय इति। तज्जाग्रत्स्वप्नरूपसंसरणमखिलं सूक्ष्मं कार्याकाररहितं सत्परमात्ममायामाश्रित्य विलीनमवतिष्ठत एव कारणात्मना विद्यत एवेत्यर्थः ॥ ११६ ॥

ननु सुषुप्त्यादावज्ञाने जगल्लीनप्रायं वर्त्तत इत्यनुपपन्नं प्रमाणाभावात् तथात्वे वा "सता सोम्य तदा सम्पन्नो भवति" "तदभावो नाडीषु तच्छ्रुते"रिति श्रुतिसूत्रसिद्धा जीवस्य तत्सम्पत्तिरूपा विशुद्धिर्विरुद्ध्येतेति चेन्न तावत्प्रमाणाभावः पुनरुत्थानस्यैव मानत्वात्। नापि सत्संपत्तिविरोधः सुषुप्त्यादावज्ञानात्मतया जगत्सद्भावस्योत्थानलिङ्गमात्रगम्यतया तत्संपत्तिश्रुतेस्तदानीं विक्षेपप्रतीत्यभावपरत्वादित्यभिप्रेत्याह—

उत्थानलिङ्गकृतकल्पनयैतदेवं
विज्ञायते न तु तथावगतं तदानीम् ।
अज्ञानलीनमखिलं जगदस्ति सूक्ष्मं
तत्रेति नानुभवनादवगम्यते हि ॥ १२० ॥

उत्थानेति । उत्थानमेव लिङ्गं तत्कृता तज्जन्या या अनुमित्यात्मिका कल्पना तयैवेत्यर्थः । एतत्सुषुप्तौ जगदज्ञाने विलीनप्रायं वर्त्तत इत्येतदेवकारव्यावर्त्यमाह—न त्विति । तथा सूक्ष्मरूपेण वर्त्तत इत्यनेन प्रकारेण तदानीं सुषुप्तौ जगत्सूक्ष्मरूपेणाज्ञाने वर्तत इत्येवंप्रकारेण सुषुप्तौ जगन्नावगतमित्यत्राननुभवमेव सर्वलोकप्रसिद्धं प्रमाणयति—अज्ञानलीनमिति । तत्र—सुषुप्तौ ॥ १२० ॥

नन्वेवं सत्यज्ञानस्याप्युत्थानलिङ्गानुमेयत्वात् सुषुप्तौ तदनुभवो न कल्प्यः न हि तदा कश्चिदहमज्ञ इत्येवमज्ञानमनुभवतीति चेत् किमेवं वदतो विवक्षितं सुषुप्तावज्ञानस्यानुभवकल्पने तदात्मकतया वर्त्तमानस्य संसारस्याप्यनुभवः कल्पनीय इति किं वा तद्वदज्ञानस्यापि सुषुप्तावनुभवो न कल्पनीय इत्येतावन्मात्रं नोभयथाप्यज्ञानानुभवकल्पकवत् तत्कल्पकाभावादित्यभिप्रेत्याह—

अज्ञानमेव तु तदाऽवगतं त्वदीयं
येनोत्थितो वदसि नावगतं मयाऽत्र ।
सुप्तेन किंचिदपि गाढतमस्यभूवं
क्षिप्तः समस्तविषयावगमासमर्थः ॥ १२१ ॥

अज्ञानमेवेत्वित्यादिनानुभवप्रमाणादित्यन्तेन न तु संसार इत्यर्थः । तदा सुषुप्तौ सुषुप्तावज्ञानानुभवसद्भावे प्रमाणमाह—येनेति । येन कारणेनो

त्थितस्त्वमेवं वदसि तेन सुषुप्तिकालेऽज्ञानमस्ति अवगतं च तदिति निश्चिन्वित्युत्तरेण सम्बन्धः। उक्तिमेवाह--नावगतमिति। गाढतमसि क्षिप्तः सन् मग्नः सन् समस्तविषयावगमासमर्थोऽभूवमत एवाद्य सुप्तेन मया किंचिदपि नावगतमिति ॥ १२१ ॥

ननूत्थितस्य मम एवमभिवदनमात्रेण कथं सौषुप्तिकाज्ञानतदनुभवौ सिद्ध्येतामित्याशङ्क्याभिवदनस्याभिवदितव्यविषयज्ञानसाध्यत्वाज्ज्ञानस्य चात्र परामर्शरूपत्वात्तस्य च पूर्वानुभवं विनाऽसंभवात् अज्ञानतदनुभवौ सिद्ध्यत एवेत्याह—

अज्ञानमत्र यदि नानुभवात्प्रसिद्धं

नाज्ञासिषं त्विति कुतस्तव निश्चयोऽभूत्।

अज्ञानमस्त्यवगतं च सुषुप्तिकाले

तेनेति निश्चिनु तवानुभवप्रमाणात् ॥ १२२ ॥

अज्ञानमिति। अत्र सुषुप्तौ नाज्ञासिषमिति निश्चयः। न किंञ्चिदवेदिषमिति परामर्शः। अभिवदनहेतुत्वेन निश्चयस्य पूर्वभावित्वादभूदिति लुङ् प्रयोगः। केन तर्ह्यज्ञानानुभवः। त्वत्स्वरूपसाक्षिणेत्याह—तवेति। अथवा श्लोकद्वयेन क्रमेण पक्षद्वयनिरासः ॥ १२२ ॥

किमिति तर्हि सुषुप्तौ 'अहमज्ञ' इति स्फुटानुभवो नास्तीति चेत् स्पष्टताभिव्यञ्जकाहंकाराभावादित्याह—

स्पष्टानुभूतिविषयो न तमस्तदानी-

मासीदहंकरणहीनतयाऽधुना तु।

निष्पाद्य कार्यमिदमंशमहं न जाने
मूढोऽस्मि चेत्यवगतेर्विषयत्वमागात् ॥ १२३ ॥

स्पष्टानुभूतिविषय इति । तदानीं सुषुप्तौ । नन्वहंकारस्य स्पष्टाभिव्यञ्जकत्वे किं प्रमाणमित्याशङ्क्यान्वयव्यतिरेकाविति सुषुप्तिव्यतिरेकस्थलमभिप्रेत्यान्वयस्थलमुदाहरति—अधुना त्विति । उत्थानानन्तरमित्यर्थः । इदमंशमहंकरणमवगतेः स्पष्टावगतेः विषयत्वमागात् । विषयत्वं प्राप्तं तम इत्यनुषङ्गः ॥ १२३ ॥

स्पष्टानुभवाभावादेव सुषुप्तावविवेकिनामज्ञानासत्त्वबुद्धिराचार्याणां च क्वचिदात्मशुद्धिप्रस्तावेनास्त्यज्ञाने सुषुप्ताविति वचनं न त्वज्ञानासत्त्वादित्याह—

एतावता तव तमोऽपि सुषुप्तिकाले
नास्तीति बुद्धिरुदितं गुरुभिश्च कैश्चित् ।
स्थाने क्वचित्क्वचिदतो द्वयमुच्यमानं
ग्राह्यं विविच्य भवता विषयं विभज्य ॥ १२४ ॥

एतावतेति । स्पष्टानुभवाभावमात्रेणेत्यर्थः । तवेत्यविवेकिनामुपलक्षणं गुरुभिर्भगवत्पादैः कैश्चिदन्यैरप्याचार्यैरित्यर्थः । स्थाने स्थले क्वचित् क्वचित्तत्र तत्रात्मशुद्धिप्रकरणे उदितम् । सुषुप्तिकाले तमो नास्तीत्यनुषङ्गः । नन्वाचार्याणामज्ञानासद्भाववचनस्य कथं स्पष्टप्रतीतिविषयत्वाभावाभिप्रायः कल्प्यत इत्याशङ्क्य स्थलान्तरे तेषामेव सौषुप्तिकाज्ञानसद्भाववचनस्य विद्यमानत्वादित्यभिप्रेत्याह—तम इति । यतः क्वचित् क्वचिदेव सौषुप्तिकाज्ञानं नास्तीति वचनं स्थलान्तरे तु सद्भाववचनं चास्त्येव अतो द्वयं सद्भावासद्भाव-

लक्षणद्वयं विषयं विभज्य प्रतिपाद्यार्थं विभज्य विविच्य ग्राह्य-मित्यर्थः ॥ १२४ ॥

तत्र किं तद्द्वयमुदितं कथं वा विभज्य ग्रहणमित्याकाङ्क्षायामाह-

नाज्ञानमस्ति च सुषुप्तिगतस्य पुंसो
गाढे तमस्ययमभूत्पुरुषः सुषुप्तः ।
इत्युच्यमानमविरुद्धतया विविच्य
ग्राह्यं त्वयाऽनुभवयुक्तिनिरूपणेन ॥ १२५ ॥

नाज्ञानमिति । सुषुप्तिगतस्य पुंसः अज्ञानं नास्त्ययं सुप्तः पुरुषो गाढे तमस्यभूत् गाढतमसि मग्नोऽभूदित्युच्यमानं वचनद्वयमनुभव-युक्तिनिरूपणेनानुभवः स्पष्टाज्ञानानुभवस्याहंकारान्वयव्यतिरेकानुभव परामर्शानुपपत्तिगम्यसौषुप्तिकाज्ञानानुभवो वा युक्तिः पुनरुत्थाना-द्यनुपपत्तिः । तयोर्निरूपणेनाविरुद्धतया वचनद्वयस्य परस्पराविरोधेन विविच्यासद्भाववचनं स्पष्टप्रतीत्यभावविषयमेवेति विविच्य ग्राह्य-मित्यर्थः । अन्यथा सद्भाववचनस्य विरोधप्रसङ्गादिति भावः ॥१२५॥

इदानीमन्यदपि सौषुप्तिकाज्ञानाभाववचनमुदाहृत्य परिहरति—

एवं तमोऽपि न बभूव सुषुप्तिकाले
भाषान्तरेण पुरुषः पर एव जीवः ।
निर्बीजतामुपगतः स निरन्वयेन
न स्पष्टमत्र तमसोऽनुभवोऽस्ति यस्मात् ॥ १२६॥

एवमिति । यथा नाज्ञानमस्ति सुषुप्तिगतस्येति वचनम् । एवं भाषान्तरेण शब्दान्तरेण सुषुप्तिकाले तमो न बभूव । पुरुषः पर एव

बभूव परमात्मैव बभूव। स जीवो निर्बीजतां मूलकारणताज्ञानरहिततामुपगत इत्युच्यमानमविरुद्धतया ग्राह्यमित्यनुषङ्गः। अविरोधप्रकारमेवाह—निरन्वयेनेति। स्पष्टाभिव्यक्ताहंकारसम्बन्धाभावेनेत्यर्थः। अत्र—सुषुप्तौ ॥ १२६ ॥

सौषुप्तिकाज्ञानाद्यभावविषयमाचार्यान्तरवचनमप्युदाहृत्य परिहरति—

अज्ञानतज्जमतिहीनतया सुषुप्ते
शुद्धः परोऽसि भगवानसि नित्यमुक्तः।
कामश्च कर्म सकलं च तदा कुतस्त्यं
चित्सागरेऽनवकरे त्वयि तायमाने ॥ १२७ ॥

अज्ञानेति। मतिरन्तःकरणम्। नन्वज्ञानाद्यभावमात्रेण कथं विशुद्धता कामादीनां विद्यमानत्वादित्याशङ्क्य कारणासद्भावसिद्धौ कार्यासद्भावः कैमुतिकन्यायसिद्ध इत्यभिप्रेत्याह—काम इत्यादिना। तदा सुषुप्तावनवकरेऽज्ञानाद्युपाधिशून्ये तायमाने परिपूर्ण इत्यर्थः। तदा अनवकरे तायमाने चित्सागरे त्वयि कामश्च कर्म च सकलं कुतः स्यादित्युच्यमानमविरुद्धतया स्पष्टप्रतीत्यभावविषयत्वेन नेयमित्यर्थः। तस्मात्सुषुप्तावज्ञानमस्त्येवेति भावः ॥ १२७ ॥

ननु सुषुप्तावज्ञानसत्त्वे तत्कार्यदुःखादीनामपि सत्त्वात् कथमात्मनः शुद्धिरुच्यत इत्याशङ्क्याह—

आसीदहंकरणमात्मतमोनिमित्तं
तज्जाग्रतश्च भवतः स्वपतश्च दुःखम्।

आनीय दर्शयति तन्न सुषुप्तिकाले
बीजक्षयादिति भवानतिनिर्मलोऽभूत् ॥ १२८ ॥

आसीदिति। प्रबोधकाल इति शेषः। आत्मतमो निमित्तमिति बहुव्रीहिः। तदहंकरणं स्वपतः स्वप्नाभिमान्यात्मनः दुःखमानीय दर्शयति स्वस्मिन् विद्यमानं स्वसंसृष्टे आत्मनि तादात्म्याध्यासेन संपाद्य दर्शयतीत्यर्थः। तत् दुःखं बीजक्षयात् दुःखहेत्वहंकारक्षयात्। यद्यप्यज्ञानं सुषुप्तौ विद्यते तथापि तन्मात्रस्य दुःखाद्यजनकत्वादाविद्यकाहंकारस्यैव जाग्रत्स्वप्नयोर्दुखादिहेतुत्वदर्शनात्त्वहंकारस्य सुषुप्तौ नष्टत्वान्न तव दुःखादिकमिति शुद्धत्वमुच्यत इत्यर्थः॥ १२८ ॥

ननु दुःखादेराहंकारिकत्वे पारमार्थिकत्वं स्यात्। न चाहंकारस्याज्ञानकार्यत्वात् तज्जन्यस्य मिथ्यात्वमज्ञानस्य ज्ञानाभावत्वेनाहंकारकारणत्वानुपपत्तेरित्याशङ्कयाहंकारं प्रति कारणत्वसिद्ध्यर्थमुक्तमज्ञानभावत्वं स्मारयति—

सद्रूपमावरणतानुभवादभीष्ट-
मज्ञानमात्मचिति नैशतमोवदेतत्।
ज्ञानं दिवाकरवदस्य जडप्रकाश-
रूपं निवर्त्तकमिति प्रवदन्ति धीराः ॥ १२९ ॥

सद्रूपमिति। भावरूपमसद्विलक्षणमित्यर्थः। आत्मचित्यात्मचैतन्य एतदनुभूयमानमज्ञानं सद्रूपमिति प्रतिज्ञा तत्र पूर्वोक्तमेव हेतुं स्मारयति—आवरणतानुभवादिति। आवरणत्वादिति हेतुर्विवक्षितः। आवारकत्वे प्रमाणमुक्तम्—अनुभवादिति। मूढोऽस्मीत्यनुभवादज्ञान-

स्यावारकत्वमित्यर्थः । नैशतमोवदन्धकारवदिति दृष्टान्तनिर्देशः इदानीं प्रकाशनिवर्त्यत्वादपि तमोवदज्ञानं भावरूपमेवेत्युक्तमाह— ज्ञानमिति । यथा दिवाकरस्तमोनिवर्त्तकः तथा ज्ञानमप्यज्ञानस्य निवर्त्तकमिति वदन्तीति सम्बन्धः । ननु स्वरूपज्ञानस्याज्ञानसाधकत्वात्कथं तन्निवर्त्तकत्वमित्याशङ्क्य यद्यपि तस्य केवलस्य न निवर्त्तकत्वं तथापि वाक्योत्थाखण्डाकारवृत्तिप्रतिफलितस्य तन्निवर्त्तकत्वमस्त्येवेत्याह—जडेति । जडप्रकाशान्तःकरणवृत्तिप्रतिफलितत्वात्तद्रूपमित्यर्थः ॥ १२९ ॥

न केवलमस्माभिरेवाज्ञानस्य भावत्वमुच्यते किन्तु स्वप्रकाशसंवेदनं तद्विषयाज्ञानमभ्युपयद्भिर्वादिभिरपि तत्प्रथममेव वक्तव्यमित्याह—

प्रावादुकैरपि तथैव तदेषितव्यं
संवेदनेऽस्फुरणमभ्युपयद्भिरग्रे ।
संवेदनं न खलु संविदभावरूप
मज्ञानमभ्युपगतं न च बुद्ध्यभावः ॥ १३० ॥

प्रावादुकैरपीति । वादिभिरित्यर्थः । तथैव भावत्वेनैव तदज्ञानमस्फुरणमितिच्छेदः । अग्रे प्रथमं स्वप्रकाशरूपेऽपि संवेदने तत्स्वरूपस्वप्रकाशत्वविषयसन्देहात्तद्विषयाज्ञानं वक्तव्यं तथा च तद्भावस्वरूपमेवेषितव्यमित्यर्थः । ननु स्वप्रकाशसंवेदनेऽज्ञानं ज्ञानाभाव एव किन्न स्यात् तत्राह—न खल्विति । नाभ्युपगतमभ्युपगन्तुं न शक्यमित्यर्थः । तत्र हेतुः—नचेति । चो हेतौ । यतो बुद्ध्यभावः संविद्विषयज्ञानाभावो नास्ति । संविदः स्वयमेव प्रकाशादतो ज्ञानाभावाभावादेव संवेदनेऽज्ञानं ज्ञानाभावो न भवतीत्यर्थः ॥ १३० ॥

तस्मात्सुषुप्तावप्यज्ञानस्य सत्त्वेपि तत्कार्याहंकाराभावेन दुःखाद्यभावात् नाज्ञानसत्त्वमात्मशुद्धिविरुद्धमितिशुद्धिप्रतिपादकानि श्रुत्याचार्यवाक्यानि न विरुद्धानीत्युपसंहरति—

तस्मादशेषजगदेकनिदानभूत-
मज्ञानमात्मविषयं न विरुद्धमूचुः ।
वेदावसानवचनानि मुनीश्वराश्च
स्थानेषु भूरिषु ततोऽवकरो न कश्चित् ॥१३१॥

तस्मादिति । यस्मादज्ञानस्य भावरूपत्वेन तत्कार्यत्वमहंकारस्य यस्माच्चाहंकाराभावादेव दुःखाद्यभावः तस्मान्न विरुद्धं न शुद्धत्वनित्यमुक्तत्वसत्संपत्त्यादिविरुद्धमित्यर्थः । यतो न विरुद्धं ततः सत्संपत्तिप्रतिपादकवेदान्तवाक्यस्य शुद्धत्वादिप्रतिपादकाचार्यवचनस्य च न किंचिदवद्यमित्याह-वेदावसानवचनानि मुनीश्वराश्च भूरिषु स्थानेषूचुरिति भूरिषु बहुषु स्थानेषु तत्तदात्मशुद्धिप्रकरणेषु ऊचुः शुद्धत्वादिकमिति शेषः । ततस्तत्रावकरो दोषः ॥ १३१ ॥

ननु सुषुप्तिकालेऽज्ञानमङ्गीकृतं चेत् केन तर्हि तदनुभवः । आत्मनेति चेन्न । तस्यान्तःकरणं विनाऽनुभवितृत्वानुपपत्तेः । तस्य च तदानीमभावात् अन्यथा प्रमातृत्वेनाहमुल्लेखापत्तेरित्याशङ्क्य यद्यपि चैतन्यप्रकाशस्यात्मनः स्पष्टानुभवितृत्वलक्षणप्रमातृत्वेऽन्तःकरणापेक्षा तथापि साक्ष्यसम्बन्धमात्रप्रयुक्तसाक्षित्वलक्षणानुभवितृत्वस्याज्ञानमात्रायतत्त्वात्तस्य च तदानीमपि भावादात्मना साक्षित्वाकारेणाज्ञानानुभवः संभवतीत्याह—

साक्षित्वमात्मतमसा मतिकञ्चुकेन
मातृत्वमेतदपि नेह सुषुप्तिकाले ।

यद्धेतुकं भवति यन्न हि तद्विना त-

त्संभाव्यते न च तदत्र सुषुप्तिकाले ॥ १३२ ॥

साक्षित्वमिति । आत्मनः साक्षित्वमात्मतमसा आत्माज्ञानमात्रेणैव भवति नान्तःकरणादिकमप्यपेक्ष्येत्यर्थः । न च साक्षादीक्षत इतीक्षणक्रियाकर्तुरेव साक्षित्वात्तस्याश्च तदानीमभावात् कथं साक्षित्वाकारेणाप्यज्ञानानुभव इति शङ्क्यं साक्ष्यसम्बन्धमात्रस्यैव चैतन्यस्यापेक्षणात् कर्तृत्वस्य दिव्यादित्यः प्रकाशत इतिवत्स्वरूपप्रकाशमात्रसम्बन्धेनोपचारादुपपत्तेरिति भावः । तर्हि प्रमातृत्वमपि तदा स्यात् न तस्यान्तःकरणोपाधिकत्वात्तस्य च तदाभावादित्याह— मतिकञ्चुकेनेति । मतिरन्तःकरणं तदेव कञ्चुकमुपाधिः तेनात्मनः प्रमितिकर्तृत्वलक्षणं प्रमातृत्वं भवति । अन्तःकरणस्य च तदा अभावादेतत्प्रमातृत्वं सुषुप्तिकाले नास्तीत्यर्थः । अपिशब्दो दृष्टान्तार्थः । यथाऽज्ञानसाक्षित्वमस्ति नैवमेतदित्यर्थः । यथाहंकारादिकमस्मिन् नास्ति तथा तद्धर्मप्रमातृत्वादिकमपि नास्तीति वार्थः । ननु प्रमातृत्वस्यान्तःकरणहेतुकत्वेपि तदभावेपि किं न स्यात् । नहि दण्डहेतुको घटो दण्डाभावे नास्तीत्याशङ्क्य न हि दण्डवदन्तःकरणस्य प्रमातृत्वं प्रति निमित्तकारणत्वं किन्तूपाधित्वमेवोपाध्यभावे चौपाधिकाभावः स्फटिकलौहित्यादिषु दृष्ट इत्याह—यद्धेतुकमिति । यदुपाधिकमित्यर्थः । तम्—उपाधिम् । तदितिपाठे उपाधिरूपवस्त्वित्यर्थः । तदौपाधिकं स्वसन्निधौ स्वसंसर्गिणि स्वधर्मासञ्जकस्यैवोपाधित्वादिति भावः । अत्र प्रयोजकसद्भावं व्यावर्त्तयति—न चेति । तद्—अन्तःकरणम् ॥ १३२ ॥

नन्वनुभवानुरोधेनाज्ञानाद्यसत्त्वमेवात्मनः शुद्ध्यर्थं सुषुप्तौ कल्प्यतां किमर्थंकष्टकल्पत्या अज्ञानसत्वं कल्प्यते । परामर्शस्य भ्रान्तित्वेनाप्यु-

पपत्तेरित्याशङ्क्य शुद्धेरन्यथाप्युपपत्तेः । अज्ञानाभावे सुषुप्तेर्मोक्षरूपत्वप्रसङ्गाच्च । परामर्शबाधकाभावाच्चाज्ञानसत्वं कल्पनीयमित्याह—

अज्ञानमस्ति सकलं च सुषुप्तिकाले
तत्र प्रलीनमिति यद्यपि नास्ति पुंसः ।
स्पष्टानुभूतिरपवर्गविलक्षणत्वा-
देषृव्यमेव तु सुषुप्तिभुवस्तथात्वम् ॥ १३३ ॥

अज्ञानमिति । तत्राज्ञाने सुपुप्तिकालेऽज्ञानमस्ति । तत्र च सकलं लीनमित्येवंरूपेण स्पष्टानुभूतिः पुंसो यद्यपि नास्ति तथापि सुषुप्तिभुवः सुपुप्तिलक्षणस्थानस्य तथात्वमज्ञानवत्त्वमेष्टव्यमेव तत्र हेतुः अपवर्गविलक्षणत्वादिति । अन्यथा सुषुप्तिसुलभा मुक्तिः स्यादिति भावः ॥ १३३ ॥

नन्वज्ञानस्य सुपुप्तावपि सत्त्वे कर्तृत्वादिवदागमापायित्वाभावात् चैतन्यवत्स्वाभाविकमेव तत्स्यादिति शङ्कते—

एवं सतीह तमसो न विविच्य वस्तु
साक्षान्निवेदयितुमस्ति निदर्शनं चेत् ।
नैतत्परागवगतेर्विषयो विभाति
गाढं तमो न तु तथाऽवगतिः प्रतीचि ॥ १३४ ॥

एवंसतीति । सुषुप्तावप्यज्ञाने सतीत्यर्थः । इह व्यवहारभूमौ वस्तु—आत्मवस्तु साक्षात्स्पष्टं निदर्शनं व्यतिरेकप्रदर्शनं स्थलं जाग्रद्दृष्टस्य स्वप्नेऽभावात् स्वप्नदृष्टस्य च सुषुप्तावभावादागमापायित्वात् स्थूलसूक्ष्मशरीरतद्धर्मस्यात्मस्वरूपत्वं नास्ती-

त्युक्तमज्ञानस्य तु सुषुप्तावपि भावात् तद्व्यतिरेकस्थलान्तराभावा-न्मुक्तेश्च शोधितात्मस्वरूपत्वेनानिदर्शनस्थलत्वात् नागमापायित्व-मतश्चैतन्यवत्स्वाभाविकं स्यादिति न तद्व्यतिरेकेणात्मा ज्ञातुं शक्यत इत्यर्थः । अज्ञानस्यागमापायित्वेन स्थूलसूक्ष्मवदात्मव्यतिरेकासंभवेपि दृश्यत्वेन तद्व्यतिरेकस्य सुकरत्वात् । नात्र मतिक्लेशापेक्षेत्यभिप्रेत्या-ज्ञानस्य दृश्यत्वमात्मनश्च तदभावमाह—नैतदिति । गाढं तमः पराग-वगतेर्ममाज्ञानमिति प्रत्यगभिन्नत्वेनावगतेः विषयो विभाति । प्रती-च्यस्मत्प्रत्ययविषये प्रत्यगात्मनि तथा पराक्त्वेनावगतिर्नास्ति ॥१३४॥

फलितमाह—

प्रत्यक्पराग्विषयवस्तुविवेचनाय
क्लेशो न संभवति कस्यचिदत्र जन्तोः ।
दृश्यं तमो घटपटादिवदेष तस्य
द्रष्टा सुषुप्तिभुवि चिद्घनविग्रहोऽभूत् ॥१३५॥

प्रत्यगिति । प्रत्यक् च पराग्विषयश्च प्रत्यक्परागविषयौ तावेव वस्तुनी तयोरित्यर्थः । विवेचनाय विविच्य ज्ञानाय कस्यचित् स्थूल-मनेरपि जन्तोः क्लेशो न संभवति पराचः प्रतीचश्चेदमस्मत्प्रत्ययविष-यत्वेन भेदस्यातिस्फुटत्वादित्यर्थः । ननु जागरिते स्यादयं विवेकः स्पष्टत्वात् । सुषुप्ते तु कथं भवतीत्याशङ्क्योत्थितस्य मूढोऽहमस्वाप्स-मिति परामर्शानुपपत्तिकल्प्यमानसौषुप्तिकाज्ञानानुभवस्यापि पराग्वि-षयत्वेनैव कल्प्यमानत्वात् विवेकः सम्भवतीत्याह—दृश्यमिति । परा-गनुभवविषयः एषः प्रत्यगात्मा तस्याज्ञानस्य द्रष्टृत्वं चाविकारितया तत्साक्षित्वमित्याह—दृश्यमिति । चिद्घनेति ॥ १३५ ॥

एवं जाग्रदादिदृष्टानां स्थूलसूक्ष्मकारणानामात्मस्वरूपत्वमात्मनश्च तद्द्रष्टृत्वादिना तद्व्यतिरेकितां चोक्त्वेदानीं जाग्रदाद्यवस्थासम्बन्धराहित्यमात्मनः कैमुतिकन्यायेन दर्शयति—

तिस्रोऽपि चिद्घनतनोस्तव दृश्यभूता
दूरे चकासति मतेर्बहिरेव तावत् ।
आविस्तिरोभवनधर्मतया ह्यवस्थाः
कः संकरो विमलचिद्वपुषस्तवाभिः ॥१३६॥

तिस्रोऽपीति । जाग्रत्स्वप्नसुषुप्तिलक्षणास्तिस्रोऽप्यवस्थाः चिद्घनतनोस्तवदृश्यभूता अतो विमलचिद्वपुषस्तवाभिरवस्थाभिः कः संकरः सम्बन्धः न कोऽपीत्यर्थः किंचान्तः करणस्यापि नावस्थाः स्वरूपं भवन्ति तद्व्यभिचारादित्याह—दूर इति । बहिरित्यनेन धर्मतया अवस्थानां मतिस्वरूपत्वप्रसक्तावुक्तं दूर इति । तस्या अस्वाभाविक्यः चकासति भासन्ते । तस्याः स्वाभाविकधर्मा न भवन्तीत्यर्थः । तत्र हेतुः आविरिति । आविर्भावतिरोभावलक्षणधर्मवत्त्वेनान्तःकरणे सत्यप्यवस्थानामागमापायित्वादित्यर्थ ॥ १३६ ॥

ननु माभूदात्मनोऽवस्थासम्बन्धः अवस्थावदन्तःकरणाश्रयत्वं तु वक्तव्यमद्वैतमतेऽन्तःकरणस्यान्याश्रयत्वस्वातन्त्र्ययोरनुपपत्तेः अतोऽवस्थावदन्तःकरणप्रयुक्ताशुद्धिः स्यादित्याशङ्क्यान्तःकरणस्य सावस्थस्य त्वयि कल्पितत्वान्न तत्प्रयुक्ताशुद्धिरित्याह—

त्वय्येव कल्पितमहंकरणं बिभर्ति
तिस्रोऽपि ताः सहितमेव तु तच्च ताभिः ।
त्वच्चित्प्रकाशविषयत्वमुपेत्य भाति
स्वाज्ञानवत्तव न रूपमतश्चतुष्कम् ॥१३७॥

त्वय्येवेति । एतावता ग्रन्थसंदर्भेण प्रतिपादितोऽप्यर्थो मन्दबुद्ध्य-नुग्रहाय त्वय्येवेत्यादिना श्लोकचतुष्टयेनैकत्र संगृह्य प्रदर्शित इति न पौनरुक्त्यदोष इति द्रष्टव्यम् । त्वयि कल्पितमेवेति सम्बन्धः । बिभर्ति भजते ताः अवस्था अहंकारस्य च सुषुप्त्यवस्थावत्वं स्वोपरमलक्षण-सुषुप्तिप्रतियोगित्वेन वा कारणात्मना विद्यमानत्वाद्वेति मन्तव्यम् । कल्पितत्त्वे हेतुमाह—सहितमित्यादिना । ताभिरवस्थाभिः सहितमन्तःकरणं क्वचित्प्रकाशविषयत्वमुपेत्यैव भाति न स्वतः जडत्वात् तथा च दृश्यत्वात् कल्पितमित्यर्थः । कल्पितत्वसाधनफलमाह—स्वाज्ञानवदिति । रूपं स्वाभाविकं चतुष्कमन्तःकरणमवस्थात्रयं चेत्यर्थः । अथवा— अन्तःकरणस्यावस्थात्रयवत्वे कथं तस्मादात्मनो विवेकः समुदा-यव्यतिरेकस्थलाभावादित्याशङ्क्याज्ञानवदात्मचैतन्याभास्यत्वाद्विवेकः सम्भवतीत्याह—सहितमिति । किञ्चावस्थावदहंकारस्यात्मभेदाभेदा-भ्यामनिरूपणाच्चात्मनि कल्पितत्वमतो न तत्त्वद्रूपमित्याह—

नान्वेति तत्तव चिता व्यतिरेकिता च
दूरे न संभवति तस्य चतुष्टयस्य ।
नाभावरूपभजनाय समर्थमेत-
देवं चिदेव तु चतुष्टयमेतदासीत् ॥ १३८ ॥

नान्वेतीति । तच्चतुष्कं तव चिता त्वत्स्वरूपचैतन्येन नान्वेति न तादात्म्येन सम्बध्नाति । जडाजडस्वभावविरोधात्तस्य चतुष्टयस्य व्यतिरेकिता ऽऽत्मभिन्नता दूरे न संभवति । जडस्य तस्य स्वतः प्रकाशासंभवात् प्रकाशात्मसम्बन्धासंभवाच्च तत्प्रतीत्यभावप्रसङ्गादि-त्यर्थः । अभेदपक्षे प्रकाशात्माभेदात् प्रतीतिसंभवेपि भेदपक्षे तु प्रतीतिरेव न संभवति कुतस्तदेकमूलवस्तुसिद्धिरित्यभिप्रायेण दूर इत्युक्तम् । न च तस्यासत्त्वमेवास्तु तावतापि न कल्पितत्वपरिशेष

इति शङ्क्यम् । अपरोक्षप्रतीत्यनुपपत्तेरित्याह—नाभावेति । अभावशब्दोऽसत्पर्यायः । एतच्चतुष्कं फलितमाह—एवमिति । वस्तुत आत्मनो भिन्नत्वादिरूपेण दुर्निरूपत्वमेवंशब्दार्थः । चैतन्यमेव स्वाज्ञानेन रज्जुरिव सर्परूपेणाहमादिरूपेण प्रतीयते । ततो दृश्यमानाहमादिचतुष्टयस्य चैतन्यमेव वास्तवस्वरूपं दृश्यमानरूपं तु कल्पितमतस्तत्प्रयुक्ताशुद्धिर्नास्तीत्यर्थः ॥ १३८ ॥

नन्वहमादिचतुष्टयस्य मिथ्यात्वेऽऽत्मनोपि तत्सम्बन्धाश्रयत्वात् तद्वन्मिथ्यात्वं स्यादित्याशङ्क्य व्यभिचारिष्वेव रज्ज्वां प्रतीयमानस्रक्सर्पादिषु मिथ्यात्वदर्शनात् अव्यभिचारिण्यां रज्ज्वां च तद्दर्शनादात्मनश्चाव्यभिचारादुक्तानुमानं व्यभिचारित्वलक्षणोपाधिग्रस्तमव्यभिचारित्वलक्षणप्रत्यनुमानग्रस्तं चेत्यभिप्रेत्याह—

जाग्रत्स्वप्नसुषुप्तिमूर्च्छिततनूनिष्क्रान्त्यवस्थासु य-
च्चैतन्यं व्यभिचारिणीष्वनुगतं तत्सत्यमेवाऽऽत्मनः ।
यत्किञ्चिद्व्यभिचारि तन्ननु मृषा स्रक्सर्पदण्डादिव-
न्नानुस्यूतचिदात्मवस्तु वदितुं शक्यं मृषा रज्जुवत् ॥१३९॥

जाग्रदिति । मूर्च्छिता तनुर्यस्यामवस्थायां सा मूर्च्छिततनुः निष्क्रान्तिर्मरणमवस्थापदस्य जाग्रदादिभिः प्रत्येकं सम्बन्धः । व्यभिचारिणीषु परस्परव्यभिचारिणीष्वनुगतमनुस्यूतं व्यभिचारिणीषु जाग्रदाद्यवस्थासु यदात्मनः स्वरूपभूतं चैतन्यमनुगतं तत्सत्यमेव न तु मृषेत्यर्थः । चैतन्यानुगत्यभावे चावस्थासिद्धिरेव न स्यादिति द्रष्टव्यम् । अनुगतमित्यनेन व्यभिचारित्वोपाधेः साधनाव्यापकत्वमुक्तं साध्यव्यापकत्वमाह—यत्किञ्चिदिति । ननुशब्दः प्रसिद्धौ स्रक्सर्पदण्डादिवत् रज्ज्वारोपितस्रगादिवद्व्यभिचारि यद्रज्जुसर्पादि तत्खलु मृषादृष्टं

नान्यत्तथा च मृषात्वे व्यभिचारित्वमेव प्रयोजकमित्यर्थः । अव्यभिचारित्वलक्षणासत्प्रतिपक्षहेतोर्व्याप्तिमाह—नानुस्यूतेति स्वस्मिन्प्रतीयमानजाग्रदाद्यवस्थास्वनुस्यूतो यश्चिदात्मा स एव वस्तुरज्जुवत्सर्पाद्याधाररज्जुवन्मृषा वदितुं न शक्यमिति सम्बन्धः । यत्स्वस्मिन् प्रतीयमाननिखिलपदार्थानुस्यूतं तन्न मृषा यथा स्रक्सर्पदण्डाद्यनुस्यूता रज्जुः आत्मा च जाग्रदाद्यवस्थानुस्यूतः तस्मान्न मृषेति वक्तु शक्यमित्यर्थः । तथा च व्यभिचारित्वाद्व्यन्तःकरणावस्थानामव्यभिचार्यात्मैव वास्तवस्वरूपमिति भावः ॥ १३९ ॥

अन्तःकरणावस्थानामात्माज्ञानकार्यत्वादपि तासामात्मैव वास्तवस्वरूपमित्याह—

जाग्रत्स्वप्नसुषुप्तिधर्मकमिदं चित्तं त्वदज्ञानतः
प्रादुर्भूतमतस्त्वमेव सततं त्वत्तो न तद्भिद्यते ।
स्वाज्ञानं च तवानुभूतिवलतः सिद्धं मृषा तत्त्वतो
नाऽऽसीदस्ति भविष्यतीति भवतः पूर्णा चितिः शिष्यते
॥ १४० ॥

जाग्रदिति । जाग्रत्स्वप्नसुषुप्तयो धर्माः यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । चित्तमन्तःकरणं त्वदज्ञानतः त्वत्स्वरूपचैतन्याश्रयाज्ञानात् प्रादुर्भूतं ततः किमित्यत्राह—अत इति । यतः सावस्थचित्तं त्वदज्ञानादेव कल्पितमतस्तत्तादृशं चित्तं सततं कालत्रयेपि त्वमेव न तु त्वत्तो वस्तुतो भिद्यते । यद्यदज्ञानजं तत्तदात्मकं न तु ततः पृथक् सदिति व्याप्तेरज्जुसर्पादौ दृष्टत्वादतस्तत्प्रयुक्ताशुद्धिर्नास्तीत्यर्थः । नन्वज्ञाने नैत्राशुद्धिः प्राप्ता न तस्यापि दृश्यत्वेन मिथ्यात्वादित्याह—स्वाज्ञानं चेति । स्वाज्ञानं च यतस्तावनुभूतिवलात्सिद्धमतो

मृषैव तत्त्वतस्तु नासीन्नास्ति न भविष्यति । कालत्रयेपि वस्तुतो नास्तीत्यर्थः । तस्मादाविद्यकाहंकारस्यैव कर्तृत्वभोक्तृत्वाशयनायाद्युपप्लवावस्थादिधर्मकत्वादविद्यायास्तत्कार्यस्य चाहंकारादिवर्गस्य दृश्यत्वागमापायित्वादिना प्रत्यग्रूपसम्बन्धाभावात्प्रत्यग्रूपस्य च सर्वत्र सर्वदाहंकारादिसाक्षितयानुस्यूतत्वान्नित्यशुद्धबुद्धमुक्तासङ्गपरिपूर्णकूटस्थसत्यपरमानन्दस्वभावस्त्वमेक एव शिष्यसे इत्युपसंहरति—इतीति । इतिशब्दो हेतौ । यतः शरीरत्रयतद्धर्माः सर्वदा मृषैवातः परिपूर्णा परिच्छेदत्रयरहिता भवतश्चितिः भवत्स्वरूपचैतन्यं शिष्यते केवलीभवतीत्यर्थः ॥ १४० ॥

किंच यच्चैतन्मयोक्तं तद्वै शिषिकादिमतवन्न युक्तिमात्रसिद्धं किन्तु स्वतः प्रमाणश्रुतिमस्तकवाक्यसिद्धमतोऽत्यन्तं श्रद्धेयमित्याह—

ज्योतिर्ब्राह्मणवाक्यमानबलतः सम्पूर्णरूपा चिति-
र्जाग्रत्स्वप्नसुषुप्तिधर्मरहिता मोक्षाय निश्चीयते ।
तस्मादस्मदुदीरितं स्वकवपुः श्रद्धत्स्व मानं विना
नास्माभिः प्रतिपादिता चितिरियं वाक्यार्थसम्बन्धिनी
॥ १४१ ॥

ज्योतिर्ब्राह्मणेति । ज्योतिर्ब्राह्मणवाक्यमेव मानं प्रमाणं तद्बलतः तत्तात्पर्यादित्यर्थः । तत्र हि किं ज्योतिरेवायं पुरुष इत्युपक्रम्यात्रायं पुरुषः स्वयंज्योतिर्भवतीत्यन्तेन । आदित्यादिज्योतिरपवादेन विशुद्धचैतन्यमेव निखिलव्यवहारसाक्षितया ज्योतिरिति प्रदर्श्य ततः स्वप्नादिखण्डिकायां सधीः स्वप्नोभूत्वेत्यादिना कर्तृत्वादेर्बुद्ध्युपाधिकत्वमुपवर्ण्य दृष्ट्वैव पुण्यं च पापं चेत्येवकारेणावस्थादिसम्बन्धराहित्येनासंगत्वमुपवर्ण्यैषोऽस्य परमानन्द इत्यादिना परमानन्द-

स्वभाव एवायमात्मेति दर्शितं तदिदमाह—जाग्रत्स्वप्नसुषुप्तिधर्मरहितेति। जाग्रदादिभिस्तद्धर्मैश्च रहितेत्यर्थः। मोक्षाय मोक्षसाधनवाक्यार्थज्ञानाय तत्त्वमादिवाक्यार्थसम्बन्धित्वेनेत्यर्थः। श्रुतिसिद्धप्रदर्शनफलमाह—तस्मादिति। यस्माच्छुद्धं चैतन्यं श्रुतिसिद्धं तस्मादस्मदुदीरितं स्वकवपुः त्वत्स्वरूपं श्रद्धत्स्व। अस्माभिश्च वाक्यार्थसम्बन्धिनी तत्त्वमादिवाक्यार्थोपयोगित्वंपदलक्ष्यभूतेयं चितिर्मानं विना न प्रतिपादिता किन्तु श्रुतिमानपूर्वमेव प्रतिपादितेत्यर्थः ॥१४१॥

उपपादितं त्वंपदार्थशोधनमुपसंहरति—

एवं त्वंपदलक्ष्यवस्तु भवता यत्पृष्टमासीत्पुरा
तन्निर्णीतमतोऽन्यदस्ति यदि ते चित्तस्थितं पृच्छ तत्।
बुद्धिस्थं कुरु पूर्वमुक्तमखिलं यद्वक्ष्यमाणं च तद्
बोद्धुं धारय ते मनः स्थिरतरं श्रद्धाधनाद्याश्रयः ॥ १४२ ॥

एवंत्वमिति। भवता यत्त्वंपदलक्ष्यवस्तु पुरा पृष्टमासीत् तन्निर्णीतम् एवमुपसंहृत्य शिष्यस्य नैतावता कृतकृत्यता किन्तु वाक्यार्थज्ञानादेव तच्च तत्पदार्थज्ञानं विना न सम्भवतीति तत्पदलक्ष्यमपि व्युत्पादयितुं नाबुभुत्सितं बोधयेदिति न्यायेन बुभुत्सानुरोधेन बोधयितुं बुभुत्सामुद्भावयति—अतोऽन्यदिति। अतस्त्वंपदलक्ष्यादन्यत् चित्तस्थितं बुद्धिस्थमस्ति यदि तत्पृच्छ यदीत्यवधारणे पदार्थद्वयज्ञानस्यापि वाक्यार्थज्ञाने कारणत्वात् प्रतिपन्नस्त्वंपदार्थोऽपि न विस्मरणीय इत्याह—बुद्धिस्थमिति। अखिलमवस्थातद्विवेचनादिकं श्रद्धादेरपि कारकत्वात् श्रद्धादिपूर्वं वक्ष्यमाणार्थे चेतःस्थैर्यसंपादयेत्याह—यद्वक्ष्यमाणमिति। श्रद्धा प्रमेयबोधाभिलाषः सैव धनमादि-

पदेन शान्त्यादिकं गृह्यते। तदाश्रयः सन् यश्च तत्पदार्थस्वरूपादिकं वक्ष्यमाणं तद्बोद्धुं ते मनः स्थिरतरं धारयेति सम्बन्धः ॥ १४२ ॥

एवं शिष्यो गुरुणानुज्ञातः सन्नुक्तार्थानुवादपूर्वकं तत्पदार्थ-जिज्ञासां दर्शयतीत्याह—

इत्युक्ते गुरुणा स पृच्छति पुनस्त्वंशब्दलक्ष्यं मम
ज्ञातं न्यायबलेन पूर्वमुदितावस्थात्रयापोहनात् ।
तच्छब्देन तु लक्ष्यमर्थमधुना बोद्धुं मनो मामकं
धावत्याशु तमप्यपोह्य सकलद्वैतप्रपञ्चं वद ॥ १४३ ॥

इत्युक्त इति । इत्येवं गुरुणोक्ते सतीत्यर्थः । स शिष्यः पुनः पुनरपि पृच्छति । पूर्वं न्यायबलेनागमापायादियुक्तयोदितं प्रतिपादितं यदवस्थात्रयापोहनमवस्थात्रयादेरनात्मत्वेन निश्चयः तस्माद्धेतोः ततो निष्कृष्टमसङ्गकूटस्थानुभवरूपत्वंपदलक्ष्यं मम ज्ञातमधुना तच्छब्देन तत्त्वमसिवाक्यस्थतत्पदेन लक्ष्यमर्थं बोद्धुं मामकं मदीयं मनो धावति तत्परं वर्त्तत इत्यर्थः । आशु शीघ्रं तं तत्पदलक्ष्यार्थमपि सकलं द्वैतप्रपञ्चमपोह्यानात्मत्वेन परित्यज्य वदानुगृहाणेत्यर्थः ॥१४३॥

एवमाचार्यप्रवृत्त्यर्थं भवदुक्तार्थं च न विस्मरामि वक्ष्यमाणार्थे च मनः स्थिरतरं करोमीत्युक्त्वा प्रश्नप्रकारमाह—

किं सप्रपञ्चमिदमस्त्वथ वा समस्त-
द्वैतप्रपञ्चरहितं परिपूर्णरूपम् ।
यद्वोभयात्मकमिदं परमार्थतोऽस्तु
विष्णोः परं पदमितीह विचारणीयम् ॥ १४४ ॥

किं सप्रपञ्चमिति । इदं विष्णोः परमं पदं किं सप्रपञ्चं परमार्थतः सप्रपञ्चस्वरूपमेवास्तु । अथवा मायया सप्रपञ्चं परमार्थतः समस्तद्वैतप्रपञ्चरहितमेव एवं सति परिपूर्णरूपत्वमपि सिद्ध्यतीति । यद्वेदं परमार्थतः सप्रपञ्चत्वनिष्प्रपञ्चत्वलक्षणोभयात्मकमपीति विचारणीयमिति प्रश्नार्थः ॥ १४ ॥

नन्वेतादृशप्रश्नोऽनुपपन्नः एकमेवाद्वितीयं नेह नानास्ति किंचनेत्यादिना निष्प्रपञ्चस्वरूपस्यैव प्रमीयमाणत्वात् जन्माद्यधिकरणे आरम्भणाद्यधिकरणे च तथैव दर्शितत्वात् कोट्यन्तरोपस्थापकाभावादित्याशङ्क्य सत्यं तद्वत् "सर्वस्य वशी सर्वस्येशान" इत्यादिसविशेषब्रह्मस्वरूपप्रतिपादकवाक्यानामपि विद्यमानतया कोट्यन्तरोपस्थितिसंभवात् प्रश्न उपपन्न एवेत्याह—

वेदान्तवाक्यगतिरत्र बहुप्रकारा
काचित् कथञ्चिदिति संशय उत्थितो मे ।
तत्त्वं प्रकाशय निवर्त्तय मोहमूलं
तत्संशयं मम हिताय भव प्रसीद ॥ १४५ ॥

वेदान्तवाक्येति । गतिः प्रवृत्तिः अत्र ब्रह्मणि बहुप्रकारा सप्रपञ्चत्वप्रतिपादनरूपा निष्प्रपञ्चत्वप्रतिपादनरूपा चेत्यर्थः । ततः किं तत्राह—

काचिदिति । किमुभयरूपप्रवृत्तेर्मुख्यत्वेनोदितानुदितहोमवदुभयमपि पारमार्थिकम् । अथवा—काचिन्मुख्या काचित्कथंचिल्लक्षणया नेतव्येत्यन्यतरदेव परमार्थिकं तत्रापि सप्रपञ्चवाक्यप्रवृत्तेर्मुख्यत्वम् । अन्यस्यास्तु वैपरीत्यमिति सप्रपञ्चत्वमेव परमार्थः । अथवा—निष्प्रपञ्चवाक्यप्रवृत्तेर्मुख्यत्वमितरस्यास्तु वैपरीत्यमितिनिष्प्रपञ्चत्वमेव परमार्थस्वरूपमिति मे विशेषानिर्द्धारणात्संशय उत्थितः । अतस्तत्वं

प्रकाशय मोहमूलं मत्संशयं निवर्त्तय तत्वं प्रकाश्य मोहमूलं संशयं निवर्त्तयेत्यर्थः। संशयानिवृत्तावनर्थपरम्पराया अनिवृत्तेः पुरुषार्था-भावादवश्यं स उच्छेदनीयः। अतस्तदर्थमाचार्यं प्रार्थयते मम हिताय भव प्रसीदेति ॥ १४५ ॥

तत्रोभयविधश्रुतिदर्शनादुभयरूपमपि वास्तवमिति वक्तुमशक्यं तथा हि सप्रपञ्चत्वमपि ब्रह्मणो ज्ञानस्य दोषोपाधिकाप्रामाण्यवदौ-पाधिकं सद्वास्तवमुत चैतन्यवन्निरुपाधिकमेव सत् नाद्य इत्याह –

न स्थानतोऽप्यस्ति परस्य कश्चि-

द्विशेषयोगः परमार्थरूपः।

स्वतः पुनर्दूरनिरस्त एव

परस्य तत्त्वस्य विशेषयोगः ॥ १४६ ॥

न स्थानत इति। स्थानतः पृथिव्याद्युपाधितः परस्य कूटस्थासङ्ग निष्प्रपञ्चब्रह्मणः उपाधितोपि परमार्थरूपः कश्चिद्विशेषयोगो विशेष-सम्बन्धो नास्त्येव विरोधात्। औपाधिकस्य वास्तवत्वानुपपत्तेश्च। न चाप्रामाण्यवत्तदुपपद्यत इति वाच्यं न हि प्रमाणस्य सतो ज्ञानस्य दोषोपाधिनाऽप्रामाण्यमुच्यते किं तु दोषविरहदशायां प्रमाणीभवितुं योग्यस्य तस्य दोषहेतुकमप्रामाण्यमुच्यते। ब्रह्मणश्च वस्तुनो निष्प्र-पञ्चस्य न वस्तुतस्तद्विरुद्धं सप्रपञ्चत्वमुपपद्यत इत्यर्थः। द्वितीयस्तु सुतरां न सम्भवतीत्याह – स्वत इति ॥ १४६ ॥

ननूभयविधश्रुतिदर्शनादुभयरूपत्वं परमार्थत एव न च विरोधः श्रुतिसिद्धेऽर्थे विरोधशङ्काया अनवकाशादुदितानुदितहोमवद् व्यव-स्थोपपत्तेरित्याशङ्क्याह –

स्वभावतश्चिद्घनविग्रहस्य
मृषा ह्युपाधिप्रभवा विशेषाः ।
यथा जपापुष्पनिबन्धनः स्या-
न्मृषा मणेर्लोहितिमा तथैव ॥ १४७ ॥

स्वभावत इति । न हि सप्रपञ्चवाक्यं तात्पर्यवृत्त्या सप्रपञ्चत्वं प्रतिपादयति निष्प्रयोजनत्वात् । किन्तु निर्विशेषब्रह्मप्रतिपत्तिशेषत्वेनैव । न च तात्पर्यतो गम्यस्य वास्तवत्वं सम्भवति न चोपासनया सप्रयोजनत्वात् तच्छ्रुतिस्तात्पर्येण प्रतिपादयतीति शङ्क्यम् । योषिदग्न्यादिवन्मिथ्याभूतत्वेपि तदुपपत्तेः । न च वेदार्थस्य मिथ्यात्वे तदप्रामाण्यं स्यादिति शङ्क्यं विद्यमानार्थकत्वेन तत्प्रामाण्योपपत्तेः । न हि वेदो विशेषः परमार्थ इति बोधयति येनाविद्यमानार्थो भवेत् । कल्पना तु प्रमाणान्तरविरोधान्न प्रवर्तिष्यत इति वक्ष्यति । किंच सर्वगन्धादीनां वास्तवत्वे ब्रह्मणस्तदाकारेण परिणामो वक्तव्यः । न च स संभवति कूटस्थचिद्धातोरित्यभिप्रायेणोक्तं—चिद्घनविग्रहस्येति । न चोदितानुदितहोमवद्व्यवस्थासम्भवः । सिद्धवस्तुनि विकल्पायोगात् । न हि स्थाणुः पुरुषत्वेन प्रतिपाद्यमानः पुरुषो भवति । न वा निष्प्रपञ्चप्रमितिं विनानर्थनिवृत्तिः सम्भवतीत्यर्थः । अत एव सप्रपञ्चत्वमेव पारमार्थिकमिति निरस्तम् । अतः परिशेषाद्वस्तुतो निष्प्रपञ्चं मायया सप्रपञ्चमित्येव तत्त्वमित्याह मृषेति । तत्र दृष्टान्तमाह—यथेति । मणेः स्फटिकमणेः जपापुष्पनिबन्धनो जपाकुसुमोपाधिप्रयुक्तो लोहितिमा यथा मृषा स्यात्तथैव समष्टिव्यष्ट्यात्मकप्रपञ्चोपाधिप्रयुक्ता विशेषा मिथ्येत्यर्थः ॥ १४७ ॥

नन्वीश्वरत्वलक्षणो विशेषो ब्रह्मणि वास्तवः स्वीकर्त्तव्यः । अन्यथा तस्यानीश्वरत्वप्रसङ्गान्न हि कल्पितधनेन कश्चिद्धनी भवति ।

तथा च निरधिष्ठातृकं सज्जगन्न चेष्टेतेत्याशङ्क्येश्वरत्वस्यापि मायोपाधिकत्वेन कल्पितत्वात्तावन्मात्रेणैव जगद्व्यवहारोपपत्तेर्नोक्तदोष इत्याह—

मायोपाधेरद्वयस्येश्वरत्वं
कार्योपाधेर्जीवता च प्रतीचः ।
मिथ्यैव स्याद्बन्धुजीवप्रसून-
संपर्कात्था रक्ततेवाभ्रकादेः ॥ १४८ ॥

मायोपाधेरिति । ईश्वरत्वस्यौपाधिकत्वे दृष्टान्तः—जीवता चेति । औपाधिकस्य मिथ्यात्वे दृष्टान्तमाह—बन्धुजीवेति । बन्धुजीवप्रसूनं बन्धूकपुष्पमभ्रमको धातुविशेषः । आदिपदेन स्फटिकादिकं गृह्यते ॥ १४८ ॥

नन्वोपाधिकस्य मिथ्यात्वं न नियतं भल्लातकादिरसासञ्जितवस्त्रकलङ्कस्य वास्तवत्वात् तस्य यावद्द्रव्यभावित्वात् । न च पटस्तदाकारेण परिणमते येन ब्रह्मणोऽपरिणामित्वात्सप्रपञ्चत्वस्यावास्तवत्वं भवेदित्याशङ्क्य तस्यापि सत्यत्वासंप्रतिपत्तेमैंवमित्याह—

भल्लातकादिरसयोगनिबन्धनं च
वस्त्रे कलङ्कितमनेन यथा निरस्तम् ।
तस्यापि पक्षपतितत्वमभीष्टमेव
तस्मादसौ न भवति व्यभिचारभूमिः ॥ १४९ ॥

भल्लातकेति । कलङ्कितं कलङ्कः अनेन यथौपाधिकधर्माणां मिथ्यात्वसमर्थनन्यायेन निरस्तं सत्यमिति निरस्तम् । न च कलङ्कस्य मिथ्यात्वे यावद्द्रव्यमवस्थानानुपपत्तिः । औपाधिकानां यावदुपाधि सत्वादुपाधीनां च भल्लातकरसानामतिस्निग्धानां वस्त्रेण दृढतरयोगेन विश्लेषासम्भवात् यावद्द्रव्यमवस्थानोपपत्तेः । ततस्तस्यापि पक्षतुल्यत्वान्न तद्व्यभिचारस्थलमित्याह—तस्यापीति । भल्लातकासञ्जितकलङ्कं यस्यासौ भल्लातकासञ्जितकलङ्कः ॥ १४९ ॥

न केवलं ब्रह्मणः सविशेषत्वमुपाधिकल्पितमित्येतद्युक्तिसिद्धं किन्तु श्रुतिसिद्धमिति श्रुतिप्रमाणमुदाहरन्ति ।

यथा ह्ययं ज्योतिरात्मा विवस्वा-
नपो भिन्ना बहुधैकोऽनुगच्छन् ।
उपाधिना क्रियते भेदरूपो
देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥ १५० ॥

यथेति । ज्योतिरात्मा ज्योतिस्वरूपः भिन्ना अपोऽनुगच्छन् शरावादिपात्रभेदेन भिन्नास्वप्सु प्रतिबिम्बित इत्यर्थः । उपाधिना शरावादिनिष्ठजलोपाधिना भेदरूपः क्रियते भिन्नस्वरूपत्वेन प्रतीयत इत्यर्थः । क्षेत्रेषु मायातत्कार्यदेवादिशरीरेषु । यथैकोपि सूर्यः घटशरावोदञ्चनस्थास्वप्सु प्रतिबिम्बितस्तदुपाधिभेदेन भेदवानिव प्रतीयते तथा स्वप्रकाशात्माप्येक एवाज्ञानतत्कार्यदेवादिशरीरेषु प्रतिबिम्बितः जीवत्वेश्वरत्वादिव्यावृत्तरूपेण प्रतीयते । वस्तुतस्तु निर्विशेषनित्यशुद्धबुद्धमुक्तस्वभाव इतिश्रुतेरर्थः ॥ १५० ॥

एवमीश्वरत्वाद्यप्यात्मनो मायोपाधिकं मिथ्यैव न तु वास्तवमित्युक्तम् । अस्यैव दार्ढ्याय मतान्तरं दूषयितुं तदनुवदति—

ऐश्वर्यमस्य परमात्मन उक्तमन्यैः
साक्षात्स्वरूपमवबोधसुखादितुल्यम् ।
तेनेशते किल यथायथमीशितव्या-
न्भृत्यान्प्रतीश्वरतया जगतीभृतोऽपि ॥ १५१ ॥

ऐश्वर्यमिति । सर्ववशित्वाद्यैश्वर्यं सर्वेश्वरत्वं साक्षात्स्वरूपं निरपेक्षस्वरूपम् । ननु हिरण्यगर्भादीनामाधुनिकनरेश्वराणामपि यथा-यथमैश्वर्यं विद्यते तत्कथं चैतन्यादिवदीश्वरत्वं परमात्मनो निरपेक्ष-स्वरूपं स्यात् । असाधारणस्यैव स्वरूपत्वादित्याशङ्क्यात्मस्वरूप-भूतैश्वर्यस्यैव प्राणिषु तारतम्येनाभिव्यज्यमानत्वान्नोक्तदोष इत्य-भिप्रेत्याह—तेनेति । आत्मस्वरूपैश्वर्येण यथायथं यथायोग्यमीश्वर-तयेशत ईश्वरत्वेन वर्त्तन्ते इत्यर्थः । जगतीभृतः—जगद्रक्षका हिरण्यगर्भादयः । अथवैश्वर्यमात्मस्वरूपमित्यत्र प्रमाणमाह—तेनेति । हिरण्यगर्भादिषु विद्यमानमैश्वर्यमात्मस्वरूपमेव सत्तत्राभिव्यज्यत इति वक्तव्यम् । अन्यथा तेषां तत्कार्यभूतानां परतन्त्रतया स्वत ऐश्वर्यायोगादित्यर्थः ॥ १५१ ॥

नन्वीश्वरत्वमीशितव्याद्यपेक्षमुत्पत्त्यादिमच्च प्राणिष्वनुभूयमानं कथमात्मनः स्वरूपं स्यादिति चेन्न सुखादिवदुपपत्तेरित्याह—

नित्यं प्रियादिषु सुखं प्रतिबिम्बितं स-
ल्लोके वदन्ति विषयेन्द्रियसंप्रयोगात् ।
उत्पन्नमन्यदिति तद्वदिहेश्वरत्वं
माया तदुत्थमतिषु प्रतिबिम्बितं सत् ॥ १५२ ॥

नित्यमिति। लोके नित्यमात्मसुखमेव प्रियादिषु निमित्तेषु सत्सु शुभकर्मसम्पादितान्तःकरणवृत्तिषु प्रतिबिम्बितं सत् भाति तथापि विषयेन्द्रियसंप्रयोगवशात् नित्यनिरपेक्षस्वरूपसुखादन्यदेव सुखमुत्पन्नमिति वदन्ति यथा तद्वदीश्वरत्वमप्यात्मस्वरूपमेव मायायां तज्जन्यान्तःकरणेषु च प्रतिबिम्बितं सद्भाति तथाप्युपाधेः विषयादिसापेक्षत्वाज्जन्यत्वाच्च तत्प्रतिबिम्बितमैश्वर्यमपि सापेक्षं जन्यं च प्रतीयत इति न विरोध इत्यर्थः ॥ १५२ ॥

नन्वेवं सति मायोपाधिकस्य सर्वजगदीश्वरस्य बुद्ध्याद्युपाधिकस्य हिरण्यगर्भादिमनुष्यान्तस्य प्राणिनश्चैश्वर्यादितारतम्यं न स्यात् आत्मस्वरूपैश्वरत्वस्य तुल्यत्वादित्याशङ्क्य यद्यप्यात्मस्वरूपैश्वर्यं तुल्यं तथाप्युपाधीनां तारतम्यात्तत्प्रयुक्तमैश्वर्यस्यापि तारतम्यं सुखादितारतम्यवद् भवत्येवेत्याह—

मायानिविष्टवपुरीश्वरबोध एष
सर्वेश्वरो भवति सर्वमपेक्षमाणः।
बुद्धिप्रविष्टवपुरेष तथेश्वरः स्या-
दात्मीयभृत्यजनवर्गमपेक्षमाणः ॥ १५३ ॥

मायेति। मायानिविष्टवपुः मायाप्रतिबिम्बित एष ईश्वरबोधः परचेतनः परमात्मा स्वत ऐश्वर्ययुक्तः अपरिच्छिन्ननिखिलजगत्कारणमायायां प्रतिबिम्बितः सन् सर्वानपेक्ष्येश्वरो भवति कर्माद्यधीनबुद्ध्याद्युपाधौ हिरण्यगर्भादिरूपेण प्रविष्टः सन् यथाक्रमं संपादितकतिचिद्भृत्यवर्गानपेक्ष्येश्वरो भवतीत्युपाधिप्रयुक्तत्वात्तारतम्यस्य नैश्वर्यस्य स्वरूपत्वानुपपत्तिरित्यर्थः ॥ १५३ ॥

ऐश्वर्यस्यात्मस्वरूपत्वसाधनफलं परमात्मविदुषोपि तादृशेश्वराभेदप्राप्त्या तत्प्राप्तिर्भवतीत्याह—

सम्यग्ज्ञानध्वस्तसर्वप्रपञ्चः
स्वीये रूपे निर्गुणे निर्विशेषे ।
पूर्णैश्वर्ये स्वप्रकाशस्वभावे
स्वाराज्येऽस्मिन्स स्वराडेव तिष्ठेत् ॥ १५४ ॥

सम्यग्ज्ञानेति । निर्गुणे गुणरहिते सः परमात्मज्ञान्येवंभूते स्वीये रूपे तिष्ठत्यतः स्वराडनवच्छिन्नैश्वर्ययुक्त इत्यर्थः ॥ १५४ ॥

मुक्तस्याप्यैश्वर्याप्राप्तौ प्रमाणमाह—

ज्ञात्वा देवं सर्वपाशापहानिः
क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्याभिध्यानात्तृतीयं देहभेदे
विश्वैश्वर्यं केवल आप्तकामः ॥ १५५ ॥

ज्ञात्वा देवमिति । तस्येश्वरस्याभिध्यानादाभिमुख्येन प्रत्यक्तया ध्यानादेवं स्वप्रकाशमात्मानं ज्ञात्वा विश्वैश्वर्यमाप्नोतीति सम्बन्धः केन क्रमेण विश्वैश्वर्यमाप्नोतीत्याकाङ्क्षायामाह—सर्वपाशेत्यादि । ईश्वरज्ञाने सति प्रथमं मिथ्याज्ञाननाशात् सर्वपाशापहानिः पाशानामविद्यास्मितादीनां क्लेशाख्यानां हानिः क्लेशहाने च सति कर्माभावाज्जन्ममृत्युप्रहाणिः जन्ममरणलक्षणैहिकामुष्मिकदेहान्तरसम्बन्धस्य प्रकर्षेण नाशः देहभेदे वर्तमानदेहवियोगे च सति तृतीयं क्लेशहानिशरीर-

नाशापेक्षया तृतीयं विश्वैश्वर्यमाप्नोतीति शेषः । ततः केवलः गुणा-रहितः आप्तकामः स्वानन्दात्तृप्तो भवतीति श्रुत्यर्थः ॥ १५५ ॥

श्रुत्यन्तरमप्यस्मिन्नर्थे प्रमाणं दर्शयति—

स स्वराडिति च विद्यते श्रुति-
र्वर्णितेश्वरवपुः प्रकाशिनी ।
तेन सत्यसुखबोधवद्भवे-
दीश्वरत्वमिति केचिदूचिरे ॥ १५६ ॥

स स्वराडिति । स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवतीति श्रुतिरपि मुक्तस्य वर्णितपूर्णैश्वर्यं बोधयन्ती विद्यत इत्यर्थः । फलितमुपसंहरति—तेनेति । येन मुमुक्षुप्राप्यत्वेन विश्वेश्वरत्वाद्यैश्वर्यं श्रूयते तेन तदपि सुखादिवद्वास्तवमित्यर्थः ॥ १५६ ॥

दूषयति—

तन्न भाति चतुरस्रमुच्चकै-
स्तत्प्रमाणविरहादिह श्रुतौ ।
सत्यबोधसुखवन्न तत्परा
सत्युवाच यत ईश्वरश्रुतिः ॥ १५७ ॥

तन्नेति । यदैश्वर्यं वास्तवमिति त्वदुक्तं चतुरस्रं समीचीनं न भावि न सम्भवति । न भातीति च क्वचित्पाठः । तत्र हेतुमाह—तत्प्रमाणेति । मुक्तस्य विश्वैश्वर्ये स्पष्टं प्रमाणाभावादित्यर्थः । ननु श्रुतिरेव प्रमाणं तत्राह—सत्येति । यतः ईश्वरश्रुतिः ऐश्वर्यप्रतिपादक-श्रुतिः तत्परा सती सत्यादिवन्नोवाच । अत ऐश्वर्ये प्रमाणं नास्तीत्यर्थः ॥ १५७ ॥

एतदेव स्पष्टयति –

तत्परश्रुतिवचः प्रमाणकं
सत्यबोधसुखविग्रहं परम् ।
ब्रह्म तद्वदिह नेश्वरत्वभाक्
तत्परश्रुतिवचःप्रमाणकम् ॥ १५८ ॥

तत्परेति । यथा सत्यादिस्वरूपं परब्रह्म तात्पर्योपेतशब्दप्रमाणकं तद्वदीश्वरत्वभाक् ब्रह्म तत्परश्रुतिवचः प्रमाणकं न भवतीत्यर्थः ॥१५८॥

ननूदाहृतश्रुत्या विश्वैश्वर्यविशिष्टं ब्रह्म प्रतीयते न च तस्याः तत्परत्वाभावः हेत्वभावादित्याशङ्क्य वर्त्तमानार्थबोधकतया फलश्रुतित्वमेव तत्र हेतुरित्याह –

या फलश्रुतिरिहोपवर्णिता
सा न तत्परतयावगम्यते ।
तत्त्वमादिवचनं हि तत्परं
तत्परा न तु फलश्रुतिः क्वचित् ॥ १५९ ॥

या फलश्रुतिरिति । स स्वराड् भवति विश्वैश्वर्यं केवल आप्तकाम इत्याद्या न तत्परा फलवचनत्वेनार्थवादत्वादित्यर्थः । किं तर्हि तत्परं प्रमेयविषयमित्याह—तत्त्वमादीति । तत्त्वमादिवचनमेव तात्पर्ययुक्तं प्रमेयविषयत्वादित्यर्थः । ननु फलवचनस्यापि तात्पर्यवत्त्वं किं न स्यादिति चेत् । नैवम् । अन्यत्रादर्शनादित्याह--तत्परेति । क्वचित्कर्मकाण्डे उपास्तिकाण्डे वा ॥ १५९ ॥

नन्वन्यत्र तथात्वेपि प्रकृते फलश्रुतेरैश्वर्यविशिष्टब्रह्मपरत्वं किं न स्यादित्याशङ्क्यातिप्रसङ्गमाह –

सामगानमपि तत्स्वरूपतां
जक्षणं च जगतश्च सर्जनम् ।
अश्नुवीत फलवाक्यतः श्रुतं
तत्स्वरूपमिति यद्युपेयते ॥ १६० ॥

सामगानमिति । एतत्सामगायन्नास्त इति श्रुतिप्रतिपन्नं सामगानं तत्स्वरूपतां ब्रह्मस्वरूपतां जक्षणं भक्षणं जगतः सर्जनं जगत्स्रष्टृत्वमश्नुवीत प्राप्नुयात् तस्य ब्रह्मणः यदि फलवाक्यश्रुतमप्यैश्वर्यं ब्रह्मणः स्वरूपमिष्यते तथा सामगानादिकमप्यर्थवादवाक्यप्रतिपन्नं ब्रह्मरूपतां प्राप्नुयादित्यर्थः ॥ १६० ॥

नन्वर्थवादप्रतिपन्नत्वन्नानुपादेयत्वे हेतुः देवताविग्रहवत्त्वाविद्यानिवृत्त्यादेरङ्गीकारात्तथा च देवताधिकरणन्यायेन सामगानादेरपि विवक्षितत्वं किन्न स्यादिति चेत् भवेदेवं यदि मानान्तरविरोधो न स्यात् । अन्यथा आदित्यस्य यूपत्वमप्युपादेयं स्यादस्ति चात्र मानान्तरविरोधः । मुक्तौ—यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्, अथाकामयमान, इत्यादिना सकलधर्मनिषेधादित्याह—

अर्थवादगतमभ्युपेयतं
न प्रमान्तरविरोधि यन्मतम् ।
सामगानमथ जक्षणादि वा
तत्परश्रुतिविरुद्धमुच्यते ॥ १६१ ॥

अर्थवादेति । अर्थवादवाक्यप्रतिपन्नमित्यर्थः । जक्षणादीत्यादिपदेन स्रष्टृत्वादिकं गृह्यते ॥ १६१ ॥

ननु लक्षणादेस्तत्परनिर्विशेषश्रुतिविरोधाद्विवक्षितत्वं माभू-दीश्वरत्वं तु ज्ञानादिवदात्मस्वरूपं किन्न स्यादित्याशङ्क्य नेति नेतीति तत्परश्रुत्याऽविशेषेणेश्वरत्वस्यापि निषिद्धत्वाज्ज्ञानादेश्च निषेधावधित्वेन नेत्यन्यत्परमस्तीति परिशेषणात् न ज्ञानादिवदी-श्वरत्वस्यात्मस्वरूपत्वमित्याह—

ईश्वरत्वमपि तत्परश्रुति-
र्नेति नेति परिदुःखिता सती ।
वारयत्यवशिनष्टि केवलं
चित्स्वरूपमनवद्य विग्रहम् ॥ १६२ ॥

ईश्वरत्वमपीति । अवशिनष्टि परिशेषयति केवलमैश्वर्याद्य-विशिष्टम् ॥ १६२ ॥

ननु द्विविधमीश्वरत्वं मूर्तामूर्त्तादीशितव्यसापेक्षमेकन्निरपेक्षं च स्वाभाविकं ज्ञानादिवदपरं सर्ववशित्वादि तत्र मूर्त्तादिकं प्रकृत्य निषेधात्सोपाधिकेश्वरत्वस्य निषेधेपि न निरुपाधिकस्या-त्मस्वरूपभूतस्यैश्वर्यस्य निषेधः अतस्तत्परवाक्यविरोधाभावा-दीश्वरत्वमुपादीयतामिति शङ्कते—

सोपाधीश्वरतानिषेधनपरा सा नेति नेति श्रुतिः
साक्षाद्भागवतं निरस्तनिखिलोपाधिस्वरूपं पुनः ।
विश्वैश्वर्यमिहोच्यमानमधुना मोक्षे ततस्तत्परै-
र्वाक्यैरस्य विरुद्धतानवसरो मुख्यं ततो गृह्यताम् ॥१६३॥

सोपाधीति । साक्षान्निरपेक्षं तदेवाह—निरस्तेति । भागवतं सर्वज्ञ-ब्रह्मसम्बन्धीह विश्वैश्वर्यं केवलं आप्तकाम इत्यादौ मोक्षे तत्परैर्वाक्यै

नेति नेतीत्यादिनिर्विशेषात्मप्रतिपादनपरैर्वाक्यैः अस्य निरुपाधि-कैश्वर्यस्य मुख्यं निरुपाधिकैश्वर्यं नेति नेति श्रुतिः सोपाधीश्वरता-निषेधनपरैर्होच्यमानं पुनर्विश्वैश्वर्यं निरस्तनिखिलोपाधिसाक्षा-द्भागवतं स्वरूपं ततः अधुना तत्परैर्वाक्यैरस्य विरुद्धतानवसरः । ततो मोक्षे मुख्यं गृह्यतामिति सम्बन्धः । इह मोक्षे उच्यमानमिति वान्वयः ॥ १६३ ॥

यदीश्वरत्वं द्विविधमिष्यते तर्हि सामगानादेरपि द्विविधत्वमङ्गी-कृत्य नेति नेतीति यत्र त्वस्येत्यादिना सोपाधिकस्य तस्यैव निषेधः निरुपाधिकं तन्न निषिध्यते ईश्वरत्ववदिति गृह्यतामिति प्रतिबन्द्या परिहरति –

सामगानमथ जक्षणं जग-
त्सर्जनं च निरुपाधि गृह्यताम् ।
नेति नेति वचसा निषिध्यते
जक्षणादिकमुपाधिसंश्रयम् ॥ १६४ ॥

सामगानमिति । तथा च ब्रह्मात्मतां प्राप्तस्य सामगानादिमत्वे ब्रह्मणोपि तत्स्यादित्यर्थः ॥ १६४ ॥

ननु सामगानादिद्वैविध्यं नास्ति तत्र प्रमाणाभावात् तथा च नेश्वरत्ववत्तस्य स्वरूपत्वमिति वैषम्यमाशङ्कते—

सामगानमथ जक्षणं जग-
त्सर्जनं न च खलु द्विधेष्यते ।
तत्प्रमाणविरहादिहेति चे-
दीश्वरत्वमपि न द्विधा भवेत् ॥ १६५ ॥

सामगानमिति । इह-श्रुतौ । साम्येन समाधत्ते —ईश्वरत्वमपीति । ईश्वरत्वमपि द्विधा मुख्यामुख्यभेदेन द्विविधं न स्यात् प्रमाणाभावादित्यर्थः । ननु विश्वैश्वर्यमिति श्रुतिरेव मुख्यैश्वर्ये प्रमाणमिति चेत्तर्ह्येतत् साम गायन्नास्त इत्यादि श्रुतिरेव मुख्यसामगानादौ प्रमाणं स्यात् । अथ ब्रह्मात्मतां प्राप्तस्य गेयादिवस्त्वन्तराभावान्न गानादेर्मुख्यत्वमिति तर्हि निरस्तनिखिलोपाधिपरमानन्दस्वरूपं प्राप्तस्येशितव्याभावात् केवलो निर्गुणश्चेति अतोन्यदार्त्तमिति ब्रह्मव्यतिरिक्तस्य सर्वस्याप्यविशेषेण निषेधाच्च नेश्वरत्वमपि स्वाभाविकमिति तुल्यम् । तस्मादीशितव्यसापेक्षमीश्वरत्वमात्मनः स्वरूपं न भवतीति भावः ॥ १६५ ॥

ननु यदीश्वरत्वं सापेक्षमात्मनः स्वरूपं न भवतीत्युच्यते । तदा ज्ञानादेरपि विषयादिसापेक्षत्वादनित्यत्वात् निर्विषयस्याविनाशिनश्च ज्ञानस्याभावात् ज्ञानमप्यात्मस्वरूपं न स्यादित्याशङ्क्य निर्विषयाविनाशिज्ञानाभावोऽसिद्धः तस्य प्रमाणसिद्धत्वादित्याह—

ज्ञानमस्ति खलु बाह्यगोचरं
निर्विशेषमविनाशि च द्विधा ।
बाह्यगोचरमपोह्य केवला
स्वापमोक्षसमये चितिः स्थिता ॥ १६६ ॥

ज्ञानमिति । ज्ञानं द्विधास्तीति सम्बन्धः । द्वैविध्यमेवाह—बाह्येत्यादिना । बाह्यगोचरमन्तःकरणवृत्त्युपाधिकमेकं निर्विशेषं स्वतोनिर्विषयमविनाशि चापरबाह्यगोचरज्ञानस्य प्रसिद्धत्वान्निर्विशेषनित्यज्ञाने प्रमाणमाह—बाह्येति । बाह्यगोचरमिति समानाधिकरणसमासः बाह्यपदार्थं विहाय निर्विषयेत्यर्थः । इदं च केवलेत्यस्यविवरणम् । इदमुक्तं भवति । अस्ति हि स्वापे आत्मचैतन्यानुभवः ।

अहमित्युत्थितस्य परामर्शदर्शनात् न च स तदा बाह्यविषयः इन्द्रियसंप्रयोगादेरभावात् । नन्वात्मचैतन्यं ह्यबाह्यविषयत्वाभावेऽप्यज्ञानादिविषयत्वान्न निर्विषयज्ञानं तदापि सिद्ध्यतीति चेत् किमतः ज्ञानस्यात्मस्वरूपत्वानुपपत्तिरिति चेत्तर्हि कीदृशेन ज्ञानेनाज्ञानसिद्धिः न तावज्जन्यज्ञानेन तस्य तदासंभवादित्युक्तत्वात् नित्यज्ञानेन चेत्तर्हि तदेवात्मा तद्व्यतिरिक्ते तस्मिन्मानाभावात् । ननु निष्प्रतियोग्यात्मनस्सप्रतियोगिज्ञानात्मत्वमनुपपन्नमिति चेत् । यद्धि नियमेन यन्निरूपणाधीननिरूपणं तत्तत्प्रतियोगि यथा घटानिरूपणाधीननिरूपणोऽभावो घटप्रतियोगिकः न च ज्ञानं नियमेनाज्ञाननिरूपणाधीननिरूपणं स्वप्रकाशतया स्वयमेव प्रकाशात् । अविद्याया अपि साधकत्वाच्च । नन्वविद्याविषयविकल्पितज्ञानस्य निर्विकल्पकात्मरूपत्वमनुपपन्नमिति चेन्न । कल्पितविकल्पनस्याकल्पितनिर्विकल्पताविरोधात् । न चैकान्ततोऽविद्याविषयत्वं ज्ञानस्य मोक्षदशायां तदभावादित्यभिप्रेत्योक्तं मोक्षसमय इति । न च तदा ज्ञानाभावः । मोक्षस्याप्रकाशमानतया भूनिखातनिक्षेपवदपुरुषार्थत्वप्रसङ्गात् । तस्मान्निर्विषयमविनाशि च ज्ञानं स्वापमोक्षयोः सिद्धमिति ज्ञानद्वैविध्यं श्रुत्यापि दर्शितं न दृष्टेर्द्रष्टारं पश्येरिति । सुरेश्वराचार्यैरप्युक्तम्—"अन्तःकरणवृत्तिर्या चक्षुरादिसमाश्रया । रूपादिविषयाभासा लौकिकी दृष्टिरुच्यते । तस्याश्च क्रियमाणत्वाज्जन्मनाशादिसङ्गतिः । आत्मदृष्टिस्त्वियं नित्या जन्मनाशादिवर्जिते"ति ॥ १६६ ॥

एवं स्वापमोक्षयोर्निर्विशेषाविनाशिज्ञानसद्भावं प्रदर्श्य श्रुत्यन्तरमपि तत्र प्रमाणयति —

पश्यन्न पश्यति गिरा कथयांबभूव

साक्षादनश्वरविनश्वरचिद्विभागम् ।

तात्पर्यतः श्रुतिवचः स्फुटमेव नैव-
मैश्वर्यवस्तुनि विभागवचः श्रुतिर्नः ॥ १६७ ॥

पश्यन्निति। पश्यन् वै तन्न पश्यतीत्यत्र पश्यन्न पश्यतीतिशब्देन सुप्त्यादौ स्वरूपज्ञानेन पश्यन्नपि जाग्रदादाविव विशेषतो न पश्यति इन्द्रियसंप्रयोगाभावादिति तदर्थः। अनश्वरविनश्वरचिद्विभागमविनाशिविनाशिचितोर्विभागमनित्यचैतन्यान्निष्कृष्य नित्यज्ञानं कथयामासेत्यर्थः। यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वादिति श्रुतिः स्वापादौ नित्यज्ञानं दर्शयतीत्यर्थः। तस्माज्ज्ञानस्यात्मस्वरूपत्वमुपपद्यत इति भावः। ऐश्वर्यं तु नैवमित्याह नैवामात। एवं ज्ञान इव विभागवचःश्रुतिः विभागवचोरूपा श्रुतिः विभागवादिश्रुतिरित्यर्थः। विभागवचः श्रवणमिति वा ॥ १६७ ॥

एवं सुखस्यापि विषयोपाधिस्वरूपव्यतिरेकेण निरपेक्षस्वरूपास्तित्वं विषयोपाधिकस्य तस्य सुखत्वनिषेधपूर्वमाह—

एवं न वा अर इति श्रुतमेव ताव-
त्पुत्राद्युपाधिपुरुषस्य सुखं विनाशि।
नित्यं निरन्तरमनन्तमपारमुक्तं
ब्राह्मं सुखं वचनकोटिशतैश्च यत्नात् ॥ १६८ ॥

एवमिति। ज्ञानवत्पुत्राद्युपाधि पुत्रादिनिमित्तं न वा अरे पत्युः कामायेत्यादिवाक्यं पतिजायापुत्रादिजन्यमनित्यं सुखं वैराग्याय दर्शयति। तथा च तत्सुखमेव न भवतीत्यर्थः। नित्यसुखसद्भावे किं वाक्यं प्रमाणमिति चेत् विज्ञानमानन्दं ब्रह्म एषोऽस्य परमानन्दः

एतस्यैवानन्दस्यान्यानि भूतानि यो वै भूमा तत्सुखं न ह्यस्य प्रियं प्रमा युक्तं भवतीत्यादीनि सर्वाण्यपि श्रुतिशिरोवाक्यानीत्याह—नित्यमित्यादिना। नित्यमपारमानन्दमिति देशकालवस्तुपरिच्छेदनिरासः। अत एव निरन्तरमेकरसमित्यर्थः। वचनकोटिशतैः यत्नात्तात्पर्येण श्रुतमित्यनुषङ्गः॥१६८॥

एवं ज्ञानादिद्वैविध्ये प्रमाणमुक्त्वा नैवमैश्वर्यवस्तुनि विभागवचः श्रुतिरित्युक्तमेव प्रपञ्चयति ।

ऐश्वर्यवर्णनमिह द्विविधं न वेदे
नित्यं क्वचित् क्वचिदनित्यमिति प्रतीमः ।
ऐश्वर्यमात्रकथनं पुनरस्ति मोक्षा-
दर्वाक्तु न मोक्षसमये च न तत्परं तत् ॥ १६९ ॥

ऐश्वर्येति । इह वेदे क्वचित् क्वचित् तस्मिन् तस्मिन् प्रदेशे नित्यमनित्यमितिद्विविधमैश्वर्यवर्णनं न प्रतीम इति सम्बन्धः । ननु द्वे वाव ब्रह्मणो रूपे स एष सर्वेश्वरः विश्वैश्वर्यं केवल आप्तकाम इति श्रुत्या द्विविधमैश्वर्यं श्रूयत इत्याशङ्क्य द्वे वावेत्यादेर्व्यावहारिकैश्वर्यपरत्वादितरस्याश्च फलवचनत्वेन तत्परत्वाभावात् नैवमित्यभिप्रेत्याह—ऐश्वर्यमात्रेति । मात्रपदेन नित्यत्व व्यावर्त्यते। मोक्षादर्वाक्षु मोक्षसमयादधस्तनसाधनसमयेषु तद्विश्वैश्वर्यमित्याद्यैश्वर्यवर्णनम्॥१६९॥

उक्तमेवार्थं तदभिमतदृष्टान्तपूर्वकमुपपादयति—

प्रियशिरस्त्वकथा खलु यादृशी
भवति तादृशमेव तदीरणम् ।
तदनु नेति च नेति वचः श्रुते-
र्यदपि मोक्षगतं स्तुतये हि तत् ॥ १७० ॥

प्रियशिरस्त्वेति । प्रियशिरस्त्ववचनं यथानन्दमयशब्दस्य ब्रह्माभिधायकत्ववादिना त्वया तस्य प्रियमेव शिर इत्यादिप्रियशिरस्त्वाद्युक्तेरौपाधिकप्रियशिरस्त्वादिविषयत्वमेवाङ्गीक्रियते । न तु स्वाभाविकं तद्विषयत्वं तथा तदीरणमैश्वर्यवर्णनमप्यौपाधिकैश्वर्यविषयमङ्गीकर्त्तव्यमित्यर्थः । ननु शिरःपाण्याद्यङ्गशून्यस्य ब्रह्मणः सशिरस्कत्वाद्यनुपपत्त्या तत्र तथात्वमत्रत्यैश्वर्यस्य स्वाभाविकत्वे न काचिदनुपपत्तिरस्तीत्याशङ्क्यैश्वर्यनिषेधानुपपत्तिरेव तत्स्वाभाविकत्वबाधिकेत्याह—तदन्विति । ऐश्वर्यवर्णनानन्तरमित्यर्थः । नेति नेति वचः श्रुतेः स एष नेति नेतीत्यैश्वर्यस्य निषिद्धत्वादित्यर्थः । ननु ज्ञात्वा देवम् एष सर्वेश्वर इत्यादिना मुक्तावप्यैश्वर्यं श्रूयत इति चेत् । न तस्यार्थवादात्मत्वेन तत्परत्वाभावादित्याह—यदपीति । यत्तच्छब्दावैश्वर्यवर्णनपरौ स्तुतये विद्यास्तुतये तस्माज्ज्ञानादिवन्निरुपाधिकैश्वर्ये प्रमाणाभावात् सर्वेश्वरादिश्रुतेश्च स्तुतिपरत्वात्सूत्रकारभाष्यकाराभ्यां च पत्यादिशब्देभ्य इत्यादौ सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरित्यादेः स्तुतिपरत्वेनैव व्याख्यातत्वान्न विदुषोपि तत्प्राप्तिरिति सिद्धम् ॥ १७० ॥

केचित्तु निरुपाधिके ब्रह्मणि सर्वेश्वरादिशब्दो गुणवृत्त्या स्वातन्त्र्यप्रतिपादनार्थ एवेति तस्मिन् तच्छब्दप्रयोगस्याविरोधमाहुः तन्मतमाह—

स्वातन्त्र्यमीश्वरगिरा गुणमार्गवृत्ति-
माश्रित्य पूर्वगुरवः प्रतिपादयन्ति ।
सिंहस्य शौर्यगुणवत्परमेश्वरस्य
स्वातन्त्र्यलक्षणगुणोऽव्यभिचारिरूपः ॥ १७१ ॥

स्वातन्त्र्यमिति । गुणमार्गवृत्तिं गुणद्वाराशब्दप्रवृत्तिं गौणीं वृत्तिमाश्रित्येत्यर्थः । यथा सिंहशब्देन गौणीं वृत्तिमाश्रित्य देवदत्ते शौर्यविशेषः प्रतिपाद्यते सिंहो देवदत्त इति तथा पूर्वगुरवोपीश्वरशब्देन गौणीं वृत्तिमाश्रित्यासंसारिब्रह्मणि स्वातन्त्र्यं प्रतिपाद्यते सिंहो देवदत्त इति यन्तीत्यर्थः । ननुवाच्यार्थाव्यभिचारिगुणो गुणशब्देन प्रवृत्तिनिमित्तं यथा शौर्यविशेषः सिंहाव्यभिचारी स्वातन्त्र्यं च नेश्वरशब्दवाच्यव्यावहारिकेश्वर एव नियतं लौकिकेश्वरेऽपि दर्शनादित्याशङ्क्य लौकिकेश्वरं प्रत्यपि तस्येशितृत्वेन तस्यैव मुख्यस्वातन्त्र्यान्न तत्तद्व्यभिचारीत्याह—सिंहस्येति । अथवा—परमात्मनि सर्वेश्वरशब्दस्य गुणवृत्त्या प्रवृत्तौ दृष्टान्तमाह—सिंहस्येति । यथा सिंहशब्दविषयस्य सिंहस्यासिंहस्य वा शौर्यमव्यभिचारीत्यसिंहे तच्छब्दप्रयोगेण शौर्यं प्रतिपाद्यते । तथा सर्वेश्वरादिशब्दविषयस्य सर्वेश्वरस्यासर्वेश्वरस्य वा स्वातन्त्र्यमभिचारीति तच्छब्दप्रयोगेण स्वातन्त्र्यं प्रतिपाद्यत इति तत्र स्वातन्त्र्याव्यभिचारो बीजमित्यर्थः । अव्यभिचारीति च्छेदः ॥ १७१ ॥

ननु गुणवृत्त्या निरुपाधिकब्रह्मणि स्वातन्त्र्यमेव प्रतिपाद्यत इति कथं ज्ञायते मुख्यया वृत्त्या तस्मिन्नैश्वर्यप्रतिपादनमेव किं न स्यादित्याशङ्क्यैश्वर्यप्रवृत्तिनिमित्तपुरस्कारेणैवेश्वरशब्दप्रयोगान्निरुपाधिके च ब्रह्मणि प्रकृतैतावत्त्वमित्यादिना भगवदैश्वर्यस्य निषिद्धत्वात्प्रवृत्तिनिमित्ताभावान्न मुख्यया वृत्त्या तस्मिन्नैश्वर्यप्रतिपादनायेश्वरशब्दप्रयोगः । किन्तु गुणवृत्त्या स्वातन्त्र्यं प्रतिपादयितुमेवेति ज्ञायत इत्यभिप्रेत्याह—

ऐश्वर्यवस्तु परिगृह्य तदत्यजन्तः

सामर्थ्यसिद्धिमुपपादयितुं कचिच्च ।

सर्वेश्वरश्रुतिवचः समुदाहरन्ति
स्वातन्त्र्यलक्षणगुणस्य तमस्वितायाम् ॥१७२॥

ऐश्वर्यवस्त्विति। तमस्वितायामज्ञानावस्थायां विद्यमानमैश्वर्यरूपं-वस्तुपरिगृह्य प्रवृत्तिनिमित्तत्वेन परिगृह्य तदैश्वर्यमत्यजन्तः वाच्यत्वकोटौ प्रवेशयन्तः क्वचित्प्रदेशे सर्वेश्वरश्रुतिवचः सर्वेश्वर इत्यादिश्रुतिवचः समुदाहरन्ति किमर्थं स्वातन्त्र्यलक्षणगुणस्य सामर्थ्यसिद्धिं सामर्थ्यतोऽनुपपत्त्या सिद्धिमुपपादयितुं निरुपाधि-केश्वर इति शेषः। तदत्यजन्तइति पाठे तत्—आविद्यकैश्वर्यवस्तु-परिग्रहपूर्वकसर्वेश्वरश्रुतिवाक्योदाहरणम्, अनन्ते—निरुपाधिकब्रह्मणि स्वातन्त्र्यलक्षणगुणस्य सामर्थ्यसिद्धिमुपपादयितुमित्यर्थः। अथवा निरुपाधिकब्रह्मस्वरूपपरतयेश्वरपदश्रवणमेव नास्तीत्युक्तम्। तत्क-थमीश्वरपदेन स्वातन्त्र्यलक्षणापीतिचेन्न। व्यावहारिकेश्वरत्वा-भिधायिसर्वेश्वरश्रुतेर्निरुपाधिकेऽपि ब्रह्मणि भाष्यकारादिभिः क्वचिदुदाहरणात् तथा चेश्वरपदस्य स्वातन्त्र्योपपादकत्वमस्त्येवे-त्याह—ऐश्वर्यवस्त्विति ॥ १७२ ॥

ननु तमस्यवस्थावत्यैश्वर्यप्रवृत्तिनिमित्तकेश्वरश्रुतिवाक्योदा-हरणे न कस्यानुपपत्त्या निरुपाधिके स्वातन्त्र्यसिद्धिरित्याशङ्क्य तस्मिन् तादृशेश्वरपदप्रयोगस्यैवानुपपत्त्येति सदृष्टान्तमाह—

सिंहश्रुतिर्न घटते यदि शूरताऽस्य
न स्यात्तथैव परमेश्वरता श्रुतिश्च।
नैश्वर्यलक्षणगुणः परमात्मनश्चे-
दित्यर्थलब्धिमभिसंदधते महान्तः ॥१७३॥

सिंहश्रुतिरिति। अस्य देवदत्तस्य यदि शूरता न स्यात् तदा सिंह-श्रुतिः सिंह इतिश्रुतिः सिंहपदविषयत्वं न स्यादित्यर्थः। तथैव यथा देव-दत्तस्य शौर्याभावे सिंहशब्दविषयत्वाभाव इति सिंहशब्दप्रयोगानुपपत्त्यैव तस्य शौर्यसिद्धिः तथैव परमात्मनः निरुपाधिकब्रह्मणः ऐश्वर्यलक्षणगुणः ऐश्वर्यं लक्षणं ज्ञापकं यस्य स्वातन्त्र्यगुणस्य स न चेत् परमेश्वर-ताश्रुतिर्न घटेतेत्यर्थः। लब्धिमर्थादुक्तानुपपत्त्या स्वातन्त्र्यलब्धिं महान्तः सूत्रकारादयः अभिसंदधते अभिप्रेतवन्त इत्यर्थः॥ १७३॥

नन्वेवं स्वातन्त्र्यमश्रौतं स्यादित्याशङ्क्य श्रुतानुपपत्तिगम्यस्यापि श्रौतत्वमस्तीति कैमुतिकन्यायमभिप्रेत्याह—

श्रौतार्थवृत्तिबललभ्यमपीह वस्तु
श्रौतं वदन्ति निकटत्वमनुस्मरन्तः।
आसन्नवृष्टिमपि देवमुदीरयन्ति
वर्षन्तमेव हि जना भुवि तादृगेतत्॥ १७४॥

श्रौतार्थेति। श्रुतिप्रतिपन्नो धात्वर्थः श्रौतार्थः। तत्र वृत्तिर्वर्त्तनं यस्येष्टसाधनत्वस्य तद्बललभ्यतदनुपपत्तिगम्यमपीत्यर्थः। अथवा श्रौत्रं श्रुतिप्रतिपन्नं यदर्थवृत्तिधात्वर्थवृत्तीष्टसाधनत्वं तद्बललभ्यं यजे-तेति श्रुतिप्रमितधात्वर्थेष्टसाधनत्वानुपपत्तिगम्यमपीत्यर्थः। वस्त्व-पूर्वादि वस्तु वदन्ति भट्टादय इति शेषः। तर्हि यागस्य स्वर्गसाधन-त्वाक्षिप्तमप्यपूर्वं श्रौतमित्येवाभ्युपेयते। अन्यथा यागस्यापूर्वजनक-त्वाङ्गीकारेणाङ्गान्वयित्वानुपपत्तिरित्यर्थः। श्रौतार्थानुपपत्तिगम्यस्य श्रौतत्वे बीजमाह—निकटत्वमनुस्मरन्तइति। श्रुतार्थसमीपवृत्तित्वाद-पूर्वादेः श्रौतत्वमित्यर्थः। श्रौतासत्तिमात्रेण श्रौतत्वव्यवहारे दृष्टान्त-माह—आसन्नेति। आसन्ना वृष्टिर्यस्य वृष्ट्यधिपतेर्देवस्य तमेतच्छ्रुता-र्थानुपपत्तिगम्यस्यापि श्रौतत्वमित्येतद्यथा लोके जना विशिष्टमेघो-

द्गमकाले वृष्टिसामीप्यमात्रेण देवो वर्षतीति वदन्ति तद्वच्छ्रुतार्थ-समीपवृत्तित्वादपूर्वमपि श्रौतमिति वदन्तीत्यर्थः। तथा च श्रुतार्था-नुपपत्तिगम्यस्यापि श्रौतत्वे किमु वक्तव्यं ततोऽप्यतिनिकटस्य श्रुत्यनु-पपत्तिगम्यस्य श्रौतत्वमिति भावः। तदेवमीश्वरश्रुतेः स्वातन्त्र्यपरत्वा-देश्वर्यपरत्वाभावान्नैश्वर्यं वास्तवं ब्रह्मणः स्वरूपमिति सिद्धम् ॥१७४॥

ननु सूत्रकारो मुक्तिदशायामप्यैश्वर्यं सूत्रयति स्म "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययावि"ति अतस्तत्प्रामाण्यादैश्वर्यमपि वास्तवमभ्युपेयमिति चेन्न तस्या अभ्युपगमवादत्वाद्वस्तुस्वरूपत्वे प्रमाणाभावस्योक्तत्वादित्याह—

ऐश्वर्यमज्ञानतिरोहितं स-
द्ध्यानादभिव्यज्यत इत्यवोचत् ।
शरीरिणः सूत्रकृदस्य यत्तु
तदभ्युपेत्योदितमुक्तहेतोः ॥ १७५ ॥

ऐश्वर्यमिति। अज्ञानतिरोहितं संसारदशायामिति शेषः। ध्याना-दीश्वरध्यानादस्य शरीरिणोऽभिव्यज्यत इति यदवोचदिति सम्बन्धः। अभ्युपेत्योदितत्वे हेतुमाह—उक्तहेतोरिति। प्रमाणाभावा-द्युक्तहेतोः ॥ १७५ ॥

ननु सूत्रकारसूचितं तथैवेति वक्तव्यं नान्यथयितुं शक्यमति-प्रसङ्गादिति चेत्सत्यम्। यदि प्रमाणवन्न तु तद्विना नहि सूत्रमागम-विद्यया निरपेक्षं प्रमाणं किन्तु तदपेक्षितन्यायसूचकत्वेनानुगृह्यप्रमाण-सापेक्षमेव न चात्रैश्वर्यप्रतिपादकतादृशागमोऽस्ति। न च ज्ञात्वा देव-मित्युक्तश्रुतिस्तादृशीतिवाच्यं तस्यार्थवादत्वेनैश्वर्यपरत्वाभावादित्य-भिप्रेत्याह—

अथ वा चितिवत्प्रतीयतां

पुरुषस्येश्वरताऽपि वास्तवी ।

यदि किंचन कारणं भवे-

न्न विना सा तदिहाभ्युपेयते ॥ १७६ ॥

अथेति । अथेत्यर्थान्तरे, वाशब्दोऽनास्थायम्, स च वास्तवीत्यनेन सम्बध्यते । पुरुषस्य परमात्मनः कारणं प्रमाणं तत्प्रमाणं विनेति सम्बन्धः । सा-ईश्वरता ॥ १७६ ॥

इतश्च पराभिध्यानादिति वचनमभ्युपगमवादाभिप्रायमेवेत्याह—

कामादि तत्र च भवेदितरत्र चेति

यत्सूत्रकारवचनं तदुदीक्षमाणाः ।

कामादिकेन दहरस्थगुणेन तुल्यं

सर्वेश्वरादिगुणजातमिति प्रतीमः ॥ १७७ ॥

कामादीति । सत्यकामत्वादिकं सर्वेश्वरत्वादिकं च तत्र बृहदारण्यगतनिर्गुणविद्यायामितरत्र छान्दोग्यगतदहरविद्यायां सत्यकामत्वादिकं निर्गुणविद्यायां भवेत्सर्वेश्वरत्वादिकं च दहरविद्यायां भवेदिति विभाग इति यत्सूत्रकारवचनमिति "कामादीतरत्र तत्र चायतनादिभ्य" इति सूत्रस्यार्थतोनुकरणमुदीक्षमाणाः पश्यन्तः । वयमिति शेषः । कामादिकेन सत्यकामसत्यसंकल्पत्वादिकेन सर्वेश्वरादिगुणजातं सर्वेश्वरत्वादिगुणजातं कामादीतरत्रेत्यत्र हि छान्दोग्यं दहरोस्मिन्नन्तराकाश इति हृदयान्तर्गतत्वेन श्रुतदहराकाशगुणानां सत्यकामत्वादीना बृहदारण्यके निर्गुणविद्यायां य एषोन्तर्हृदयाकाश

इति श्रुतहार्दाकाशगुणानां सर्ववशित्वसर्वेश्वरत्वादीनां विद्याभेदेऽप्यु-भयत्राकाशशब्दवाच्यस्य परमात्मन एकत्वात्परस्य परत्रोपसंहार उक्तः। तत्र दहरविद्यायामुपसंहृतानां वशित्वादीनामुपास्त्यर्थत्वाद् दहराग्नि-गुणविद्ययामुपसंहृतानां सत्यकामत्वादीनां कश्चिदुपकारो वक्तव्यः। तेषां च य उपकारः स एव वशित्वादीनामपि तत्र श्रुतानां वक्तव्यः तुल्यताप्रयुक्तत्वादुपसंहारस्येत्यर्थः ॥ १७७ ॥

कस्तर्हि सत्यकामत्वादीनामुपकारः येन तत्साधर्म्येण सर्वेश्वर-रत्वादीनामविवक्षा स्यात् स्तुतिरेवेत्याह—

दहरस्थगुणोपसंहृतेः

स्तुतिमात्रं विरहय्य नापरम् ।

फलमस्ति परात्मनिष्ठिते

वचने वाजिभिराहृते महत् ॥ १७८ ॥

दहरस्थेति । दहरविद्यागत सत्यकामत्वादिगुणानामुपसंहार-स्योपसंहृतसत्यकामत्वादिगुणस्येत्यर्थः । स्तुतिमात्रमल्पं फलं विरह-य्यापरं महत् फलं वाजिभिराहृते वचने वाजसनेयिभिरधीते वाक्ये नास्ति । तत्र हेतुः—परमात्मनिष्ठित इति । निर्गुणब्रह्मपरे वाक्ये गुणविव-क्षाया असंभवात् सत्यकामत्वादीनां स्तुतिमात्रमेव फलं न तु चैतन्यादेरिव मोक्षाख्यं महत्फलमस्ति । तथा च तत्साधर्म्येण सर्ववशित्वादीनामपि स्तुतिमात्रमेव फलं न तु मोक्षान्वयित्व-मित्यर्थः ॥ १७८ ॥

ननु क्रेतव्या गौर्बहुक्षीरेत्यादौ सतोऽपि बहुक्षीरतादिगुणस्य स्तुतिपरत्ववत् सर्वविशित्वादेः सत्यकामत्वादिवत् स्तुतिपरत्वेऽप्या-

त्मस्वरूपत्वं किन्न स्यादित्याशङ्क्य बहुक्षीरतादिगुणे हि मानान्तरसत्त्वात् सत्त्वमत्र तु वचनादेव नत्सिद्धिर्वक्तव्येति कथमन्यपराद्वचनात्तत्सिद्धेरित्यभिप्रेत्याह—

दहरादुपसंहृतैर्गुणैः
सदृशाश्चेद्वशितादिलक्षणाः ।
न तदा परमात्मरूपतां
प्रतिपत्तुं कलयाऽपि शक्नुयुः ॥ १७९ ॥

दहरादिति । गुणैः सत्यकामत्वादिभिः सदृशा इति सादृश्यं च स्तुतिपरत्वं वशितादिलक्षणाः–वशित्वाधिपतित्वादिरूपाः । गुणा इति शेषः । परमात्मस्वरूपतां वशित्वादीनामिति शेषः । कलया मात्रयापीत्यर्थः । प्रमाणाभावादिति भावः ॥ १७९ ॥

एवमीश्वरत्वप्रयोजकवशित्वादेः स्तुतिपरत्वमुक्त्वा तत्प्रयोज्यपरमेश्वरत्वस्यापि तत्तुल्यन्यायतया स्तुतिपरत्वमेवेत्याह—

परमेश्वरतागुणोऽप्यतः
स्तुतये तस्य परस्य वस्तुनः ।
परिकीर्तित इत्युपेयता-
मविशेषाद्वशितादिलक्षणैः ॥ १८० ॥

परमेश्वरतागुणोऽपीति । परमेश्वरलक्षणगुणोप्यतः । यतो वशित्वादीनां स्तुतिपरत्वमतो वशित्वादिलक्षणैः गुणैरिति शेषः । अविशेषात्प्रमाणाभावादेस्तुल्यत्वादित्यर्थः ॥ १८० ॥

किञ्चेश्वरत्वं परमात्मनो वास्तवं स्वरूपमिति वदतो जगत्कारणत्वसाक्षित्वे अपि तत्स्वरूपत्वेनानभिमते उताभिमते । नाद्यः ईश्वरत्वेन तुल्ययोगक्षेमत्वेन तयोरपि स्वरूपत्वावश्यंभावादित्यभिप्रेत्यादौ कारणत्वस्य तत्स्वरूपत्वापत्तिमाह –

कारणत्वमपि चित्सुखादिव-
तत्स्वरूपमिति किं न गृह्यते ।
ईश्वरत्वविषये विपश्चितां
पक्षपातकरणे न कारणम् ॥ १८१ ॥

कारणत्वमपीति । तत्स्वरूपं तस्य परमात्मनः स्वरूपम् । नन्वीश्वरत्वस्य तत्स्वरूपत्वस्वीकारे कारणत्वादेरपि तत्स्वरूपत्वं स्वीकर्त्तव्यमिति कोयं नियमः विपरीते वा कोयं नियमः विनिगमकाभावात्तस्यापि स्वरूपत्वमङ्गीकार्यमित्याह—ईश्वरत्वविषय इति । विपश्चितामित्युपहासः पक्षपातकरणे तदेकाङ्गीकारः पक्षपातः तत्करणे कारणं विनिगमने हेतुर्नास्तीत्यर्थः ॥ १८१ ॥

इदानीं साक्षित्वस्यापि परमात्मनः स्वरूपत्वापत्तिमाह—

साक्षितापि परमात्मनो भवे-
दीश्वरत्ववदियं न संशयः ।
नित्यसिद्धनिजबोधरूपव-
द्रूपमेव निरुपाधिकं विभोः ॥ १८२ ॥

साक्षिताऽपीति । यथा विभोः परमात्मन ईश्वरत्वं नित्यसिद्धस्वाभाविकज्ञानस्वरूपवत् निरुपाधिकं वास्तवं स्वरूपं तद्वत्साक्षितापि निरुपाधिकं स्वरूपं स्याद्विनिगमकाभावादित्यर्थः ॥ १८२ ॥

ननु विनिगमकाभावोऽसिद्धः ईश्वरत्वस्य श्रुतिप्रतिपन्नत्वात् साक्षित्वादेश्च श्रुतिप्रतिपन्नत्वाभावादित्यपि न शङ्कनीयम् । साक्षित्वादेरपि श्रुतिसिद्धत्वादित्यभिप्रेत्यादौ साक्षित्वे श्रुतिं दर्शयति —

एको देवः सर्वभूतेषु गूढः

सर्वव्यापी सर्वभूतान्तरात्मा ।

कर्माध्यक्षः सर्वभूताधिवासः

साक्षी चेता केवलो निर्गुणश्च ॥ १८३ ॥

एक इति । मूर्तित्रयात्मना पुराणसिद्धभेदवारणार्थमेकपदम् । जाड्यं निरस्यति—देव इति । स्वप्रकाश इत्यर्थः । पराभिमतं ताटस्थ्यं वारयति—सर्वभूतेषु गूढ इति । सर्वभूतानामात्मेत्यर्थः । आधाराधेयभावेन भेदं वारयति सर्वव्यापीति । परिच्छेदत्रयशून्य इत्यर्थः । ननु जीवपरयोर्नियम्यनियामकभावस्य सत्त्वात् कथं त्रिविधपरिच्छेदशून्यता तत्राह—सर्वभूतेति । सर्वेषां ब्रह्मादिस्तम्बान्तानां भूतानामयमेवान्तरात्मा सर्वेषु भूतेष्वस्यैव प्रवेशश्रवणात् । तथा चात्यन्ताभेदे नियम्यनियामकभावानुपपत्तेरारोपित एव भेद इत्यर्थः । तर्हि कर्त्तुरभिन्नत्वात्परोपि कर्त्ता स्यात् । तत्राह—कर्माध्यक्ष इति । प्रत्यगात्मनोपि न कर्तृत्वमित्यर्थः । साक्ष्यसाक्षिणोर्भेदः स्यात् तत्राह—सर्वेति । सर्वेषां भूतानां साक्ष्या-

णामयमधिवासः अधिष्ठानत्वात् । तथा चारोपितस्याधिष्ठानाभेदान्न वस्तुतः परिच्छेद इत्यर्थः। तस्य वस्तुत्वेन घटवद्दृश्यत्वानुमानं जडत्वोपाधिहतमित्याह—साक्षीति । ईक्षणकर्तृत्वं वारयति -चेतेति । द्रष्टृत्वाद्विकारित्वं लौकिकद्रष्टृवन्नेत्याह—केवल इति । स्वसन्निधिमात्रेण विश्वव्यवहारहेतुतया चिन्मात्रत्वमस्य द्रष्टृत्वं न विकारितयेत्यर्थः । ज्ञानानन्दौ ब्रह्मणो गुणाविति मतं निरस्यति—निर्गुण इति । एकरसत्व-श्रुतिविरोधादित्यर्थः ॥ १८३ ॥

एवं कारणत्वेपि श्रुतिमाह—

न तस्य कार्यं करणं च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते ।
पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च ॥ १८४ ॥

न तस्येति । तस्येश्वरस्य कार्यं स्थूलदेहः करणं सूक्ष्मदेहः उभय-मपि न विद्यते । अनेन जीववैलक्षण्यमुक्तं तर्ह्ययं जगत्सर्जनेऽसमर्थ एव स्यादित्याशङ्क्यायमेव समर्थ इतिवक्तुं जगतः कारणान्तरं प्रति-षेधति—न तत्सम इति । तस्य परमेश्वरस्य सदृशोपि नास्ति कुतो-ऽधिक इत्यर्थः । सामर्थ्यमुपपादयति । परेति । अस्य परमेश्वरस्य परोत्कृष्टा विविधा विचित्रा कार्यजननी शक्तिर्मायाख्या श्रूयत एव इन्द्रो मायाभिरित्यादिभिरन्तःकरणहीनस्यापि जगत्स्रष्टृत्वमविरुद्ध-मित्यर्थः । ननु मायाया अपि जडत्वात्कथमेतादृशं सामर्थ्यमित्याशङ्क्य स्वतः सामर्थ्याभावेपि स्वरूपचैतन्यसम्बन्धाद् भवत्येवेत्याह—

स्वाभाविकीति। अनादिसिद्धा ज्ञानबलक्रिया ज्ञानं स्वरूपचैतन्यं तदेव बलं तेन या क्रिया मायाप्रवर्तनरूपा साऽस्तीत्यर्थः। अतः सर्वज्ञत्वं कारणत्वं च सम्भवतीति भावः॥ १८४॥

एवं साक्षित्वकारणत्वयोः श्रुतिं प्रदर्श्य दृष्टान्तत्वेनैश्वर्येपि श्रुतिं दर्शयति—

न तस्य कश्चित्पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गम्।
सकारणं वै करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः॥ १८५॥

न तस्येति। अथवा मुखतोपि कारणत्वप्रतिपादिकां श्रुतिमाह—न तस्येति। तस्य परमेश्वरस्य पतिः स्वामी ईशिता नियन्ता लिङ्ग्यते ज्ञायतेऽनेनेति लिङ्गं कार्यकरणं, सः-परमात्मा, कारणम्, जगत्कारणं करणाधिपाधिपः—चक्षुरादिकरणानामधिपानामादित्यादीनामप्यधिपः, अतोऽयमेव सर्वेश्वर इत्यर्थः। नचास्य कश्चिज्जनिता नैव च तस्य लिङ्गमिति जीववैलक्षण्यमुक्तं न तस्य कश्चिदित्यादिना स कारणमित्यादिना च सर्वेश्वरत्वजगत्कारणत्वे उक्ते शेष उपसंहारः
॥ १८५॥

तस्मात्कारणत्वसाक्षित्वयोरपीश्वरत्ववत् श्रुतिनिर्देशस्तुल्य इत्याह—

उक्तश्रुतिः कारणसाक्षिभाव-

मैश्वर्यवद्वक्ति परस्य पुंसः ।

अतत्परत्वान्न तदिष्यते चेद्-

द्वयं तृतीयं न तथैषितव्यम् ॥ १८६ ॥

उक्तेति । उक्तप्रकारेण श्रुतिः उक्तश्रुतिः कारणसाक्षिभावं कारणत्वं साक्षित्वं च । ननु कारणत्वादिप्रतिपादकश्रुतेरात्मपरत्वेन तत्परत्वाभावान्न तदुभयं स्वरूपमिति चेत्तर्हि तात्पर्याभावस्यैश्वर्यश्रुतावपि समत्वात्तदपि न स्वरूपमित्याह—अतत्परत्वादिति । तद् द्वयमिति सम्बन्धः । कारणत्वं साक्षित्वं चेत्यर्थः । इष्यते स्वरूपत्वेनेति शेषः । तृतीयं कारणत्वसाक्षित्वापेक्षया तृतीयमैश्वर्यमपीत्यर्थः । तथा स्वरूपत्वेन ॥ १८६ ॥

तस्मात् त्रिष्वपि श्रुतेरविशेषादतत्परत्वस्य च तुल्यत्वात् त्रयाणामप्यस्वरूपत्वं वक्तव्यमन्यथैकस्य स्वरूपत्वाङ्गीकारे इतरयोरपि स्वरूपत्वापत्तिः । इतरयोश्चास्वरूपत्वेऽन्यस्याप्यस्वरूपत्वमिति प्रथमपक्षनिराकरणपूर्वकमुपसंहरति—

अतत्परत्वं श्रवणस्य तुल्यं

त्रिषु त्रयं तेन विवर्जनीयम् ।

अथेप्समेकं त्रयमेषितव्यम्

विशेषहेतोरनिरूपणेन ॥ १८७ ॥

अतत्परत्वमिति । श्रवणस्य श्रुतेः त्रिषु कारणत्वसाक्षित्वसर्वेश्वरत्वलक्षणेषु त्रिष्वपीत्यर्थः । तेन येनातत्परत्वं तुल्यं तेन त्रय विवर्जनीयम् स्वरूपत्वेन न स्वीकर्त्तव्यमित्यर्थः । अथ यद्येकमीश्वरत्वमिष्टं स्वरूपत्वेनेति शेषः । अयं त्रयमप्येषितव्यं विशेषहेतोर्विनिगमनस्यानिरूपणादित्यर्थः ॥ १८७ ॥

नन्वीश्वरत्ववत्कारणत्वसाक्षित्वे अपि स्वाभाविके एवेति चेन्न—सापेक्षस्य मिथ्यात्वनियमादिति त्रयाणामपि मिथ्यात्वं वक्तुमादौ दृष्टान्तत्वेनाभिमतेश्वरत्वस्य सापेक्षत्वमाह—

ईशितव्यमनपेक्ष्य नेश्वरो
नेशितव्यमपि तद्वदीश्वरम् ।
अन्तरेण घटते ततो मृषा
मोहमात्रपरिकल्पितं द्वयम् ॥ १८८ ॥

ईशितव्यमिति । यथेश्वरेण विनेशितव्यं न घटते तद्वदीशितव्यमनपेक्ष्य परमात्मापीश्वरो न घटते इत्यर्थः । एतदुक्तं भवति । परमात्मा हीशितव्यं ब्रह्मादि जगदपेक्ष्यैव ईश्वरो भवति न तु तदनपेक्ष्य स्वतः लोके ग्रामादीशितव्यसापेक्षस्यैव ईश्वरत्वदर्शनात्तदभावे परिव्राजके तददर्शनात् तद्वदीशितव्यं ब्रह्मादि जगदपीश्वरमपेक्ष्यैवेशितव्यं भवति न तु तमन्तरेण ग्रामादावीश्वरपुरुषापेक्षयैवैश्वर्यव्यवहारादन्यथा परिव्राजकं प्रत्यपि तदैश्वर्यं स्यादिति फलितमाह—तत इति । सापेक्षत्वं तच्छब्दार्थः द्वयमीशितव्यमीश्वरत्वं चात्र चेशितव्यं दृष्टान्तत्वेनोपात्तं यथेश्वरसापेक्षमीशितव्यं मोहपरिकल्पितं मृषैव न तु वस्तुसत् तथेशितव्यसापेक्षमीश्वरत्वमपि मोहमात्रपरिकल्पितं मृषैवेत्यर्थः ॥ १८८ ॥

एवं कारणत्वस्यापि सापेक्षत्वं सदृष्टान्तमाह—

कार्यवस्तु विरहय्य कारणं
न क्वचिद् घटयितुं क्षमेमहि ।
नापि कारणमपोह्य केवलं
कार्यवस्तु परिकल्पयेमहि ॥ १८६ ॥

कार्यवस्तु विरहय्येति । क्षमेमहि समर्था भवेम यथा कारणं विना कार्यं न भवतीति कारणसापेक्षं कार्यं तद्वत्कार्यमपेक्ष्यैव कारणं भवति न तु तद्विना कार्यनियतपूर्ववर्तिन एव कारणत्वादित्यर्थः ॥ १८६ ॥

साक्षित्वस्यापि सापेक्षत्वमाह—

साक्ष्यवस्तु परिहृत्य साक्षिता
साक्षिणं च परिहृत्य साक्ष्यता ।
नेष्यते न घटते च तेन त-
त्सव्यपेक्षमुभयं परस्परम् ॥ १६० ॥

साक्ष्यवस्त्विति । साक्ष्यवस्त्वीक्षणविषयवस्तु यथा घटादेः साक्ष्यत्वं साक्षिणं विना नेष्यते न घटते चेक्षणविषयस्यैव साक्ष्यत्वादीक्षणस्य चेशितारं विनानुपपत्तेस्तद्वत्परमात्मनः साक्षित्वमपि साक्ष्यं विना नेष्यते न घटते चेक्षणाश्रयस्यैव साक्षित्वादीक्षणस्य च विषयं विनानुपपत्तेरित्यर्थः । फलितमाह—तेनेति । येनैकं विनेतरं न घटते न तेन तदुभयं साक्षिता साक्ष्यता च परस्परं सव्यपेक्षमत्रापि साक्ष्यतेति दृष्टान्तत्वेनोपात्तम् ॥ १६० ॥

इदानीं प्रसङ्गादात्मनः प्रमातृत्वादिकमपि मिथ्येति वक्तुमादौ प्रमातृत्वस्य सापेक्षत्वमाह—

न प्रमेयमपहाय मातृता
नापि मातृविरहे प्रमेयता ।
मातृमेयरहिता न च प्रमा
न प्रमाणरहितं प्रमाफलम् ॥ १६१ ॥

न प्रमेयामिति । प्रमाश्रयत्वस्यैव प्रमातृत्वात् प्रमायाश्च विषयसापेक्षत्वात् प्रमातृत्वं प्रमेयसापेक्षमित्यर्थः । अत्रापि नापि मातृविरहे इत्यादिदृष्टान्तार्थः । प्रमातारं विनापि प्रमेयता न संभवति । प्रमात्राश्रितप्रमाविषयस्यैव प्रमेयत्वात् । एवं प्रमातृप्रमेये विना प्रमाणमपि न संभवति । तस्य प्रमात्वस्य प्रमातृसमवेतार्थप्रकाशत्वास्याश्रयविषयसापेक्षत्वात् । एवं प्रमाणं विना तत्फलमभिव्यक्तिरपि न संभवति तस्यास्तदधीनत्वात् । अथवा प्रमातृप्रमेये विना चक्षुरादेः प्रमाणत्वं न संभवति । एवं प्रमाणं विना प्रमारूपं फलमपि न संभवति । तस्य तज्जन्यत्वात्तथा च कारणत्वादेरेकैकसापेक्षत्वमेव प्रमातृत्वादिकं तु प्रमेयादित्रितयमपेक्षत इति परम्परया मेयादित्रयसापेक्षमित्यर्थः ॥ १६१ ॥

एवं कर्तृत्वमपि सापेक्षमित्याह—

कर्तृ कर्म परिहृत्य नेष्यते
कर्म कर्तृरहितं न च क्वचित् ।
कर्तृकर्मरहिता न च क्रिया
न क्रियाविरहितं क्रियाफलम् ॥ १६२ ॥

कर्त्रिति । कृत्याश्रयस्यैव कर्तृत्वात् कृतेश्च क्रियारूपायाः सकर्मकत्वेन कर्म विना अभावात् कर्मकारकसापेक्षमेव कर्तृत्वमेवं कर्मत्वमपि कर्त्तारं विनाऽनुपपन्नं कर्तृसापेक्षक्रियाजन्यफलभाज एव कर्मकारकत्वात् । एवं क्रियापि कर्तृकर्मणी विना न संभवति । तस्या आश्रयविषयसापेक्षत्वात् । एवं क्रियाफलमपि क्रियां विना न संभवति तस्य तज्जन्यत्वात् तथा च कर्मतादिवत्कर्तृत्वमपि सापेक्षमित्यर्थः । एवं भोक्तृत्वादिकमपि सापेक्षं द्रष्टव्यम् ॥ १६२ ॥

एवमस्मदात्मनः सर्वानुगतत्वेन सामान्यत्वमपि सापेक्षमित्याह—

सामान्यं न विशेषवस्तुविरहे तस्माद्विना तन्न च
स्वातन्त्र्येण घटामुपाश्नाति ततः सापेक्षमेतद्द्वयम् ।
यत्सापेक्षमिहेक्षितं भवति तन्मायामयं स्वप्नव-
त्तस्मादीश्वरतादिकल्पितवपुः स्वीकुर्महे न्यायतः ॥१६३॥

सामान्यमिति । विशेषं विना सामान्यं न सम्भवति । विशेषेष्वनुगतस्यैव सामान्यत्वात् । एवं तद्विशेषवस्तु च स्वातन्त्र्येणास्यैव व्याख्या—तस्माद्विनेति । सामान्यादृते घटां घटनां सद्भावं नोपाश्नुते न प्राप्नोति न संभवतीत्यर्थः । स्वानुगतसामान्यकस्यैव विशेषत्वात् गोत्वादेर्विशेषत्वाभावादिति भावः । फलितमाह—तत इति । यतः सामान्यत्वं विशेषवस्तु विना न संभवति । विशेषत्वं च सामान्यं विना न संभवति ततो द्वयं सामान्यत्वं विशेषत्वं च सापेक्षमेवात्रापि विशेषस्य सापेक्षत्वं दृष्टान्ततयोक्तमेतच्च ब्रह्मप्रपञ्चयोः सामान्यविशेषभावेनैक्यनिरसनार्थमुक्तमिति द्रष्टव्यम् । नन्वस्त्वीश्वरत्वादेः सापेक्षत्वं न ह्येतावताऽवास्तवत्वं भवतीत्याशङ्क्य

सापेक्षत्वस्य स्फटिकलौहित्यादौ मिथ्यात्वेन व्याप्तिदर्शनादीश्वर-त्वादेरपि सापेक्षत्वात् मिथ्यात्वं भवत्येवेति तस्य न तत्स्वरूपत्व-मिति वक्तुं व्याप्तिमाह—यत्सापेक्षमिति । इह जगति मायामयं मिथ्या स्वप्नस्य च सापेक्षत्वं निद्रादिना व्याप्तिमुक्त्वाऽनुमानमाह तस्मादिति । सापेक्षत्वमिथ्यात्वयोर्व्याप्यव्यापकत्वं तच्छब्दार्थः ईश्वरतादीत्यादिप-देन पूर्वोक्तं कारणत्वादिकं गृह्यते कल्पितवपुः कल्पितस्वरूपं न्यायत अनुमानादीश्वरत्वादिकं कल्पितरूपं सापेक्षत्वात् स्वप्नस्फटिकलौ-हित्यादिवत् । न चाप्रयोजकः वास्तवत्वे आत्मवत्सापेक्षत्वाभावस्यैव बाधकत्वात् परस्परापेक्षसिद्धिकस्य वास्तवत्वानुपपत्तेश्चेत्यर्थः ॥१६३॥

ननु समुद्रतरङ्गन्यायेन भिन्नाभिन्नस्वरूपेण तस्य तत्स्वरूपत्वम-विरुद्धमित्याशङ्क्य ब्रह्मणो भिन्नत्वाभिन्नत्वे स्वाभाविके उतान्यतर-दौपाधिकं नोभयथापि विरुद्धत्वादित्याह—

अभिन्नता भिन्नतया विरुद्धा
विभिन्नताऽभिन्नतया तथैव ।
उपाधिभेदे परिकल्पितेऽपि
विना पुनस्तं किमुदीरणीयम् ॥ १६४ ॥

अभिन्नतेति । परिकल्पितेऽप्यङ्गीकृतेपीत्यर्थः । तमुपाधिमुपाधि-भेदेनाप्येकस्य भिन्नाभिन्नत्वे न संभवतः वस्तुनो द्वैरूप्यायोगात् किमु वक्तव्यमुपाधिभेदाभाव इत्यर्थः ॥ १६४ ॥

नन्वेकस्य स्वतो विरुद्धोभयरूपासंभवेऽप्युपाधिभेदादुपपद्यते । आकाशादौ तथा दर्शनादित्याशङ्क्य किमुभयं रूपं वास्तवमुत भिन्नत्वं कल्पितम् । नाद्यः सम्भवतीत्याह—

स्वभावतो यन्मिथुनं विरुद्धं
न तन्निमितान्तरतः कदाचित् ।
उपैति सख्यं परमार्थवृत्त्या
भ्रमादलभ्यं न च किंचिदस्ति ॥ १९५ ॥

स्वभावत इति । यद् द्वयं स्वतोविरुद्धत्वान्न ब्रह्मण्युपाधितोपि तयोस्तदुपाधितोपि परमार्थवृत्त्या साहित्यं न प्राप्नोति एकत्रैकावच्छेदेन न वर्त्तते । तथा च भेदाभेदयोरपि स्वतो विरुद्धत्वान्न ब्रह्मण्युपाधितोपि तयोरुभयोरपि वस्तुतः संभवः । आकाशादौ घटाद्युपाधिप्रयुक्तवर्त्तुलत्वादिकमवास्तवमेव निर्भेदे वस्तुनि तद्विरुद्धसभेदत्वस्य वास्तवत्वे वाऽनिर्मोक्षप्रसङ्ग इति भावः । द्वितीयस्त्वङ्गीक्रियते किंत्वीश्वरत्वादेर्वास्तवत्व भवदभिमतं न सिद्ध्यतीत्यभिप्रायेणाह— भ्रमादिति । ॥ १९५ ॥

विरुद्धयोरुपाधिद्वारापि वस्तुत एकत्रासंभवे दृष्टान्तमाह—

न रविशार्वरसख्यकृदीक्ष्यते
जगति कश्चिदुपाधिरमोहतः ।
यदि भवेत्स भवेद्भवतो मतः
स न भवेद्यदि सोऽपि न संभवेत् ॥ १९६ ॥

न रवीति । न हि सूर्यान्धकारयोः साहित्यापादकः कश्चिदुपाधिरस्तीत्यर्थः । ननु स विद्यते पेचकदीनां सूर्ये तमोबुद्धिदर्शनादिति चेत्सत्यं भ्रान्तिरेव सा न तु वस्तुतः । अन्यथान्येषामपि तस्मिन् तमोबुद्धिप्रसङ्गादित्यभिप्रेत्याह—अमोहत इति । वस्तुत इत्यर्थः । ततः

किमिति चेत् तद्वदेव परस्परविरुद्धभेदाभेदसाहित्यापादकोपाधेरप्यसंभवात् तत्साहित्यं न संभवेत्तत्संभवे वा सूर्यतमःसाहित्यमपि स्यादविशेषादित्याह—यदि भवेदिति। सः सूर्यतमः साहित्यापादकोपाधिर्यदि भवेत् भवेद् भवतो मतः भेदाभेदसाहित्यप्रयोजकः तमसः सूर्यसाहित्यापादकः उपाधिर्यदि न भवेत् स भवदभिमतोपाधिरपि न भवेदविशेषादित्यर्थः ॥ १९६ ॥

भ्रान्तिपक्षे तु नायं दोषः अविद्यायाः महायोगिन्या असंभावितामासचतुरत्वादिति भ्रमादलभ्यमित्युक्तमेवार्थं स्पष्टयति—

खमपि खादति खण्डितमीक्षते
निजशिरो नयनेन करार्पितम्।
किमपि दुर्घटमस्य न विद्यते
यदि विमूढमतिर्भवति स्वयम्॥ १९७ ॥

खमपीति। यदि स्वयं मूढमतिर्भवति तदाऽस्य विमूढमतेर्दुर्घटं किमपि न विद्यते इति सम्बन्धः। तदेवाह—खमपीत्यादिना। खमाकाशमपि खादतीव स्वप्नादाविति शेषः। खण्डितं छिन्नकरार्पितं हस्ते स्थापितं निजशिरः ईक्षते खं खण्डितमीक्षत इति वा तस्माद्भेदस्याविद्याविजृम्भितत्वात्सप्रपञ्चश्रुतेश्च तादृशभेदवादेन निर्विशेषात्मप्रतिपादनपरत्वान्नेशितव्यादिप्रपञ्चघटितमीश्वरत्वादिकमात्मनः स्वरूपमिति सिद्धम् ॥ १९७ ॥

किंच कार्यकारणभावो यदि वास्तवः स्यात्तदा तदधीनमीश्वरत्वादिकमप्यात्मनः स्वरूपं स्यादात्मा च स विशेषो भवेत् स एव दुर्निरूपः अतो नेश्वरत्वादिविशेषो वास्तवः न वात्मत्वं स विशेषमित्यभिप्रेत्याह—

इतश्च निर्भेदकमात्मतत्त्वं
निरूपणे कारणकार्यतादेः।
अनादिमायैकनिबन्धनत्वा-
दसंभवादस्य तु वस्तुवृत्त्या ॥ १९८॥

इतश्चेति। वक्ष्यमाणहेतोरपीत्यर्थः। चकारात्पूर्वोक्तसापेक्षत्वादिकं गृह्यते। हेतुमेवाह—निरूपण इति। कारणकार्यता कार्यकारणभावः आदिपदेन साक्षिसाक्ष्यतादिकं गृह्यते अस्य कार्यकारणतादेः वस्तुवृत्त्या वस्तुतः असद्वा कार्यं सद्वा कार्यं कुर्वद्वा कारणमकुर्वद्वा-कारणं सम्बन्धं वा साक्ष्यसम्बन्ध वेत्येवं विचारे कार्यकारणतादेः केनापि प्रकारेण निरूपयितुमशक्यत्वेन वस्तुतोऽसभवादाविद्यकत्वमेव वक्तव्यम्। ततश्च निर्भेदमेवात्मतत्त्वमित्यर्थः ॥ १९८ ॥

तत्र कार्यकारणभावस्य वस्तुतोऽसंभवं वैशेषिकमतानुसारेण कार्यस्य दुर्निरूपत्वेन तावदाह—

असन्न कार्यं गगनप्रसून-
वन्ध्यासुतादेः करणाप्रसिद्धेः।
न प्रागसत्कार्यमिति प्रवादः
प्रशस्यते तस्य विरोधहेतोः ॥ १९९ ॥

असन्नेति। किं कार्यमसदुत्पद्यते उत सत् नाद्य इत्याह—असन्न कार्यमिति। असतः करणाधीनसत्त्वलक्षणकार्यत्वस्यानुपपत्ते-रित्यर्थः। अप्रसिद्धमप्याह—वन्ध्यासुतादेरिति। कारणस्य निष्पादनस्या-प्रसिद्धेश्चेत्यर्थः। ननु वन्ध्यासुतादिकमत्यन्तासत्त्वान्मोत्पादि कार्यं तूत्पत्तेः पूर्वमसदुत्पद्यतामित्याशङ्क्य तदपि न्यायविरोधेन

दूषयति—न प्रागसदिति । उत्पत्तेः प्रागसदित्यर्थः । प्रवादः उक्तिः सिद्धान्त इति वा न प्रशस्यते न सम्यग्भवति । तत्र हेतुः—तस्येति । तस्य प्रागसतः पश्चात्कारणाधीनसत्त्वलक्षणोत्पत्तिरित्यस्य विरोधहेतोः यदसत् न तत्कदापि सत् यथा नरविषाणम्, यत्सत् न तत्कदाप्यसत् यथा ब्रह्मेति नियमविरोधाद्धेतोर्नैकस्य कालभेदेन सत्त्वासत्त्वे संभवत इत्यर्थः ॥ १९९ ॥

किंचोत्पत्तेः पूर्वं कार्यमसदिति प्रतीतौ पूर्वकालः कार्यस्य विशेषणं प्रतीयते न च तत्कार्यस्यासत्वे युज्यते असति विशेषण-प्रवृत्तेरदर्शनादनुपपत्तेश्चेत्याह—

विशेषणानामसति प्रवृत्ति-
र्न दृश्यते क्वापि न युज्यते च ।
युधिष्ठिरात्प्रागभवन्नरेन्द्रो
वन्ध्यासुतः शूर इतीह यद्वत् ॥ २०० ॥

विशेषणानामिति । पूर्वकालीनत्वोत्पत्स्यमानत्वादीनां न युज्यत इति विशेष्यसम्बन्धस्यैव विशेषणत्वादसता च सम्बन्धासंभवा-दित्यर्थः । असति विशेषणाप्रवृत्तौ दृष्टान्तमाह—युधिष्ठिरादिति । यद्वद्वन्ध्यासुतो युधिष्ठिरात् प्राक् नरेन्द्रोऽभवत् शूरश्चेति प्रतीतौ युधिष्ठिरप्राक्भवत्वनरेन्द्रत्वशूरत्वानां वन्ध्यासुतं प्रति विशेषणत्वञ्च युज्यते तद्वदुत्पत्तेः पूर्वमसदित्यपीत्यर्थः । ननूत्पत्तेः पूर्वं कार्य-मसदिति न ब्रूमः किन्तु तत्प्रागभाव एवेति चेन्न । किं प्रागभाव-सत्त्वेन घटस्यायातं घटस्वरूपं तु तदाऽसदेव सत्तासमवायस्य स्वरूपसत्त्वस्य वा तदाऽभावान्न हि घटसत्ता पटसत्ता भवति । न ह्यभावप्रतियोगित्वमेव सत्वं तदाऽसतोऽभावप्रतियोगित्वानु-पपत्तेश्च ॥ २०० ॥

किंचोत्पत्तिस्वरूपानिरूपणादप्यसत्कार्यवादोऽयुक्त इत्याह—

उत्पत्तिरप्यस्य निरूप्यमाणा
न काचिदागच्छति युक्तिमार्गम् ।
स्वसत्तया स्वैः समवायिकारणै-
रपीह्या स्यात्समवायिताऽस्य ॥ २०१ ॥

असज्जनिः सेत्युपवर्ण्यमानं
सुदुर्घटं न ह्यसतो युजैभिः ।
सदेव सद्भिः सह सर्ववस्तु
संगच्छते न त्वसदेव सद्भिः ॥ २०२ ॥

उत्पत्तिरिति । अस्य असतः । ननु प्रागसतः कार्यस्य सत्तासमवायित्वं स्वसमवायिकारणसमवायित्वं वोत्पत्तिरिति प्रसिद्धमतः कथं तदनिरूपणमित्याशङ्क्य सत्यं प्रसिद्धं तदेव कार्यस्यासत्त्वे नोपपद्यत इत्यभिप्रेत्याह—स्वसत्तयेति । यस्य कार्यस्य स्वसत्तया स्वाभिव्यङ्ग्यया सत्तया सह या समवायिता समवायाश्रयता सत्तानिरूपितसमवायाश्रयतेत्यर्थः । यद्वा स्वैः स्वीयैः समवायिकारणैः सह या समवायिता समवायिकारणेषु समवेतत्त्वमित्यर्थः ॥ २०१ ॥ सा सत्तासमवायिता समवायिकारणसमवायिताऽसज्जनिः असत उत्पत्तिरित्युपवर्ण्यमानं निरूप्यमाणं सुदुर्घटं सुतरां दुर्घटं तत्र हेतुः । नह्यसित । यतः असतः कार्यस्य एभिः सत्तया समवायिकारणैर्वा युजा सम्बन्धो न संभवति । सतोरेव सम्बन्धात् तत इत्यर्थः । नन्वसतोऽपि सद्भिः सह सम्बन्धः किं न स्यादित्याशङ्क्याह—सदेवेति । सदेव सर्ववस्तु सद्भिः सह सम्बध्नाति न त्वसदेव—असदपि । समवायो हि सम्बन्धः

सम्बन्धिनोः सतोरेव भवति नान्यतरस्यासत्त्वेप्याकाशतत्कुसुमयोः समवायसम्बन्धादर्शनात् । न चोत्पद्यमानमपि सदेवेति सत्तादिसमवायः स्यादिति वाच्यम् । सत्तासमवायित्वस्यैव सत्त्वेनोत्पद्यमानत्वे च तत्पूर्वं सत्त्वानुपपत्तेः । तथा च सत्तादिसमवायित्वस्यैवोत्पत्तित्वे तत्पूर्वं कार्यस्यासत्वात् न तस्य सत्तादिसमवायित्वमिति नोत्पत्तिर्निरूपयितुं शक्यत इत्यर्थः ॥ २०२ ॥

नन्वसतः सद्भिः सह सम्बन्धाभावेप्यसद्भिरेव सत्तादिभिः सह सम्बन्धः किं न स्यादित्याशङ्क्य सत्तादीनां सत्त्वान्नैवमित्याह—

सती ह सत्ताऽस्य पटस्य दृष्टा

तथैव सन्तः पटतन्तवोऽपि ।

तया च तैश्चास्य कथं पटस्य

सम्बन्धिता स्यादसतो वदैतत् ॥ २०३ ॥

सती हेति । ह इत्यवधारणे । इह वैशेषिकसमय इति वा । अस्य सत्ता सत्येव दृष्टा न त्वसती अन्यथा सद्बुद्धिविषयत्वायोगात् तथा पटतन्तवः पटकारणतन्तवोपि सन्त एव दृष्टाः अन्यथा कारणत्वानुपपत्तेरित्यर्थः । फलितमाह—तया चेति । सदेकाश्रयया सत्या सत्तया तैः सद्भिस्तन्तुभिश्च सहास्यासतः पटस्य कथं सम्बधिता स्यादेतत्सम्बन्धिता स्यादित्येतद्वदेत्यर्थः ॥ २०३ ॥

ननु माभूत् सत्तासमवायः स्वकारणसमवायो वा सतो जन्मप्रकारान्तरेणैव तत्तस्य भवत्वित्याशङ्क्य तथानभ्युपगमान्नैवमित्याह—

स्वकारणैस्तन्तुभिरेवमस्य
स्वसत्तया चान्वय एव जन्म ।
तवेष्टमेवं सति जन्म तस्य
न शक्यते वर्णयितुं पटस्य ॥ २०४ ॥

स्वकारणैरिति । अस्यासतः पटस्य स्वकारणैस्तन्तुभिरेव स्वसत्तया चान्वयः समवाय एव जन्म तवेष्टं नान्यदित्यर्थः । फलितमाह— एवं सतीति । सत्तादिसमवायस्यैवोत्पत्तित्वे सतीत्यर्थः ॥ २०४ ॥

ननु पटस्य सत्तासमवायित्वेन स्वकारणसमवायित्वं स्वकारणसमवायित्वेन च सत्तासमवायित्वमिति द्रव्यत्वगुणत्वयोरिव परस्परप्रयोज्यतया नासतः समवाय इत्याशङ्क्य किमेकदैव कार्यस्योभयसमवायित्वं किं वा पौर्वापर्येण नाद्यः परस्परप्रयोज्यप्रयोजकतानुपपत्तेः द्रव्यत्वगुणत्वयोश्चानादित्वेनादोषत्वात् तदसंमतेश्च, द्वितीये येन प्रथमं सम्बध्यते तत्समवायात् पूर्वं कार्यस्यासत्वात् कथं तेन तत्समवायि स्यादित्यभिप्रेत्याह—

तदन्वयात्प्रागसतः कथं स्या-
त्तदन्वयो न ह्यसदन्वयाय ।
सता समर्थं न हि वन्ध्यया त-
नुजः समन्वेति कदाचिदत्र ॥ २०५ ॥

तदन्वयादिति । सत्तास्वकारणान्यतरान्वयादित्यर्थः । असतः कार्यस्येति शेषः । तदन्वयः सत्ताद्यन्यतरान्वयः कथं स्यान्न कथमपीत्यर्थः । तत्र हेतुः । न हीति । हि यतः असत्सतान्वयाय न समर्थमिति सम्बन्धः । तत्र दृष्टान्तमाह—नहीति । अत्र–लोके ॥ २०५ ॥

पूर्वं स्वसत्तादिसमवायादन्यदेवोत्पत्तिशब्दवाच्यमस्त्वित्याशङ्क्य तथानभ्युगमादिति हेतुरुक्तः इदानीमन्यच्च निरूपयितुं न शक्यमित्याह—

न च किंचिदन्यदसतो वदितुं
पटवस्तुनोऽत्र शकनीयमतः ।
जनिशब्दवाच्यमनवद्यतया
तदयुक्तमेवमसदुद्भवनम् ॥ २०६ ॥

न च किंचिदिति । अस्य पटवस्तुनः इतः सत्तादिसमवायादन्यज्जनिशब्दवाच्यमुत्पत्तिपदाभिधेयमनवद्यतया निर्दुष्टतया वदितु निरूपयितुं न शकनीयं न शक्यमिति सम्बन्धः । ननु किमिति निरूपयितुं न शक्यते आद्यक्षणसम्बन्धस्यैवोत्पत्तिपदार्थत्वादिति चेन्न । नित्यगगनादेरप्युत्पत्तिमत्त्वप्रसङ्गात् । क्षणस्यानादिप्रवाहरूपत्वेनाद्यत्वाभावाच्च । ननु स्वसमानकालीनपदार्थप्रतियोगिकध्वंसानाधारसमयत्वमेव क्षणस्याद्यत्वं तत्सम्बन्ध एवोत्पत्तिपदार्थः गगनादेश्च स्वसमानकालीनघटादिपदार्थप्रतियोगिकध्वंसाधारसमयसम्बन्धित्वान्नोत्पत्तिमत्त्वमिति चेन्न । समयसम्बन्धस्य संयोगादिरूपत्वेऽसतः कार्यस्यासंभवात् स्वरूपस्य चासम्बन्धत्वादुत्पत्तेः पूर्वं स्वरूपाभावाच्चेत्यभिप्रेत्योक्तमनतः इति । फलितमाह—तदिति । यतोऽन्यदुत्पत्तिपदाभिधेयं वक्तुमशक्यं तत्तस्मादेतदसदुद्भवनमसदुद्भवः अयुक्तं वक्तुमयुक्तमित्यर्थः । किंच किं सत्तादिसमवायस्तदा जायते उतानादिसिद्धः । नाद्यः जन्यसम्बन्धस्य सम्बन्धिद्वयजन्यत्वेनानुत्पन्नपटाद्युत्पत्त्यनुपपत्तेः । न द्वितीयः तत्र प्रमाणाभावात् । तत्र न तावत्प्रत्यक्षं प्रमाणमननुभवात् नाप्यनुमानं तत्सिद्धेः पूर्वं व्याप्त्यभावात् । न च संबन्धसामान्यव्याप्त्या तत्सिद्धिः

स्वरूपविषयत्वेन विशिष्टप्रत्ययस्यार्थान्तरत्वात् । न च स्वरूपाणामनेकत्वेन गौरवात्समवायस्यैकत्वेन लाघवात् स एवानुमानविषय इति वाच्यम् । स्फुटतरविवेकप्रत्ययाविषयत्वेन तदेकत्वासंभवात्तादृक्सत्त्वाच्च समवायस्यैकत्वे उत्पत्तेः पूर्वमपि तत्सत्तादिसमवायित्वेन कार्यस्य कादाचित्कत्वानुपपत्तेः । घटादिनिरूपितसमवायस्य पूर्वमसत्वे च तस्य जन्यतया दोषानिस्तारादिति ॥ २०६ ॥

ननु सत एव जन्मास्तु तत्र च पूर्वोक्तदोषगन्धोपि नास्तीति चेत् न हि कणादमतानुसारेणैवं वक्तुं शक्यमपसिद्धान्तापातादित्याह—

न च वर्णितादपरमत्र भवा-
ननुमन्यते जनिवचोर्थमितः ।
यदि वर्ण्यते किमपि तत्र भवे-
त्स्वमतप्रहाणमलिनीकरणम् ॥ २०७ ॥

न च वर्णितादिति । इतो वर्णितादिति सम्बन्धः । अत्र कार्यकारणभावपरीक्षायामुत्पत्तिपदार्थनिरूपणायां वा प्रागसतः सत्तादिभिः समवाय इत्येतस्माद्वर्णितादपरं जनिवचोऽर्थमुत्पत्तिपदाभिधेयं भवान् कणादमतानुसारी नानुमन्यते । तथैव सति यद्यसत उत्पत्तिपक्षोक्तदोषपरिहाराय भवता किमपि यत्किंचित्सदुत्पत्तिरित्येतद्वर्ण्यते तदा स्वमतप्रहाणमलिनीकरणं स्वमतप्रहाणमेव मलिनीकरणं स्वसिद्धान्तत्यागलक्षणदोषो भवेदित्यर्थः ॥ २०७ ॥

अपसिद्धान्ततामेव स्पष्टीकर्त्तुमुत्पत्तिपदार्थं कणादाभिमतं दर्शयति—

समवायिकारणगणेन तथा
सह सत्तया च पटवस्त्विह यत् ।
समवैति तत्कणभुगिच्छति त-
ज्जनिशब्दवाच्यमिति नान्यदितः ॥ २०८ ॥

समवायीति । इहोत्पत्तिपदार्थनिरूपणे समवायिकारणगणेन सह तथा सत्तया च सह पटवस्तु समवैतीति यत्तज्जनिशब्दवाच्यं पटोत्पत्तिशब्दवाच्यमिति कणभुगिच्छति इतः स्वसत्तादिसमवायादन्यत् सत उत्पत्तिरित्येवं रूपन्नेच्छतीति सम्बन्धः । पटवस्त्विति कार्यमात्रस्योपलक्षणम् प्रागसतः सत्तासमवायित्वं स्वकारणसमवायित्वं वा जनिपदाभिधेयमिति कणादमतं नान्यदित्यर्थः ॥ २०८ ॥

तर्हि कणादमहर्षिसंमतं तदेव जनिशब्दवाच्यमस्त्वित्यपि न शङ्कनीयं तदसंभवस्योपपादितत्वादित्याह—

न तदत्र संभवति युक्तिवशा-
दुपवर्णितं तदतिविस्तरतः ।
न च किञ्चिदन्यदुचितं भवतो
वदितुं स्वपक्षमपरित्यजतः ॥ २०९ ॥

न तदिति । तत्प्रागसतः सत्तादिसम्बन्धित्वमत्र कार्ये न सम्भवति असतो युक्तिवशात् तदसंभवनमतिविस्तरत उपवर्णितमित्यर्थः । तथा च भवान् यदि कणादमतानुसरणं परित्यज्य कपिलादेर्दत्तपुत्रो भवेत्तदा सत उत्पत्तिरिति वक्तुं शक्यम् अपरित्यज्य तु तत्सत उत्पत्तिरिति कथनेऽपसिद्धान्तापातो दुर्वार इति फलितमाह—न च किंचिदिति । अन्यत्—प्रागसतः स्वकारणादिसमवायादन्यत् ॥ २०९ ॥

किं च प्रागसत उत्पत्तिरिति पक्षे पटादिकार्यस्य तन्त्वादिभ्य इव चक्रादिभ्योऽप्युत्पत्तिप्रसङ्गः। नन्वन्वयव्यतिरेकौ ययोर्विद्येते तयोरेव कार्यकारणभाव इति चेन्न। अन्वयव्यतिरेकौ प्रमाणं प्रमेयं यथावस्थितमेवावगमयतः न तु कुरुतः ततश्चक्रादेः पटादिकं प्रति कारणत्वाभावः कथमिति वक्तव्यमेव स्वभावादिति चेन्न तस्य खाण्डनिकं प्रत्युपन्यासानर्हत्वात्। ननु स्वप्रागभाववतः कारणात् स्वस्योत्पत्तिरिति चेन्न। निमित्तादिप्रसङ्गापरिहारात्। प्रागभाववत्वं हि प्रागभावसम्बन्धित्वं न हि प्रागभावकारणयोः संयोगादिः संभवति तदभावे च तद्वत्त्वे मृदादेरपि तद्वत्त्वं किं न स्यात्। ननु प्रागभावस्य कारणेन सह विशेषणतैव सम्बन्धः इति चेन्न। विशेषणता हि स्वरूपमेव। तथा च पटप्रागभावस्वरूपस्य मृदादेश्च विद्यमानत्वात् तस्यापि तद्वत्त्वं स्यादेव। ननु विशिष्टप्रत्ययजननयोग्यत्वं सम्बन्धः। विशिष्टप्रत्ययश्च पटप्रागभावमृदोर्नास्तीति चेन्न योग्यता हि स्वरूपमेव नत्वन्यत् स्वरूपद्वयं च तत्रापि विद्यत एवेति विशिष्टप्रत्यय एव किमिति न भवेत्। सामग्र्याः कार्याव्यभिचारात्। ननु फलबलात्तादृशी योग्यता तत्र नास्तीति कल्प्यत इति चेन्न। योग्यतायाः स्वरूपत्वेन स्वरूपद्वयस्यैवाभावकल्पनाप्रसङ्गात्। एवं पटतत्प्रागभावयोरपि सम्बन्धाभावेन स्वप्रागभाववत इति वक्तुमशक्यत्वात् प्रागभाववन्मात्रादुत्पत्तावतिप्रसङ्गतादवस्थ्यात्। तस्मादसत उत्पत्तिरिति वैशेषिकपक्षो दुर्निरूप एवेत्युपसंहरति—

निरूपणायां न यतोऽस्ति कश्चि-
दुत्पत्तिशब्दार्थ इह त्वदीये।
पक्षे ततो दुर्घटनाप्रसिद्धि-
रसज्जनेरुक्तनयेन तावत्॥ २१०॥

निरूपणायामिति । असज्जनेस्तावद् दुर्घटताप्रसिद्धिः दुर्घटत्वेनैव सिद्धिः अनिरूपितरूपत्वेनैव सिद्धिरित्यर्थः ॥ २१० ॥

तर्हि सत एवोत्पत्तिरिति तावच्छब्दसूचितं सत्कार्यवादमाशङ्क्य निराकरोति ।

सतोऽपि कार्यत्वमयुक्तमेव
निरूपणे कारणकृत्यहानेः ।
न कारणव्यापृतिरत्र शक्या
सतः स्वरूपे वदितुं फलाय ॥ २११ ॥

सतोऽपीति । एवमसत इव सतोप्युत्पत्तेः पूर्वं विद्यमानस्यापि निरूपणे कार्यत्वं क्रियमाणत्वमयुक्तं तत्र हेतुः—कारणकृत्यहानेरिति । कारणव्यापारस्य प्रयोजनाभावात्कारणवैयर्थ्यप्रसङ्गादित्यर्थः । कुत इति चेत्किं कार्यस्यात्मलाभाय कारणव्यापारः, किं वा पृथुबुध्नत्व-शौक्ल्यादिधर्मविशेषसिद्धये, अथवा आवरणनाशाय, यद्वा अभि-व्यक्तये, अथवा अनभिव्यक्तिनाशाय, नाद्य इत्याह—न कारणेति । अत्र सतः कार्यत्वमिति पक्षे सतः विद्यमानस्य कार्यस्य स्वरूपे फलाय-आत्मलाभलक्षणफलाय कारणव्यापृतिर्वदितुं न शक्या स्वरूपस्य लब्धत्वादित्यर्थः ॥ २११ ॥

द्वितीयमनुवदति—

गुणं क्षिपत्कारणमर्थवत्त्वं
लभेत चेन्नात्र गुणस्य भावात् ।
न चेद्गुणोऽसत्करणं प्रसक्तम्
निरर्थकं कारणकर्म तस्मात् ॥ २१२ ॥

गुणं क्षिपदिति । गुणं शौक्ल्यादिधर्मं क्षिपत् जनयदर्थवत्त्व प्रयोजनवत्त्वं सत्कार्यवादे जायमानस्य गुणस्यापि सत्त्वमेव वक्तव्यमन्यथा असत्कार्यवादापत्तेः ततश्च कारणव्यापारो व्यर्थ एवेत्याह— नेत्यादिना । अत्र कारणे गुणस्य शौक्ल्यादिधर्मस्यापि भावात् सद्भावादित्यर्थः । असत्कारणमसदुत्पादनं कारणकर्म कारणव्यापारः गुणविशेषाधानासंभवस्तच्छब्दार्थः ॥ २१२ ॥

तृतीयमनुवदति—

मलं निरस्यार्थवदिष्यते चे-
न्मलोऽपि सन्नैव निरस्य इष्टः ।
सतोऽविनाशादसतोऽजनेश्च-
वृथा ततः कारणमत्र पक्षे ॥ २१३ ॥

मलमिति । मलवन्मलः पूर्वावस्थादिलक्षणावारकपदार्थः तन्निरस्य कारणमर्थवद् भवतीतीष्यते चेदित्यर्थः । अस्मिन्नपि पक्षे निरस्यो मलोपि सन्नेव वक्तव्यः असतो नित्यनिरस्तत्वेन निरस्यत्वायोगात्ततः कारणं वृथैव स्यादित्याह—मलोऽपीति । अत्र पक्षे निरस्यो मलोपि सन्नैवेष्टः । ततः कारणं वृथा स्यादिति सम्बन्धः । ननु निरस्यस्य मलस्य सत्त्वे कथं कारणस्य वैयर्थ्यं तन्निरसनेनैव सार्थकत्वादित्याशङ्क्य भवेदेवं यदि निरासः सम्भवेत् स एव सत आत्मवन्निरस्यत्वानुपपत्तेरित्याह— सत इति । अविनाशादिति छेदः । विनाशासंभवादित्यर्थः । किं च कारणेन जायमानो निरासः सन्वाऽसन्वा । आद्ये कारणवैयर्थ्यं, द्वितीयस्तु न संभवति असतः शशशृङ्गस्येव जन्यत्वानुपपत्तेः । असत्कार्यवादापत्तेश्चेत्याह—सत इति । अजनेरितिच्छेदः । जन्यसंभवादित्यर्थः ॥ २१३ ॥

कारणस्य गुणविशेषजनकत्वासंभवादेवाभिव्यक्तिजनकत्वमप्ययुक्तमिति सिद्धमिति चतुर्थं निरस्यति —

तस्मादभिव्यक्तिकरी न हेतुः

प्रवृत्तिरत्रार्थवती घटेत ।

न चानभिव्यक्तिनिरासवृत्त्या

तस्मान्न सत्कार्यवचः प्रशस्तम् ॥ २१४ ॥

तस्मादभिव्यक्तिकरीति । अभिव्यक्तिकरी सत्यर्थवती न घटते अभिव्यक्तेः सत्त्वेऽसत्त्वे च तज्जनकत्वासंभवादित्यर्थः । कारणस्य मलनिरासार्थतानिरासेनानभिव्यक्तिनाशकत्वमपि न युक्तमित्याह— न चेति । अनभिव्यक्तिनिरासवृत्त्या अनभिव्यक्तिनिरासमार्गेणाप्यर्थवती न घटत इत्यनुषङ्गः अनभिव्यक्तेः सत्त्वे निरासानुपपत्तेः । असत्त्वे च नित्यनिरस्तत्वेन निरासानुपपत्तेरित्यर्थः । तस्मात्सत्कार्यवादोऽप्यनुपपन्न इत्युपसंहरति — तस्मादिति । केनापि प्रकारेण कारणव्यापारस्य प्रयोजनासंभवस्तच्छब्दार्थः । सत्यकार्यवचः—सतः कार्यत्वमिति वचः ॥ २१४ ॥

किं च सत्कार्यवादिनः कारणगुणव्यापारः सन्नित्येव वक्तव्यः । अन्यथा असतस्तस्योत्पत्त्यनुपपत्त्या कार्योत्पादनस्यैवासंभवात् कारणगणव्यापारस्य च सामग्रीलक्षणस्य नित्यत्वे सर्वदा कार्योत्पत्त्यवश्यंभावे सुषुप्तिमूर्च्छाप्रलयादिकं न स्यादित्युभयतःपाशा रज्जुरित्यभिप्रेत्याह—

नित्या च कारकगणस्य सती प्रवृत्ति-

र्नित्यं व्यनक्ति सकलं फलमित्यवश्यम् ।

वक्तव्यमत्र न लयो न सुषुप्तिमूर्छे

नो चेन्न सृष्टिरिति कष्टमुपस्थितं वः ॥ २१५ ॥

नित्या चेति । नित्यं सर्वदा फलं कार्यमवश्यं वक्तव्यमिति सामग्र्याः फलाव्यभिचारादित्यर्थः । ततः किमिति तत्राह—अत्रेति । अत्रास्मिन्पक्षे लयः प्रलयः कारणगणव्यापारस्यागन्तुकत्वे दूषणमाह—नो चेदिति । कारणगणप्रवृत्तिर्नित्या नो चेत्कदाचिदसती स्यात् तथा च तस्या एवोत्पत्त्यनुपपत्तेः सृष्टिः कार्योत्पत्तिर्न स्यादिति वः सत्कार्यवादिनां कष्टमुपस्थितमुभयतः पाशा रज्जुरित्यर्थः ॥ २१५ ॥

ननु भवत्पक्षेपि कार्यस्यासत्त्वं सत्त्वं वा वक्तव्यम्, तृतीयप्रकारासंभवात् तथा च भवदुक्तदोषो भवन्तमप्याश्रयत इति चेन्मैवम्—अस्मन्मते सत्त्वासत्त्वादिप्रकारैरनिर्वचनीयमायाजन्यत्वेन कार्यस्यापि तादृग्रूपतया कस्यापि दोषस्याप्रसक्तेरित्याह—

वेदान्तवादिसमयेऽपि समानमेत-

च्चोद्यं परैर्न खलु वाच्यमिहाप्रसक्तेः ।

अस्मन्मते न खलु संव्यवहारमात्रे

मायामये किमपि दूषणमस्ति यस्मात् ॥ २१६ ॥

वेदान्तेति । एतच्चोद्यं कार्यस्य सत्त्वासत्त्वविकल्पदूषणं वेदान्तवादिसमयेऽपि समानमिति परैर्वैशेषिकादिभिर्न वाच्यम् । तत्र हेतुः इहेति । इह वेदान्तवादिसमये ऽप्रसक्तेस्तस्य चोद्यस्य प्रसक्तेरेवाभावादित्यर्थः । प्रसक्त्यभावमुपपादयति - अस्मन्मत इति । संव्यवहारमात्रे व्यवहारमात्रे व्यवहारमात्रसिद्धे वस्तुतो मिथ्याभूत इत्यर्थः । तत्र हेतुः—मायामय इति । अनिर्वचनीयमायाकार्ये न हि मायिकपदार्थेपि

किंचिद्दूषणमस्ति । मायिकस्य सुत्यसहत्वस्य भूषणत्वात् ततोऽस्मन्मते प्रपञ्चपरमार्थतावादिभिः साम्यं न चोदनीयमित्यर्थः । तथा च स्वव्याघातदर्शित्त्वाभावान्नैतस्य जातित्वमित्यर्थः ॥ २१६ ॥

कार्याकारणभावादेः संव्यवहारमात्रत्वं ब्रह्मनन्दिनापि छान्दोग्यषष्ठाध्यायव्याख्यानावसर उक्तमुक्तदोषाप्राप्त्यर्थमित्याह—

आत्रेयवाक्यमपि संव्यवहारमात्रं
कार्यं समस्तमिति नः कथयांबभूव ।
सत्कार्यवादविषयो न हि दोषराशि-
र्मायामये भवितुमुत्सहते विरोधात् ॥ २१७ ॥

आत्रेयवाक्यमिति । अत्रिवंश्यो ब्रह्मनन्दी आत्रेयः तद्वाक्यं- "नासत उत्पत्तिः अनिष्पाद्यत्वात् । नापि सतः प्रवृत्त्यानर्थक्यात् । सत्त्वाविशेषादभिव्यक्त्यर्थमिति चेन्न । तस्या अपि सत्त्वात् । प्रवृत्तिनित्यत्वाच्च सदाऽभिव्यक्तिप्रसङ्गः । न संव्यवहारमात्रत्वादि"त्यादिकं तद्वाक्यं सदसत्कार्यपक्षदूषणेन समस्तं कार्यं संव्यवहारमात्रमिति नः कथयांबभूव । अतोऽत्र सत्पक्षोक्तदोषो नास्तीत्यर्थः । ननु तदुक्तिमात्रेण कथं विवर्त्तवादे सदसत्पक्षोक्तदोषाभाव इत्याशङ्क्य न केवलं तदुक्तिमात्रेण किं तु सयुक्तिकं तेनोक्तत्वादिति विवक्षन्नादौ सत्कार्यवादसमाश्रितदोषासंभवमाह—सत्कार्येति । दोषराशिः कारणव्यापारनैरर्थक्यं कार्यस्य सदाभावादिश्च दोषगणो मायामये कार्ये भवितुं नोत्सहते । तत्र मायामयपदसूचितं हेतुमाह—विरोधादिति । सत्त्वप्रयुक्तानां दोषाणां तद्विरुद्धसद्विलक्षणकार्येऽसंभवादित्यर्थः ॥२१७॥

मायावादं प्रति सत्कार्यवादस्य सन्निकृष्टत्वेपि तत्प्रयुक्तदोषाभावेऽसत्कार्यवादप्रयुक्तदोषो दूरापास्त इत्याह —

काणाददर्शनसमाश्रयदोषराशि-
दूरान्निरस्त इह संव्यवहारमात्रे ।
वेदान्तभूमिकुशलो मुनिरात्रिवंश्य-
स्तेनाऽऽह कार्यमिह संव्यवहारमात्रम् ॥ २१८ ॥

काणादेति । इह संव्यवहारमात्रे मायामये कार्ये अतो युक्तियुक्तमेव तदुक्तमित्याह—वेदान्तेति । मुनिः ब्रह्मानन्दी तेन येन कारणेनेतरयोः पक्षयोर्दुष्टता तत्प्रयुक्तदोषस्य च मायावादे प्राप्तिर्नास्ति तेनेह जगति कार्यं संव्यहारमात्रमाहेत्यर्थः ॥ २१८ ॥

ननु ब्रह्मनन्दिवाक्येष्वनेकपक्षप्रतिभासनादयमेव पक्षः सिद्धान्त इति कथं निश्चीयत इति चेत्परमात्मनिरूपणावसरे प्रतिपादितत्वादित्याह—

षष्ठप्रपाठकनिबद्धमुदीरितं यत्
तत्सत्यमेव खलु सत्यसमाश्रयत्वात् ।
अत्रैव यत्पुनरुवाच समुद्रफेन-
दृष्टान्तपूर्वकमदो व्यवहारदृष्ट्या ॥ २१९ ॥

षष्ठेति । षष्ठाध्यायसम्बद्धं यदुदीरितं तत्सत्यमेव तथ्यमेव खलु कुतः सत्यसमाश्रयत्वात्—सत्यपरमात्मप्रतिपादनपरत्वात् षष्ठाध्यायविचारस्येत्यर्थः । ननु षष्ठाध्याये परिणामवादोऽप्युक्त इति चेत्सत्यं तद्व्यवहारदृष्ट्यैव सत्कार्यवादादिदूषणपुरःसरं न कार्यकारणभावस्य संव्यवहारमात्रत्वादिति तदुक्तेरित्याह—अत्रैवेति । यत्परिणामलक्षणं कार्यमदः तत् ॥ २१९ ॥

तर्हि परिणामवादस्य विस्तरेणाभिधानं किमर्थमिति चेदद्वैता वगतिं प्रति परम्परयोपयोगित्वादित्याह—

पूर्वं विकारमुपवर्ण्य शनैः शनैस्त-
द्दृष्टिं विसृज्य निकटं परिगृह्य तस्मात् ।
सर्वं विकारमथ संव्यवहारमात्र-
मद्वैतमेव परिरक्षति वाक्यकारः ॥ २२० ॥

पूर्वमिति । पूर्वमादौ विकारं विकारवादमुपवर्ण्याथानन्तरं शनैः शनैः सर्वं विकारं कार्यं संव्यवहारमात्रं यथा भवति । तथा तस्माद्विकारवादादपि निकटं समीपभूतमद्वैतावगमं प्रत्यत्यन्तसन्निहिते विवर्त्ते परिगृह्येत्यर्थः । तद्दृष्टिं विकारदृष्टिं विसृज्याद्वैतमेव परिरक्षति परिपालयतीति सम्बन्धः । वाक्यकारः—छान्दोग्यभाष्यवार्तिककारो ब्रह्मनन्दी । अथवा विकारवादो व्यवहारदृष्ट्यैव व्युत्पादितः न तु सिद्धान्तत्वेनेति कुतो ज्ञायत इति चेत् यत आदौ विकारमुपवर्ण्य पश्चात्तं परित्यज्य विवर्त्तवादमाश्रित्याद्वैतं प्रतिपादितवान् तस्मादित्याह—पूर्वमिति ॥ २२० ॥

किंचाद्वैतमेव तत्राध्याये सिद्धान्तत्वेन विवक्षितं न तु विकारवाद इत्येतद्भाष्यकृद्द्रविडाचार्यवचनादपि निश्चीयत इत्याह –

अन्तर्गुणा भगवती परदेवतेति
प्रत्यग्गुणेति भगवानपि भाष्यकारः ।
आह स्म यत्तदिह निर्गुणवस्तुवादे
संगच्छते न तु पुनः सगुणप्रवादे ॥ २२१ ॥

अन्तर्गुणेति। अन्तर्गुणेत्यस्य व्याख्या प्रत्यग्गुणेति, गुणशब्दः स्वरूपपरः परदेवता परमात्मा प्रत्यग्गुणा भगवती परदेवतेति भगवतीति परदेवता च प्रत्यग्गुणेति यदाह भगवान् भाष्यकारः छान्दोग्योपनिषद्भाष्यकारः तदपीह निर्गुणवस्तुवादे प्रत्यग्ब्रह्मणोरत्यन्ताद्वैतवाद एव संगच्छते न तु सगुणप्रवादे विकारवाद इत्यर्थः ॥ २२१ ॥

किंच कार्यकारणयोरत्यन्तं भेदः उतात्यन्तमभेदः अथवा भेदाभेदौ नाद्यः संगच्छत इत्याह—

न खलु कारणकार्यसमन्वयो
भवतु जातु चिदत्र विभिन्नयोः।
किमिह सागरसह्यसमाश्रयो
भवति कारणकार्यसमन्वयः ॥ २२२ ॥

न खल्विति। कारणकार्यसमन्वयः कार्यकारणरूपेण सम्बन्धः जातुचित् कदाचिदपि,अत्र—जगति, भिन्नयोः कार्यकारणसम्बन्धाभावमुदाहरणमुखेन स्पष्टयति—किमिति। इह लोके सह्यः पर्वतविशेषः सागरसह्यसमाश्रयः कार्यकारणभावो भवति किं नास्त्येव तथा च तन्तुपटयोरपि भिन्नत्वे कार्यकारणभाव एव न स्यात् दर्शनं त्वन्यथापि घटत इत्यर्थः ॥ २२२ ॥

न द्वितीय इत्याह—

न च तथायमभिन्नसमाश्रयो
भवितुमुत्सहतेऽनभिवीक्षणात्।
न हि घटो विदधाति घटं क्वचि-
न्न च पटः पटमित्थमनीक्षणात ॥ २२३ ॥

न च तथेति। तथा यथा भिन्नसमाश्रयः कार्यकारणभावो नास्ति तथाऽभिन्नसमाश्रयोप्ययं कार्यकारणसमन्वयो भवितुन्नोत्सहते। तत्रादर्शनमेव हेतुमाह—अनभिवीक्षणादिति। अदर्शनादित्यर्थः। अदर्शनमेवोदाहरणमुखेन स्पष्टयति। नहीति। क्वचित् क्वचिदपि न च पटः पटं विदधातीत्यनुषङ्गः। घटोपि तं प्रति कारणमस्त्विति वदन्तं प्रत्याह—इत्थमनीक्षणादिति। पूर्वापरभावापन्नपदार्थनियतस्य कार्यकारणभावस्य स्वात्मानं प्रति स्वस्मिन्नसंभवादित्यर्थः। तथा च तन्तुपटयोरभेदेपि कार्यकारणभावो न स्यादित्यर्थः। भेदाभेदपक्षस्तु प्रतीत्यैव विरुद्ध इत्युपेक्षितः॥ २२३॥

एवं कार्यस्य सत्त्वासत्त्वाभ्यामनिरूपणेन कार्यकारणभावो दूषितः। इदानीं कारणमपि व्यापारवद्वा कारणं निर्व्यापारं वा आद्येऽपि व्यापार आगन्तुको वा नित्यो वेति विकल्प्याद्यमनवस्थया दूषयति—

कुर्वत्कारणपक्षमाश्रितवतः कुर्वच्च कुर्वत्कृतं
तत्कुर्वच्च तथाविधान्यकृतमित्येषाऽनवस्था भवेत्।
कुर्वद्रूपमकार्यमिष्टमिति चेन्नित्यं जगज्जायतां
नित्यं मा जनि वा विशेषविरहादेतत्समस्तं जगत्॥२२४॥

कुर्वत्कारणेति। व्यापारवत् कारणमिति पक्षे विशेषणीभूतव्यापारोपि जन्यः व्यापारान्तरवतो जात इति वक्तव्यम् एवं सोऽपि व्यापारस्तथाविधेनान्येन जायते इत्येवमनवस्था स्यात्। ततश्च कुर्वत्कारणं व्यापारश्चागन्तुक इत्ययं पक्षो न समीचीन इत्यर्थः। व्यापारो नित्य इति द्वितीयपक्षे सामग्रीलक्षणकारणगणव्यापारस्य सर्वदा भावात् सर्वदा कार्यं भवेन्न भवेद्वा न तु कदाचित् भवेत् नियामका-

भावादित्याह—कुर्वद्रूपमिति । व्यापारवद्रूपं व्यापार इति यावत् मा जनि जननं माभूदित्यर्थः । तत्र हेतुः—विशेषविरहादिति । नियामकाभावादित्यर्थः ॥ २२४ ॥

अकुर्वदेव कारणमिति पक्षमतिप्रसङ्गेन दूषयति—

सर्वं सर्वसमुद्भवाय घटते कुर्वन्न चेत्कारणं
न ह्यस्मिन्क्वचिदस्ति कस्य चिदपि व्यापारवत्ता यतः ।
तस्मात्कारणकार्यतादि सकलं मायामयं तत्त्वतो
नाऽऽसीदस्ति भविष्यतीति सकलं चैतन्यशेषं जगत् २२५

सर्वमिति । कार्यानुकूलव्यापारवदेव यदि कारणं न स्यात्तदा तिलादेव तैलमित्येवमादि नियमो न स्यात् किं तु सर्वमपि सर्वोद्भावकं स्यात् । तत्र हेतुः—न हीति । यतोऽस्मिन् कुर्वत्कारणमिति पक्षे कस्यचिदपि कारणस्य क्वचिदपि कार्ये विषये व्यापारवत्ता नास्ति अत इत्यर्थः । यदि तिलस्य तैलोत्पादनानुकूलव्यापाराभावेपि तदुत्पादकत्वं तदा सैकतस्यापि तत्किं न स्यादित्यर्थः । ननु भिन्नयोर्निर्व्यापारयोरपि ययोरन्वयव्यतिरेकौ तयोः कार्यकारणभाव इति नातिप्रसङ्ग इति चेन्न । नित्यविभूनामकारणत्वप्रसङ्गात् । दण्डादिव्यतिरेकेणापि गृहदास्यादिभिर्घटादिनिर्माणदर्शनाच्च । न हि गृहदासीविनिर्मितघटे कुतूहलादिनाऽस्मदादिभिस्तिर्यगूर्ध्वं च संयुज्यमानतन्तुषु यन्त्रनिष्पीडनं विना वा जायमानेषु तैलेषु घटपटतैलबुद्धिर्भ्रान्तिर्भवति न वा जातिविशेषो दृश्यते । तस्मात्कार्यकारणभावो न वास्तवः किन्त्वाविद्यक एवेति चैतन्यमात्रं तत्त्वमित्युपसंहरति—तस्मादिति । कार्यस्य सत्त्वासत्त्वादिना

कारणस्य कुर्वत्वाकुर्वत्वादिना निरूपणं तच्छब्दार्थः। इति—इति कृत्वा ॥ २२५ ॥

ननु निर्व्यापारस्यैव कारणत्वं नचातिप्रसङ्गः—तिलादेस्तैलाद्युत्पादनानुकूलशक्तिवत् सिकतादेस्तदभावादतः शक्तिविशेष एवातिप्रसङ्गं निवारयतीति चेत् तिलादेस्तैलादावेव शक्तिरिति कुतो नियमः तैलादेरेव तच्छक्यत्वादिति चेत्तर्हि परस्पराश्रय इत्याह—

सकलशक्तिविकल्पनयाऽन्वये
सकलशक्यविकल्पनयाऽन्वयः।
सकलशक्यविकल्पनयाऽन्वये
सकलशक्तिविकल्पनयाऽन्वयः ॥ २२६ ॥

इतिपरस्परसंश्रयता यदा
वद कथं जगतः परमार्थता।
यदि पुनर्जगतोऽपरमार्थता
परममस्ति पदं परमात्मनः ॥ २२७ ॥

सकलेति। सकलस्य कारणस्य शक्तिविकल्पनया शक्तिविशेषेणान्वयेऽस्य कारणस्य शक्तिरस्मिन्नेवेति शक्यव्यावृत्तशक्त्यन्वये सतीत्यर्थः। सकलशक्यविकल्पनया सकलस्य शक्यविशेषेणान्वयः। अस्येदमेव शक्यमिति शक्यविशेषेणान्वय इत्यर्थः। एवमुत्तरत्रापि द्रष्टव्यम्। शक्तिर्ह्यतीन्द्रियतया कार्यैकोन्नेया। कार्यं च तदीयत्वेन ज्ञातमेव तामनुमापयति। तथा च कार्यस्य तदीयत्वसिद्धौ कारणस्य

तदनुकूलशक्तिमत्त्वसिद्धिः कारणस्य तदनुकूलशक्तिमत्त्वसिद्धौ कार्यस्य तदीयत्वसिद्धिरित्यनेन प्रकारेण परस्पराश्रयग्रस्तत्वात्कथं जगतः पारमार्थिकत्वमिति भावः । एवं चाद्वितीयं ब्रह्मैव केवलं परमार्थतत्त्वमिति सिद्धमित्युपसंहरति—यदि पुनरिति । परमात्मनः परमं पदमेवास्ति अबाधितं विद्यत इत्यर्थः ॥ २२६ ॥ २२७ ॥

केचिच्छक्तिमदेव ब्रह्म वस्तुत इति वदन्ति । ब्रह्मणो हि शक्तिद्वयमेका चैतन्यलक्षणा वास्तवी अन्या तु जडा अनृता अविद्याख्या तयोश्च परस्परसंसर्गाज्जगदुत्पत्तिः ब्रह्मस्वरूपचैतन्यलक्षणा शक्तिर्वस्तुनो निर्विकारापि विकुर्वत्या अविद्यया सम्बन्धाच्छक्तिमद्ब्रह्मस्वरूपाद्भेदेन जीवलक्षणकार्यभावं प्राप्नोतीति तन्मतमाह –

चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते
सत्यैवास्य जडा परा भगवतः शक्तिस्त्वविद्योच्यते ।
संसर्गाच्च मिथस्तयोर्भगवतः शक्त्योर्जगज्जायतेऽ-
सच्छक्त्या सविकारया भगवतश्चिच्छक्तिरुद्रिच्यते ।२२८।

इत्येवं कथयन्ति केचिदपरे श्रद्धालवस्तत्पुनः
कस्यां चिद्भुवि संमतं च विदुषां नेष्टं तु भूम्यन्तरे ।
कर्मोपास्तिविधानभूमिषु तथा सत्संमतं निर्गुणे
तत्त्वे तत्परवेदवाक्यविषये त्वालोचिते नेष्यते ॥ २२९ ॥

चिच्छक्तिरिति । असतीति च्छेदः । अस्य भगवत इति सम्बन्धः । तयोश्चैतन्याविद्याख्ययोः असच्छक्त्या अविद्याख्यया सविकारया

भूतभौतिकलक्षणविकारसहितया भगवत उद्भिद्यते भगवतः सकाशात् भिद्यते भेदेन जीवभावं प्राप्नोतीत्यर्थः। एतच्च परिणामदृष्टिदशायामङ्गीकृतं न विवर्त्तदृष्टिदशायां तत्र शक्तिशक्तिमद्भावायोगादतो वस्तुतः शक्तिमत्त्वमनुपपन्नमेवेत्यभिप्रेत्याह—तत्पुनरिति। तद् ब्रह्मणः शक्तिमत्त्वं कस्यांचिद्भवि कस्यांचिद्दशायां तदेव विभज्य दर्शयति—कर्मेत्यादिना। कर्मविधिस्थलेषु उपास्तिविधिस्थलेषु च तद् ब्रह्म तथा शक्तिमत्त्वेन संमतं तत्परवेदवाक्यस्य विषये निर्गुणे तत्त्वे विचारिते तु तत्तथा नेष्यत इत्यर्थः। परिणामबुद्धिदशायां स्वाभाविकप्रपञ्चपारमार्थिकत्वबुद्ध्यनुरोधेन कर्त्रादिभेदमादाय कर्मादिविधिप्रवृत्तेर्ब्रह्मण शक्तिमत्त्वमङ्गीक्रियते विवर्त्तदशायां तत्परनिर्गुणवाक्यविचारावसरे तु न शक्तिशक्तिमद्भावरूपो विकल्पः प्रत्येतुं शक्यत इत्यर्थः॥२२८॥२२९॥

ननु चैतन्यलक्षणा शक्तिः ब्रह्मणः परिणामदृष्ट्याङ्गीकृता चेत् कथं तर्हि दृष्ट्यन्तरे तन्निरासः न हि चैतन्यं मिथ्या भवितुं युक्तमित्याशङ्क्य न चैतन्यस्य मिथ्यात्वं ब्रूमः किं तु तच्छक्तित्वस्यैव चैतन्यं हि ब्रह्मणः स्वरूपमेव सदविद्यातत्कार्यभूतभौतिकोपाधिवशात् ब्रह्मणो भिन्नमिव शक्तिरिव भवति जीव इति च व्यपदेशं लभते। तथा च नेतिनेतीत्यादितत्परवेदान्तवाक्यविचारेणाविद्यातत्कार्याद्युपाधौ निरस्ते औपाधिकशक्तित्वादिकं च निवृत्तं भवति। चैतन्यं च च केवलब्रह्मस्वरूपमात्रं पर्यवसितं भवति अतो न शक्तिशक्तिमद्भावोपि वास्तव इत्युपसंहरति—

मूर्त्तामूर्त्ततदुत्थलिङ्गपुरुषव्यामिश्रभूता चिति-
र्वीप्सापूर्वकनेतिनेतिवचनप्रध्वस्तसर्वद्वया।
संपूर्णे परमे सुखे परिहृताशेषे शिवे शाश्वते
सत्ये शुद्धमहिम्नि तायिनि परे भूम्न्यच्चरे तिष्ठति॥२३०॥

मूर्तेति । मूर्त्तानि पृथिव्यप्तेजांसि । अमूर्त्ते वाय्वम्बरे । तानि च तदुत्थलिङ्गपुरुषौ च मूर्त्तामूर्त्ततदुत्थलिङ्गपुरुषाः लिङ्गपुरुषशब्दौ सूक्ष्मस्थूलदेहपरौ तैर्व्यामिश्रिता आत्मभूता अवच्छिन्ना जडचेतनभावं प्राप्तेत्यर्थः । इदं च परिणामदशायां रूपम् । विवर्त्तदशायां तत्स्वरूपमाह– वीप्सेति । वीप्सारूपं यन्नेति नेति वचनं तेन प्रध्वस्तमवस्तुत्वेन ज्ञातं सर्वं द्वयं भूतभौतिकलक्षणं सर्वद्वैतं यस्याश्चितेः सा तथोक्ता तादृशी सतीत्यर्थः । द्वे वाव ब्रह्मणो रूपे तद्यथा माहारजनं वास इत्यादिना जडत्वेन प्रपञ्चं प्रकृत्य अथात आदेशो नेति नेतीति वीप्सया तदुभयं निषिध्य नेत्यन्यदिति केवलपरिपूर्णसच्चिदानन्दब्रह्मण एवावशेषणान्न शक्तिशक्तिमद्भावः परमार्थ इत्यर्थः ॥ २३० ॥

एवं कार्यकारणभावस्य दुर्निरूपित्वात् तद्घटितं जगत्कारणत्व-मात्मनो न स्वाभाविकमित्युक्तम् । इदानीं दृग्दृश्यसम्बन्धानिरूपणात् तद्घटितं साक्षित्वमपि तथेत्यभिप्रेत्य वास्तवत्वे जगतः सिद्ध्य-संभवमाह—

जगन्महिम्ना न जगत्प्रसिद्धि-
र्न चिन्महिम्नाऽपि जगत्प्रसिद्धिः ।
न च प्रमाणाज्जगतः प्रसिद्धि-
स्ततोऽस्य मायामयताप्रसिद्धिः ॥ २३१ ॥

जगन्महिम्नेति । जगतः पारमार्थिकत्वे किं तस्य स्वत एव सिद्धिः किं वा चैतन्यबलेन उत प्रत्यक्षादिप्रमाणबलात् न त्रेधापि वक्ष्यमाणहेतोः अतो मायामयत्वेनाध्यासिकसम्बन्धादेव सिद्धिर्वक्तव्येत्यर्थः ॥ २३१ ॥

तत्राद्यप्रतिज्ञाहेतुमाह—

जडत्वहेतोर्न जगन्महिम्ना

न चिन्महिम्ना तदसङ्गभावात् ।

न च प्रमाणात्तदकारकत्वा—

त्कृतस्य जाड्यादजडाजनेश्च ॥ २३२ ॥

जडत्वहेतोरिति । न जगन्महिम्ना जगत्प्रसिद्धिरिति शेषः । जगन्न स्वतः प्रकाशते जडत्वादित्यर्थः । द्वितीयायां हेतुमाह— न चिन्महिम्नेति । तदसङ्गभावात् तस्याश्चितः असङ्गत्वात् तया चिता असम्बद्धत्वादिति वा । चैतन्यबलादपि जगन्न प्रकाशते । तस्यासङ्गत्वेन प्रकाश्यसम्बन्धाभावात् प्रकाशसम्बन्धस्यैव प्रकाशमानताशब्दार्थत्वादित्यर्थः । तृतीयायां हेतुमाह— न च प्रमाणादिति । तदकारकत्वात्तस्य प्रमाणस्याकारकत्वात् प्रमाणेन हि साक्षान्न जगत्सिद्धिः किन्तु संविद्द्वारेति वक्तव्यं तत्र किं प्रमाणं जगद्विषयां संविदमुत्पादयति उत न । नान्त्यः—जगत्सिद्ध्यनुपपत्तेः प्रमाणस्यापि जडत्वात् । नाद्यः । प्रमाणस्याकारकत्वेन संविदुत्पादकत्वायोगादित्यर्थः । किंचोत्पद्यमानापि संवित् जडा उताजडा । नाद्यः । जगत्प्रकाशानुपपत्तेरित्यभिप्रेत्याह— कृतस्येति । उत्पन्नस्य कार्यस्य जडत्वनियमादुत्पन्नापि संविज्जडैव स्यात् तया जगत्सिद्धिर्न स्यादित्यर्थः । न द्वितीय इत्याह—अजडेति । यदि जगत्प्रकाशार्थं संविदोऽजडत्वमङ्गीक्रियते तर्हि तादृश्याः संविदश्चैतन्यात्मरूपत्वादुत्पत्तिर्न स्यात् तथा च प्रमाणेन जगत्सिद्धिरनुपपन्नेत्यर्थः ॥ २३२ ॥

अस्तु तर्हि चैतन्यबलादेव जगत्प्रसिद्धिः, न च चैतन्यजगतोः सम्बन्धाभावः—विषयविषयिभावस्य सत्त्वादिति चेन्न—विषयविषयिभावो हि मूलसम्बन्धपूर्वको वक्तव्यः । अन्यथातिप्रसङ्गात् ।

मूलसम्बन्धश्च तयोस्तादात्म्यं संयोगः समवायो वा न त्रेधापि संभवतीत्याह—

न संकरो नापि च संयुतिस्तयो-
र्न चास्ति तद्वत्समवायसंभवः।
ततो न चिच्चेत्यसमन्वयं प्रति
प्रतीयते का चन मूलसंगतिः॥ २३३॥

न संकर इति। तयोः चैतन्यजगतोः संकरस्तादात्म्यं न संभवति। चैतन्यस्याजडत्वेन जगतो वैलक्षण्यात्। नापि संयुतिः संयोगः संभवति। निरवयवस्य चैतन्यस्य तदयोगाद् गुणादिना तदयोगाच्च। नापि तयोः समवायसंभवः। अयुतसिद्ध्यभावादित्यर्थः। ततः इति फलितप्रदर्शनम्। यतस्त्रिविधसम्बन्धाभावः। ततश्चिच्चेत्यसमन्वयं प्रति चितश्चैतन्यस्य चेत्यस्य जगतश्च समन्वयं विषयविषयिभावलक्षणं सम्बन्धं प्रति का चन मूलसंगतिर्मूलसम्बन्धः न प्रतीयत इत्यर्थः। ननु जन्यजनकभावो वा विशेषणविशेष्यभावो वा चिच्चेत्ययोर्विषयविषयिभाव प्रति मूलसम्बन्ध इति चेत्— न तावज्जन्यजनकभावः संभवति। चितो नित्यत्वात्। अतीतादौ ज्ञानजनकत्वाभावेन ज्ञानविषयत्वाभावप्रसङ्गाच्च। चक्षुरादेरपि घटादिज्ञानविषयत्वप्रसङ्गाच्च। तस्यापि तज्जनकत्वात्। ननु प्रतीयमानत्वे सति जनकत्व विवक्षितमिति चेन्न। प्रतीति विषयत्वस्यैव प्रतीयमानताशब्दार्थत्वात्। तस्य चाद्याप्यनिरूपणात्। नापि विशेषणविशेष्यभावो विषयविषयिभाव प्रति मूलसम्बन्धः चाक्षुषज्ञानमिति चक्षुषोऽपि घटादिज्ञानविशेषणत्वेन तद्विषयत्वप्रसङ्गात्। जन्यजनकभावविशेषणविशेष्यभावयोरपि मुख्यसम्बन्ध-

त्वाभावेन मूलसम्बन्धापेक्षणाच्च । अन्यथा वनस्थदण्डादेरपि घटादि-कारणत्वप्रसङ्गः देवदत्तविशेषणत्वप्रसङ्गश्चेत्येतत्सर्वमभिप्रेत्योक्तं न काचनेति ॥ २३३ ॥

ननु चैतन्यचेत्ययोर्विशिष्टप्रत्ययजननयोग्यतालक्षणं स्वरूपमेव मूलसम्बन्धोऽस्त्विति चेन्नेत्याह —

न योग्यतामात्रनिबन्धनो भवे-
ज्जडात्मनोरत्र विवक्षितोऽन्वयः ।
तदा हि तस्या अनपायिरूपतः
सदाऽऽत्मनः स्यादनपायिसंसृतिः ॥ २३४ ॥

न योग्येति । घटः स्फुरति स्फुरन् घट इति विशिष्टप्रत्ययजनन-योग्यतामात्रं निबन्धनं कारणं यस्य स तथा जडात्मनोः जडचेतनयोः विवक्षितोऽन्वयः विषयविषयिभावलक्षणसम्बन्धो न संभवति । तत्र हेतुः—तदा हीति । हि शब्दो हेतौ तस्या योग्यताया अनपा-यिरूपतः आत्मस्वरूपतया अविनाशिरूपत्वात् सदेति च्छेदः । सदात्मन इति वा पदे सद्रूपात्मन इत्यर्थः । योग्यताया एव चिच्चेत्ययोर्वि-षयविषयिभावसम्बन्धं प्रति मूलत्वे योग्यताया आत्मस्वरूपत्वेना-नपायात् मुक्तावप्यात्मनो द्रष्टृत्वादिसंसारप्रसङ्गः । न च स युज्यते तन्निषेधक“यत्र त्वस्ये”त्यादिश्रुतिविरोधात् मुक्तेरपुरुषार्थत्वापाता-च्चेत्यर्थः ॥ २३४ ॥

किं च विशिष्टप्रत्ययजननयोग्यत्वस्य विषयविषयिभावं प्रति मूलसम्बन्धत्वे घटपटज्ञानयोरपि विषयविषयिभावप्रसङ्गः स्वरूपस्य तत्रापि भावादतीतादिपदार्थानां विशिष्टज्ञानाजनकतया विषयत्व-प्रसङ्गश्च, ननु सम्बन्धान्तरमन्तरा विशिष्टप्रत्ययविषयत्वमेव चिच्चे-

त्ययोर्विषयविषयिभावं प्रति मूलसम्बन्ध इति चेन्न—विषयत्वस्यैव सम्बन्धात्प्रागसिद्धेः। सम्बन्धसम्बन्धिनोर्भेदनियमेन सम्बन्धिस्वरूपस्य सम्बन्धत्वानुपपत्तेश्च। तस्मात्सम्बन्धान्तरानिरूपणात्तदभावे च जगत्सिद्ध्यनुपपत्तेर्जगत्प्रतिभानार्थं चैतन्याश्रिताविद्याविवर्त्तत्वेन जगतश्चैतन्यस्य चाध्यासिक एव सम्बन्धो वक्तव्य इत्याह—

ततो वियन्मुख्यमदो जगज्जडं
चिदात्मनोऽस्यैव विवर्त्त इष्यताम्।
अनाद्यविद्यापटसंवृतात्मन-
स्तदोपलभ्यत्वममुष्य कल्प्यते ॥ २३५ ॥

तत इति। जगतश्चिदात्मनश्च सम्बन्धानिरूपणं तच्छब्दार्थः। वियन्मुख्यं वियदादि केवलस्य चिदात्मनः। जगद्विवर्त्तसंभवशङ्कां व्यावर्त्तयति-अनाद्येति। अनाद्यविद्यैव पटवदाच्छादकत्वात् तेनावृत आत्मा पूर्णानन्दस्वरूपं यस्य चिदात्मनः स तथोक्तः तदा जगतो ज्ञानाश्रयविषयचिदात्मविवर्त्तत्वेऽमुष्य जगत उपलभ्यत्वमुपपद्यते। आध्यासिकसंबन्धसंभवादित्यर्थः। तथा च जगत्साक्षित्वमप्यात्मनो न वास्तवमिति भावः ॥ २३५ ॥

ननु चिदात्मनि प्रपञ्चाध्यासेन तयोराध्यासिकसम्बन्धेपि घटतत्प्रकाशयोः सम्बन्धो न संभवति घटस्य तत्रानध्यस्तत्वात्। न च घटप्रकाशोप्यात्मैवेति वक्तुं शक्यं तस्य व्यावृतत्वपरिच्छिन्नत्वोत्पत्तिविनाशादिधर्मकत्वादित्याशङ्क्यासिद्धो हेतुरित्याह—

संवित्तिभेदतदभावतदीयजन्म-
नाशादयो न खलु मानबलेन लभ्याः।

न ह्यस्ति मानमिह किं चन तद्यदस्या
धर्मस्वरूपविषयीकरणे समर्थम् ॥ २३६ ॥

संवित्तेरिति । संवित्तेः संविदो भेदः अन्योऽन्याभावः स च तस्या अभावः त्रैकालिकः स च तदीयौ जन्मनाशौ च संवित्तिभेदतदभाव-तदीयजन्मनाशाः ते आदिर्येषामनित्यत्वादीनां ते तथा संविदो जन्म-विनाशादिमत्त्वं वदन् प्रष्टव्यः किं तत्प्रमाणान्तरेण गृह्यते, उत स्वेनैवेति । नाद्यः । स्वप्रकाशसंविदः प्रमाणान्तराविषयत्वेन धर्मिग्रहणाधीनग्रहणस्योत्पत्त्यादिधर्मस्य प्रमाणेन नाशादिग्राहकत्वा-नुपपत्तेः । धर्म्यादिसापेक्षभेदादिग्राहकत्वानुपपत्तेश्च । तस्मात्सं-विदुत्पत्त्याद्यभावादात्मैव संविदित्यर्थः । नन्वेवमपि संविदात्म-त्वमनुपपन्नं तस्याश्चिदात्मधर्मत्वादित्याशङ्क्य तदप्यसिद्धमित्याह—
न ह्यस्तीति । यन्मानमस्याः संविदः धर्मस्वरूपविषयीकरणे धर्मत्वग्रहणे समर्थं तादृशं किं चन मानं नास्ति तस्याः स्वप्रकाशत्वेनैव प्रमाण-विषयत्वासंभवादित्यर्थः ॥ २३६ ॥

नन्वेवं सति संविदुत्पत्त्यादिप्रतीतेः का गतिरिति चेन्नास्त्येव स्वतः किन्त्वन्तःकरणवृत्त्युपाधिसंबन्धादेवोत्पत्त्यादिप्रत्यय इत्याह —

तस्मान्न मानफलता निरुपाधिकस्य
संवेदनस्य घटतेऽविषयत्वहेतोः ।
एवं च मानफलसिद्धिसमन्वयेन
सिद्धिर्जडस्य जगतो न कदाचिदस्ति ॥ २३७ ॥

तस्मादिति । संविदुत्पत्त्यादिग्राहकाभावस्तच्छब्दार्थः । मानफलता मानजन्यता निरुपाधिः निर्गत उपाधिर्यस्याः मानफलतायाः सा

तथोक्ता उपाधिसंबन्धं विना मानफलत्वं नास्तीत्यर्थः । तत्र हेतुः अविषयत्वहेतोरिति । न विद्यते विषय आश्रयत्वेन यस्य तदविषयं तत्त्वाद्धेतोः विषयसमवेतं प्रमाणजन्यं हि फलं तथैवानुभवादनवच्छिन्नं चैतन्यं न विषयसमवेतं न वा प्रमाणजन्यमतो वृत्त्युपाधिनैव विषयाश्रिते मानफलं न तु स्वत इत्यर्थः । एवं च मानफलेन संवेदनेन जगत्सिद्धिः संभवतीति मतमपि निरस्तमिति फलितमाह— एवञ्चेति । संवेदनस्योत्पत्तिविकलतया प्रमाणजन्यत्वाभावे सतीत्यर्थः । मानफलसिद्धिसमन्वयेन प्रमाणफलप्राकट्याख्यसिद्धिसम्बन्धेन जडस्य जगतः कदाचिदपि सिद्धिर्न संभवति । उत्पन्नस्य जडत्वनियमेन प्रमाणफलसिद्धेरपि जडत्वादित्यर्थः । तथा च जडस्य जगतः कूटस्थसंविदा आध्यासिकसम्बन्धादेव सिद्धिरिति वक्तव्यम् ॥ २३७ ॥

नन्वेवमपि जगत्सिद्धिर्न संभवति जगदध्यासाधिष्ठानेन कूटस्थपरमात्मसंविदा प्रकाशमानेनैव जगत्सिद्धिर्वक्तव्या अप्रकाशमानस्य साधकत्वायोगात्, न च तस्य प्रकाशः संभवति अध्यासे अध्यस्तस्यैव प्रकाशनियमादित्याशङ्क्य परस्पराध्यासाभ्युपगमान्मैवमित्याह—

इतरेतराध्यसनमस्त्वनयो-
रुभयोरतो दृगदृशोरनिशम् ।
अपरस्परव्यतिकरानुभवा-
दिह शुक्तिकारजतविभ्रमवत् ॥ २३८ ॥

इतरेतरेति । अत इत्यादौ योजनीयं प्रकारान्तरेण जगत्सिद्ध्यसंभवोऽतः शब्दार्थः । परस्पराध्यासेऽनुभवं प्रमाणमाह—अपरस्परेति ।

परस्परव्यतिकरानुभावात् घटः स्फुरति पटः स्फुरतीति दृग्दृश्ययोस्तादात्म्यानुभवादित्यर्थः । तादात्म्यानुभवविषययोरितरेतराध्यासे दृष्टान्तमाह–शुक्तिकेति ॥ २३८ ॥

इतरेतराध्यासे शून्यवादप्राप्तिमाशङ्क्य पूर्वोक्तं स्मारयति–

संसिद्धा सविलासमोहविषये वस्तुन्यधिष्ठानगी-
र्नाऽऽधारेऽध्यसनस्य वस्तुनि ततोऽस्थाने महान्संभ्रमः ।
केषांचिन्महतामनूनतमसां पाण्डित्यगर्वादय-
मन्योन्याध्यसने निरास्पदमिदं शून्यं जगत्स्यादिति ।२३९।

संसिद्धेति । उक्तार्थः श्लोकः ॥ २३९ ॥

ननु शून्यपरिशेषाभावेपि शून्यवादसाम्यमस्त्येव सर्वस्यापि जगतोऽध्यस्तत्वपरिज्ञाने यागादिप्रवृत्त्युच्छेदापत्तेरित्याशङ्क्य न हि सर्वान्प्रति जगतोऽध्यस्तत्वं ब्रूमः किन्तु शुद्धिविवेकादिसंपन्नं प्रति तथा च सर्वेषां विषयज्ञाने तदध्यस्तत्वपरिज्ञानानपेक्षणात् मन्दमतीनां स्वाभाविकप्रपञ्चसत्यतादृष्ट्यनुरोधेन पारलौकिकप्रवृत्त्युपपत्तेः व्युत्पन्नमतीनां च पारलौकिकप्रवृत्त्यभावादैहिकदेहयात्रादिनिर्वाहकप्रवृत्तेश्चाध्यस्तत्त्वपरिज्ञानेप्युपपत्तेर्न शून्यवादसमतापत्तिरित्यभिप्रेत्याह–

कृपणमध्यमपक्वधियां नृणां
मतिविलासविधात्रितयं क्रमात् ।
परिणतिर्बहुजीवतमस्विता
परमपुंसि तमः परिकल्पना ॥ २४० ॥

कृपणेति । मतिविलासविधात्रितयं बुद्धिकल्पितप्रकारत्रय-मित्यर्थः । विधात्रयमेवाह—परिणतिरिति । इदं च विवर्त्तनिष्प्रपञ्च-दृष्ट्योरुपलक्षणं कृपणधियः परिणतिः मध्यमधियो विवर्त्तदृष्टिः पक्वधियः निष्प्रपञ्चदृष्टिरिति विभागः । विवर्त्तदृष्टेरपि शुद्धितारतम्येन द्वैविध्यमाह—जीवेति । बहवो जीवाः तेषां चाज्ञानाश्रयत्वमिति काचिद् दृष्टिः परमपुंसि तमः परिकल्पना परमात्मन्येव तमः परिकल्पना न तु जीवेषु स एक एव जीव इति श्रुतिवचसां काचिद्-दृष्टिरित्यर्थः ॥ २४० ॥

एवं प्रतिपादनक्रमः किंमूल इत्याशङ्क्य श्रुत्यादिसामञ्जस्या-न्यथानुपपत्तिमूल इत्याह —

श्रुतिवचांसि मुनिस्मरणानि च
द्वयविशारदगीरपि सर्वशः ।
त्रयमपेक्ष्य विधात्रितयं विना
न हि घटामुपयान्ति कदाचन ॥ २४१ ॥

श्रुतिवचांसीति । उक्तार्थः श्लोकः ॥ २४१ ॥

एताश्च दृष्टयः परस्परहेतुहेतुमद्भावादेकमेव पुरुषं कालभेदेना-श्रयन्त इति पूर्वोक्तं स्मारयति —

पुरुषमेकमपेक्ष्य च भूमिका-
त्रितयमस्ति पुरोदितमेव तत् ।
तदनुसारवशादखिलश्रुति-
स्मृतिवचांसि वयं घटयामहे ॥ २४२ ॥

पुरुषमेकमिति । अत एव श्रुत्यादिसामञ्जस्यमपीत्याह—तदनुसार-वशादिति । एकपुरुषवर्त्तिदृष्टिक्रमानुरोधादखिलश्रुतिस्मृतिवचांसि सृष्टिमायावादश्रुतयः श्रुतिशब्दार्थः ॥ २४२ ॥

सूत्रप्रवृत्त्यनुरोधेनाप्ययं क्रमो विवक्षित इत्याह—

परिणतिं च विवर्तदशाद्वयं

स्थितमनुक्रमतः श्रुतिशासने ।

अनुशशास मुनिप्रवरः सुधीः

पुरुषबुद्धिमपेक्ष्य यथाक्रमम् ॥ २४३ ॥

परिणतिं चेति । विवर्त्तदशाद्वयं विवर्त्तदशाया एकानेक-जीवविषयबुद्धिलक्षणद्वयमनुक्रमतः स्थितं विवर्त्तदशायां द्वयमिति सम्बन्धः । श्रुतिशासने श्रुतिमूलशास्त्रे सूत्रसन्दर्भ इत्यर्थः । अनुशशास सूत्रितवानित्यर्थः । तस्मात्तत्पदार्थस्यैश्वर्याद्यावेदक-मानाभावात् फलश्रुतेश्च वर्त्तमानापदेशिन्या अनुपलब्धिबाधित-तयार्थवादत्वेन निष्प्रपञ्चश्रुत्यन्तरविरोधेन च तत्परत्वायोगात् । ऐश्वर्यादिसूचकसूत्रस्य चाभ्युपगमवादत्वात् सापेक्षत्वेनैश्वर्यस्य वास्तवत्वानुपपत्तेः । कार्यकारणभावस्य च दुर्निरूपत्वेन तद्घटितज-जगत्कारणत्वस्याप्यवास्तवत्वात् दृग्दृश्यसम्बन्धानिरूपणेन साक्षि-त्वस्याप्यवास्तवत्वात् निर्विशेषसत्यज्ञानानन्दात्मकं ब्रह्मैव तत्पद-लक्ष्यमिति सिद्धम् ॥ २४३ ॥

ननु सर्वस्यापि जगतो ब्रह्मकार्यत्वे तदन्तर्भूतवेदोपि ब्रह्मपरिण-तिस्तद्विवर्त्तो वा वक्तव्यः न च तदुपपद्यते अपौरुषेयत्वेन स्वतः प्रामाण्यं यत्प्रथमपादे स्थापितं तद्विरोधप्रसङ्गादिति चोदयति—

यदि परिणतिरेषा चिद्विवर्त्तोऽथवा स्या-
द्भवति ननु तदानीं वेदशास्त्रे विरोधः ।
न हि खलु कृतकत्वे पौरुषेयत्वहेतो-
र्भवितुमलमियं नो मानता स्वप्रयुक्ता ॥ २४४ ॥

यदीति । नन्वित्यादौ योजनीयम् । एषां वियदादीनां सर्वेषामपि प्रपञ्चानामित्यर्थः । वेदशास्त्रे वेद एव शास्त्रं हितशासनात् तस्मिन्विषये विरोधः । स्वतः प्रामाण्यव्युत्पादकप्रथमतन्त्रप्रथमलक्षणप्रथमपाद-विरोधः । तत्र हेतुः नहीति । यतः कृतकत्वे वेदशास्त्रस्येति शेषः । यतो वेदशास्त्रस्य कृतकत्वे स्वप्रयुक्ता मानता स्वतः प्रमाण्यं भवितु-मालं तत इत्यर्थः । तत्रापि हेतुः—पौरुषेयत्वहेतोरिति ॥ २४४ ॥

अस्तु नाम तद्विरोधः का नो हानिः न हि शास्त्रान्तरविरोधेन किञ्चिद्धीयत इति चेद्धीयत एव स्वतः प्रमाण्यानभ्युगमे परतः प्रामाण्यस्याप्रामाण्यस्य वाभ्युपेयत्वेन विवक्षितार्थासिद्धेरित्याह —

कणभुगभिमतिर्वा कल्पनीया तदानीं
सुरगुरुमतमेवोपास्यमाहोस्विदुच्चैः ।
इति निपतति चोद्यं ब्रह्मणो विश्वसृष्टि-
र्यदि भवति न चेद्वा नित्यमायाति विश्वम् ॥२४५॥

कणभुगिति । ब्रह्मणः सकाशात् विश्वसृष्टिः सर्वस्यापि जगत उत्पत्तिर्यदि भवति तदानीं पौरुषेयत्वेन स्वतः प्रामाण्यासंभवात् कणभुगभिमतिः आप्तोक्तत्वेन परतः प्रामाण्यं वा कल्पनीयं स्यात् । आहोस्विदुच्चैः स्पष्टं सुरगुरुमतं बृहस्पतिसम्मतं चार्वाकमतं

पौरुषेयत्वेनाङ्गुल्यादिवाक्यवद्वेदाप्रामाण्यं वोपास्यं तथाचाखण्डै-करसब्रह्मसिद्धिर्न स्यादिति चोद्यं निपतति प्राप्नोतीत्यर्थः । यद्येतद्दोषपरिजिहीर्षया वेदस्य नित्यत्वमाश्रीयते तदा अद्वैता-सिद्धिरित्याह—न चेदिति । ब्रह्मणः सकाशात् सर्वस्यापि जगतः सृष्टिर्नास्ति चेद् विश्वं नित्यमायाति विश्वैकदेशो वेदो नित्य आपतेत् । तथाचाद्वैतासिद्धिरित्यर्थः । यद्यप्ययं विचारः प्रथमाध्याये कर्त्तुं युक्तः तथापि वेदस्यापि ब्रह्मात्मैकज्ञानसाधनत्वेन साधन-विचारावसरे क्रियत इति न विरोध इति द्रष्टव्यम् ॥ २४५ ॥

किमेतन्मीमांसकस्य चोद्यमुत नैयायिकस्य आद्ये "यश्चोभयो समो दोषः परिहारोपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचा-रणे" इति न्यायमभिप्रेत्य चोद्यसाम्यमाह—

ननु सदृशमिदं वश्चोद्यमस्मासु कस्मा-
द्विनिहितमुभयेषां पूर्वमीमांसकानाम् ।
अवगतिकृतमेतद्वाचकत्वं पदाना-
मवगतिरियमिष्टा नश्वरी तत्क्षणेन ॥ २४६ ॥

ननु सदृशमिति । इदं चोद्यं वेदस्य कार्यत्वे स्वप्रयुक्तं प्रामाण्यं न स्यादित्येतच्चोद्यं वो युस्माकं पूर्वमीमांसकानामुभयेषां भाट्टानां प्राभाकराणां च सदृशमतः कस्माद्धेतोरस्मास्वेव विनिहितमित्यर्थः । साम्यमेवाह—अवगतीति । अवगम्यमानानां हि वर्णानां वाचकत्व-मन्यथातिप्रसङ्गात् अवगतिश्च क्षणविनाशिनीति तद्विशिष्टवाचका-कारस्यापि क्षणिकत्वमित्यर्थः ॥ २४६ ॥

इतोपि वेदस्य क्षणविनाशित्वमित्याह—

अवगतिगतमेवापेक्ष्य पूर्वापरत्व-
प्रतिनियममियं वो वेदता वेदराशेः।
क्षणिकमभवदित्थं वेदशास्त्रं समस्तं
कथमिव तदिदानीं वेदशास्त्रं प्रमाणम् ॥ २४७ ॥

अवगतेति । पूर्वापरत्वप्रतिनियमं नियतपूर्वापरत्वं वेदता न वर्णमात्रस्यातिप्रसङ्गात् । अर्थप्रत्यायकत्वमपि तथैव नियतक्रमविशिष्टानां हि वर्णानां वेदत्वमित्यर्थः । अन्यथा राजा जारेति पदद्वयं श्रुतवतोऽविशेषेणार्थप्रतीतिप्रसङ्गात् । क्रमश्च न वर्णानां स्वतः संभवति नित्यविभुत्वेष्टः तथा चोपलब्धिक्रमावच्छिन्नानामेव वेदत्वं वाचकत्वं चेति न वाचकस्य वाक्यलक्षणवेदस्य नित्यत्वमित्यर्थः । तदेवं भवत्पक्षे वेदस्य क्षणिकत्वमेव नास्मन्मत इव कार्यत्वमात्रमतः कथं स्वतः प्रामाण्यं स्यादिति चोद्यसाङ्ग्यमुपसंहरति–क्षणिकमिति ॥२४७॥

परिहारोपि मम इति दर्शयितुं तदीयप्रामाण्यसमर्थनप्रकारमाशङ्कते—

पुरुषमतिनिवेशो नास्ति वेदप्रमेये
विषय इति यदीष्टा मानता स्वप्रयुक्ता ।
सदृशमिदमिदानीं कारणं मानतायां
परमपुरुषसृष्टे वेदशास्त्रेऽप्यभीष्टम् ॥ २४८ ॥

पुरुषमतिनिवेश इति । अस्मदादिपुरुषबुद्धिप्रवेशः विषये अर्थे अर्थमुपलभ्य शब्दरचन एव हि मानान्तरसापेक्षत्वलक्षणाप्रामाण्यप्राप्तिः न तु कार्यत्वमात्रेण वेदार्थे च न पुरुषबुद्धिप्रवेश इति कृत्वा यदि स्वप्रयुक्तमानतेष्टा तर्हि वेदानामविद्याशबलब्रह्मविवर्त्तत्वेप्ययं परिहारः

समान इत्याह—सदृशमिति । इदमुपलभ्याविरचितत्वलक्षणं कारणं प्रयोजकमित्यर्थः । वेदशास्त्रे परमपुरुषसृष्टेऽभीष्टेऽपीत्यन्वयः । परमपुरुष इति स्वपक्षे विशेषो ध्वनितः ॥ २४८ ॥

नन्वीक्षणपूर्वकत्वश्रवणात् सृष्टेः कथं वेदस्य कार्यत्वे बुद्धिपूर्वकत्वाभाव इत्याशङ्क्य वियदादिसृष्टेस्तत्पूर्वकत्वेऽपि न वेदसृष्टेस्तथात्वं किन्त्वध्यापकादिवद् ब्रह्मणः सकाशादीक्षणं विनैव वेदो जायते अन्यथा निश्वसितश्रुतिविरोधादित्यभिप्रेत्याह—

> न हि खलु मतिपूर्वा ब्रह्मणः सृष्टिरिष्टा
> निगदितुरिव सृष्टिर्वेदविद्यासु नित्यम् ।
> भवति नु पुनरेषा तस्य निःश्वासकल्पा
> श्रुतिवचनमपीदं वस्तु वक्ति स्फुटं नः ॥ २४९ ॥

न हीति । मतिपूर्वा बुद्धिपूर्वा न खलु ब्रह्मणः सकाशाद्वेदविद्यासु सृष्टिः वेदविषयसृष्टिः मतिपूर्वेष्टा किन्त्वेषा सृष्टिः निगदितुरध्यापकादिवन्नित्यनिश्वासकल्पैव भवति । श्रुतिवचनमस्य महतो भूतस्य निश्वसितमेतदिति श्रुतिवाक्यमपीदं वस्तुनिश्वासकल्पैव वेदसृष्टिः न बुद्धिपूर्वेत्येतत्स्फुटं वक्ति । तथा च तद्विरोधः स्यात् वेदस्य बुद्धिपूर्वकमविरचितत्वात्पुरुषजन्यत्वेऽपि प्रामाण्यं स्यादिति भावः ॥ २४९ ॥

एवं पुरुषजन्यत्वमात्रेण सापेक्षत्वलक्षणाप्रामाण्यं प्रतिबन्द्या-परिहृतमिदानीं व्यभिचारादपि नैवं वक्तुं शक्यमित्याह—

> अपि च पुरुषकर्मोद्भूतिकानीन्द्रियाणि
> स्फुटमवगमयन्ति स्वं स्वमन्यानपेक्षम् ।

विषयमिति हि दृष्टं तद्वदिष्टं च तस्मा-
दिह किमपि न चोद्यं वाच्यमेतद्भवद्भिः ॥ २५० ॥

अपि चेति । पुरुषस्य जीवस्य कर्मणः सकाशादुद्भूतिर्येषां तानि तथोक्तानि स्वं स्वं विषयमन्यानपेक्षं स्फुटमवगमयन्ति दृष्टमिति सम्बन्धः । न केवलं दृष्टमपि तु संमतं चेत्याह—इष्टमिति । इन्द्रियाणि हि स्वकर्मारब्धान्येव स्वस्य भोगसाधनानीति कर्मद्वारा पुरुषजन्यान्येव भवन्ति तथाप्यन्यनिरपेक्षप्रमाणान्येव स्वस्वप्रमेयमवगमयन्तीति संमतं मीमांसकानां प्रत्यक्षादिप्रामाण्यस्यापि स्वत एवाङ्गीकारात् । अतस्तद्वदिह वेदेऽप्यस्त्विति कथमस्मान्प्रति युष्माभिर्वेदस्य पुरुषजन्यत्वे सापेक्षत्वलक्षणाप्रामाण्यं चोद्यत इत्यर्थः ॥२५०॥

ननु तदैक्षत बहु स्यामिति सामान्येनैव सृष्टेरीक्षणपूर्वकत्वश्रवणात् वेदसृष्टेरपीक्षणपूर्वकत्वं वक्तव्यम् तस्या अनायासमात्रपरत्वादतः कथं भवन्मते वेदस्यानपेक्षप्रामाण्यं स्यादित्याशङ्कते—

श्रुतिवचनमनेकं वक्ति तस्येक्षितृत्वं
मतिमदिति ततस्तन्नेष्यते कस्य हेतोः ।
इति यदि मनुषे तन्मैव मंस्थाः कुतश्चे-
त्सकलकरणहीनं ब्रह्म नः शास्ति शास्त्रम् ॥२५१॥

श्रुतिवचनमिति । तदैक्षत सोऽकामयतेत्यादिकं तस्य ब्रह्मणः मतिमद्बुद्धिमदेव कारणमिति शेषः । तद्ब्रह्मानेकं श्रुतिवचनं तस्येक्षितृत्वं वक्ति यतः ततस्तन्मतिमदेव कारणमिति कस्य हेतोर्नेष्यत इति यदि मनुष इति सम्बन्धः । अथवा—तद्वेदवचनं मतिमद्बुद्धिपूर्वकमित्येवमपि वेदस्य सृज्यमानत्वेन स्वविषयबुद्धिपूर्वकत्वेपि स्वप्रमेयबुद्धिपूर्वकत्वाभावात्तस्यैव च निरपेक्षताविरोधित्वान्न

किंचिदनिष्टमित्यभिप्रेत्याह—तन्मैवं मंस्था इति । न च बुद्धिपूर्वकत्वमात्रस्यैव सापेक्षताप्रयोजकत्वमितिशङ्क्यं वाक्यार्थज्ञानप्रामाण्याप्रामाण्याभ्यां तज्जन्यवाक्येपि तद्दर्शनेन तस्यैव तत्प्रयोजकत्वात् किं प्रमाणजन्यान्तःकरणवृत्तिलक्षणबुद्धिमत्त्वेन ब्रह्मणः वेदस्य तत्त्वं सिसाधयिषितं किं वाऽविद्यावृत्तिलक्षणतद्वत्त्वेन । नाद्यः । अचक्षुरित्यादिश्रुत्या ब्रह्मणः करणादिराहित्यप्रतिपत्तेरित्याकाङ्क्षापूर्वकमाह—तत्कुतश्चेदित्यादिना । ब्रह्ममतिमन्न भवतीत्येतच्छब्दार्थः । यतोऽचक्षुरित्यादिशास्त्रं ब्रह्म सकलकरणहीनं बोधयति तत इत्यर्थः ॥ २५१ ॥

द्वितीये न सापेक्षत्वापत्तिः अविद्यावृत्तेर्बुद्धित्वाभावादित्यभिप्रेत्याह—

चितिगतजडशक्तेराद्य इष्टो विवर्त्त-
श्चितिनिकटनिवेशाल्लब्धदीप्तिर्जडोऽपि ।
श्रुतिशिरसि निषण्णैरीक्षणं कथ्यते त-
न्न तु परमपदस्यापीक्षणं बुद्धिवृत्तिः ॥ २५२ ॥

चितीति । चैतन्याश्रितजडाविद्याशक्तेर्विवर्त्तः तदैक्षतेत्यादिश्रुतिसिद्धाविद्यावृत्तिलक्षणः । ननु बुद्धित्वाभावे तस्या ईक्षणत्वव्यपदेशो वा कुत इत्याशङ्क्य तद्गताभासगुणयोगादित्याह—चितीति । चितिनिकटनिवेशाच्चैतन्यतादात्म्याध्यासादित्यर्थः । लब्धदीप्तिरिति बहुव्रीहिः । प्रकाशमान इत्यर्थः । श्रुतिशिरसि निषण्णैः श्रुतिशिरोनिष्ठैस्तदैक्षतेत्यादिवाक्यैः सृष्टिकाले हि परमेश्वराध्यस्तानाद्यनिर्वचनीयाविद्यायाः सृज्यमानप्राणिकर्मसंक्षुब्धायाः सृज्यमानपदार्थाकारेण काचिद्वृत्तिरुदेति । सा च स्वतो जडाप्यधिष्ठानचैतन्याभाससम्बन्धात्प्रकाशमाना भवतीति तदैक्षतेत्यादिश्रुत्या तस्या ईक्षणत्व-

व्यपदेशः न तु मुख्यमीक्षणत्वं बुद्धिवृत्तेरेवेक्षणत्वात्तदभावस्य चोक्तत्वात्तस्मान्न बुद्धिपूर्वकत्वं वेदस्य । नन्वीश्वरस्य ज्ञानस्वरूपसत्त्वात् तस्य च सर्वविषयत्वेन वेदार्थस्यापि विषयीकरणात् तज्जन्यो वेदः पौरुषेयः स्यादिति चेन्न—ज्ञानस्वरूपस्यापि तस्य नामरूपप्रपञ्चाकारेण विवर्त्तमानाविद्याधिष्ठानतया स्वरूपेण कारणत्वेपि वाक्यार्थज्ञानत्वाकारेणाकारणत्वात् बुद्धित्वाभावाच्च तत्पूर्वकत्वस्यैव लोके पौरुषेयत्वप्रयोजकत्वात् सर्वविषयस्यापि तस्य स्वनिष्ठसर्वविषयतत्त्वनिश्चयत्वेन विषयादेरप्रमाणत्वनिश्चयस्य प्रमाणशब्दकारणत्वानुपपत्तेश्च । किंच स्वातन्त्र्येणेश्वरस्य तत्कर्तृत्वाभावादपि न तस्य पौरुषेयत्वम् । ईश्वरो हि सर्गान्तरीयवेदं कारणात्मना स्थितं तथैव सृजति नत्वन्यथा धाता यथा पूर्वमकल्पयदिति श्रुतेः स्वराद्यन्यथात्वेनार्थान्यथाभावप्रसङ्गेनेदानीं तनवेदस्यापुरुषार्थत्वप्रसङ्गाच्च । एकविधस्यैव कर्मादेः पुरुषार्थत्वेनानेकविधस्य तस्य तत्कल्पनायोगाच्च । नचेश्वरस्य स्वेच्छया वेदस्रष्टृत्वाभावे स्वातन्त्र्यभङ्गः स्वतन्त्रस्यापि प्रयोजनानुरोधेन नियतक्रमस्रष्टृत्वोपपत्तेरिति । तस्मान्न जन्यत्वमात्रेण सापेक्षत्वलक्षणं प्रामाण्यं मीमांसकेन वक्तुं युक्तमिति भावः ॥ २५२ ॥

ननु वेदस्य कार्यत्वे तदर्थसम्बन्धस्यागन्तुकत्वप्रसङ्गेन तदर्थसम्बन्धः सांकेतिकः शब्दार्थसम्बन्धत्वात् डित्थादिशब्दार्थसंबन्धवदिति सांकेतिकत्वानुमानात् संकेतस्य च वक्तृपुरुषबुद्ध्युपाध्यधीनत्वात्तद्विशिष्टपदसंहतिरूपवेदोपि पौरुषेय एव सांकेतिकार्थसम्बन्धिशब्दस्यैव पौरुषेयत्वात् ततश्च वक्तृज्ञानप्रामाण्याधीनप्रामाण्यो वेद इति तस्य परतः प्रामाण्यमेवेति नैयायिक आशङ्कते—

ननु च डित्थडवित्थपदादिव-
त्सकलमेव तु सामयिकं पदम् ।

अनुमिमीमहि पूर्वनिदर्शना-
दनुमितिर्भवतीति किमद्भुतम् ॥ २५३ ॥

ननु चेति । सकलं लौकिकं वैदिकं च सामयिकम्, अस्य शब्दस्येदं-वाच्यमितिपुरुषसंकेतविशिष्टमनुमिमीमह्यनुमानं कुर्याम् । ननु डित्था-दिपदे सामयिकत्वदर्शनेनान्यत्र कथं तदनुमानं भवेदित्याशङ्क्य साध्यसाधनवत्त्वेन पूर्वानुभूतमहानसादिदृष्टान्तबलाद्धूमादिमति पर्वतादौ वह्न्याद्यनुमितिदर्शनान्नात्र किंचिच्चित्रमित्याह पूर्वेति ॥ २५३ ॥

न हि दृष्टान्तमात्रात्साध्यसिद्धिः अपि त्वबाधितत्वमपेक्ष्य तच्चात्रासिद्धमित्यभिप्रेत्य परिहरति—

अनादिवृद्धव्यवहारलक्षणे
कथं प्रमाणे परिपन्थिनि स्थिते ।
गवादिशब्दे समयोऽनुमास्यते
डवित्थशब्दादिवदेतदुच्यताम् ॥ २५४ ॥

अनादीति । अथवा अनुमिमीमहीत्यन्तः पूर्वपक्षः पूर्वनिदर्शनादि-त्यादिना सोपहासं परिहारमाह पूर्वानुभूतदृष्टान्तात् किमिति काक्वो-पहासः सूचितः । दृष्टान्तबलादनुमितिर्भवतीति किमद्भुतं वह्न्यनौ-ष्ण्यानुमानस्यापि दर्शनादिति भावः । यदि दृष्टान्तबलेन सांकेतिक-त्वानुमानं तदा वह्न्यनौष्ण्यानुमानमपि स्यादिति तात्पर्यम् । ननु दृष्टान्तबलेन न वह्न्यनौष्ण्यानुमानं भवितुमर्हति अबाधितविषय-त्वस्यानुमितिप्रयोजकस्याभावादिति चेत्तुल्यमत्रापीत्याह अनादीति । प्रवाहरूपेणानादिर्यो वृद्धव्यवहारः मध्यमवृद्धव्यवहारः स एव लक्षणं गमकं यस्यान्वयव्यतिरेकाख्यप्रमाणस्य तत्तथोक्तं तस्मिन् प्रमाणे

परिपन्थिनि बाधके स्थिते सति गवादिशब्दे डित्थडवित्थशब्दादि-वत् समयः कथमनुमास्यते । एतदनुमास्यते इत्येतत् उच्यतां न कथमपि संभवतीत्यर्थः । एतदुक्तं भवति । मध्यमवृद्धव्यवहारो हि व्युत्पित्सोः प्रवर्त्तकज्ञाने प्रमाणं तस्य तेनैवानुमेयत्वात् । अनुमिते च मध्यमनरसमवायिनि प्रवर्त्तकज्ञाने शब्दान्वयव्यतिरेकाभ्यां शब्दस्य तत्कारणत्वं गृह्यत इति सर्वसंमतं तत्रायं व्युत्पित्सुः गवादिशब्दान्वयव्यतिरेकाभ्यां गवादिशब्दो गवाद्यर्थे संकेतित इति गृह्णाति उतास्यास्मिन्नर्थे सामर्थ्यमिति विषयेऽन्तमेव युक्तं पश्यामः न त्वाद्यमन्वयव्यतिरेकयोः कार्यकारणभावमात्रग्राहकयोः संकेतग्रहणे सामर्थ्याभावात्प्रथमव्युत्पत्तौ डित्थादिशब्दगतसंकेतानु-पस्थितेश्च कार्यकारणभावग्रहणे तु तयोः सामर्थ्यं बालस्य स्वात्मनि स्तन्यपानादिव्यवहारेऽवगतं कारणत्वमेव च सामर्थ्यं ततश्चोपस्थित-त्वादस्यास्मिन्नर्थे सामर्थ्यमित्येव ताभ्यां गृह्णातीति युक्तं न त्वयमस्मिन् संकेतित इति । न च संकेत एव सामर्थ्यमिति शङ्क्यम् । दण्डादौ तदभावप्रसङ्गात् । किं च शब्दार्थसम्बन्धस्य सामयिक-त्वपक्षे सर्वशब्दानां सर्वत्र संकेतसंभवेन सर्वेषामपि सर्वार्थत्व प्रसङ्गः । ननु नास्मदादिसंकेतेन शब्दार्थव्यवस्था किन्त्वीश्वरसंकेतेन स च नियतविषय एवेति चेत् किमीश्वरोपि तत्तदर्थज्ञानजननयोग्यं शब्दं तत्तदर्थे संकेतयति । उतायोग्यम् । आद्ये योग्यतायाः सामर्थ्यरूप-त्वात्तस्य च त्वयाप्युपजीव्यत्वात् । तदेव सम्बन्धोऽस्तु किमतिरिक्त-संकेतेन । द्वितीये कथमीश्वरो नासौ न भवेत् ? वस्तुसामर्थ्यं विना तदिच्छामात्रेणायोग्यात्कार्यानुपपत्तेश्च । ननु प्रलये सर्वव्यवहारो-च्छेदात्सर्गादौ कथं व्यवहारात्सामर्थ्यसिद्धिः अन्योऽन्याश्रयादिति चेन्न । तत्रापि ज्ञानकर्मातिशयवतां हिरण्यगर्भादीनां सुप्तप्रबुद्धवत्पूर्वक-ल्पावगतसामर्थ्यानुसंधानेन प्रवृत्त्युपपत्तेस्तद्व्यवहारेणार्वाचीनानामपि व्युत्पत्त्युपपत्तेः । तथा च श्रुतिस्मृतिपुराणादीनि "ततः कृतयुगस्यादौ

ब्रह्मभूतो महायशाः । सर्वज्ञो धृतिमानृषिः पुनराजायते स्मरन् ॥ ज्ञानम प्रतिमं यस्य "इत्यादीनि । तस्माद्वन्ह्यनौष्ण्यानुमानमिव तदुष्णत्वग्राहिप्रत्यक्षेण संकेतव्यतिरिक्तसामर्थ्यग्राहिणा अनादिवृद्धव्यवहारलक्षणान्वयव्यतिरेकप्रमाणेन बाधितविषयं सांकेतिकत्वानुमान नोदेतुमर्हतीति ॥ २५४ ॥

ननु सर्वकर्तृत्वेनेश्वरसिद्धेः शब्दार्थसम्बन्धस्यापि तत्कृतत्वमेव हिरण्यगर्भादीनां च तत्कृतसंकेतानुरोधेन व्यवहारप्रवर्तकत्वमात्रमित्याशङ्क्य तादृशेश्वरे प्रमाणाभावान्मैवमित्याह—

सतः प्रमाणाभिमतेषु पञ्चसु
प्रमाणमक्षादिषु किंचिदीक्ष्यते ।
नहीह सम्बन्धरि तेन तस्य वः
खपुष्पकल्पत्वमभावमानतः ॥ २५५ ॥

सत इति । सतो भावस्य प्रमाणाभिमतेषु भावविषयत्वेनाभिमतप्रमाणेष्वित्यर्थः । अक्षादिषु प्रत्यक्षानुमानोपमानागमार्थापत्तिषु मध्ये किञ्चिदपि प्रमाणमिह भवदभिमते संबन्धरि संकेतयितरि तटस्थेश्वरे नेष्यत इति संबन्धः । सम्बन्धरीश्वरे प्रत्यक्षादिकमागमो वा किमपि न प्रमाणं वक्ष्यमाणदूषणग्रासादित्यर्थः । यद्यपि प्रत्यक्षादेरीश्वरे न शङ्का कस्यापि तथा तटस्थेश्वरे आगमस्यापि तत्साम्यं दर्शयितुं तदुपन्यस्य दूषितमिति द्रष्टव्यम् । माभूत्तर्हि प्रमाणाभावात्तत्सद्भावनिश्चयः संदेहस्तु भविष्यति तावतापि न त्वत्पक्षसिद्धिरित्याशङ्क्य सद्भावावेदकनिखिलप्रमाणविरहनिश्चयात्तदभाव एव निश्चीयत इत्याह—तेनेति । येन सम्बन्धरि किमपि प्रमाणं नास्ति तेनेत्यर्थः । तस्य सम्बन्धुरीश्वरस्य खपुष्पतुल्यत्वमसत्त्वमेव सिद्ध्यतीति शेषः । अभावमानतः अनुपलब्धेरित्यर्थः ॥ २५५ ॥

ननु यस्य कस्यचित्प्रमाणपञ्चकानुपपत्तिमात्रेण तादृशेश्वराभावो निश्चेतुं न शक्यते विद्यमानस्यापि घटस्य दोषादिना यस्य कस्यचिदननुभवदर्शनात् सर्वेषां तदनुदयश्चास्माभिरशक्यग्रहः अतः कथमीश्वराभावो निश्चीयत इति चेन्न—यद्धि वस्तु केनचित्कदाचित् प्रत्यक्षाद्यन्यतमेन प्रतिपन्नं तस्मिन् वस्तुनि निखिलप्रमाणानुदयेपि तत्सद्भावावेदकप्रमाणानुरोधेनानुपलब्धेस्तु वस्त्वभावव्यतिरेकेणान्यदेव करणदोषादि कारणं कल्पनीयं यत्तु पुनः कदाचिदपि केनचिदप्रतिपन्नं तस्य पुनरेकस्यापि निखिलप्रमाणानुदयमात्रेण दर्शनेन तदसत्त्वमेव निश्चीयते न त्वनुपलब्धौ कारणान्तरं कल्प्यते। भवदभिमतेश्वरश्च न केनचिदपि प्रमाणेन सेद्धुमर्हति। तदभावस्य वक्ष्यमाणत्वात्। तस्मादनुपलब्ध्याऽसत्त्वमेव निश्चीयत इत्यभिप्रेत्याह —

पुरोपलब्धो विषयो न दृश्यते
यदा प्रमाणैरिह भावगोचरैः।
तदा तु तत्रानुपलब्धिकारणं
किमप्यभावादपरं हि मृग्यते ॥ २५६ ॥

अत्यन्तानुपलब्धवस्तुनि पुनर्यः पञ्चकानुद्भवस्तस्याभावनिमित्तकः स न पुनस्तत्रापरं कारणम्।
अन्विच्छन्ति मनीषिणो न हि शशेऽदृष्ट्वा विषाणाऽस्तितां तत्रादर्शनकारणान्तरपरा हेत्वन्तरान्वेषिणः ॥ २५७ ॥

पुरोपलब्ध इत्यादिना—श्लोकद्वयेन। पुरा कदाचिदुपलब्धो येन केनचिज्ज्ञातः विषयः पटादिपदार्थः इह लोके तत्र तस्मिन् विषये किमपि करणदोषादिकमभावादपरं पटाद्यभावादन्यत् मृग्यते चिन्त्यते ॥२५६॥

अत्यन्तेति । अत्यन्तानुपलब्धवस्तुनि कदाचिदपि केन चिदननुभूते वस्तुनि विषये, पुनः शब्दो विशेषद्योतकः । विशेष एव तस्ये-त्यादिना स्पष्टीक्रियते । यः पञ्चकानुद्भवः प्रमाणपञ्चकानुदयः स तस्य वस्तुनो भावनिमित्तक एव न तु तत्र तादृश-वस्तुविषयप्रमाणपञ्चकानुदयेऽपरे वस्त्वभावातिरिक्तं कारणं मनीषिण इच्छन्ति । वस्त्वभावादेव तद्विषयप्रमाणपञ्चकानुदयः । न तु तस्मिन् सत्यपि दोषादिकारणान्तरादित्यर्थः । तत्र दृष्टान्तः—न हीति । न हि लोके केचित् शशे विषाणास्ति तामदृष्ट्वा तत्र शशवि-षाणे विषयेऽभावव्यतिरेकेणादर्शनकारणान्तरपराः सन्तः हेत्वन्तरान्वे-षिणो दृश्यन्त इत्यर्थः । तथा च नैयायिकाभिमतेश्वरो न सिद्ध्य-तीत्यर्थः ॥ २५६ ॥

किं च भवदभिमतेश्वरः शब्दार्थसंकेतं कथं कुर्यात् किं शरीरं विना स्वकीयनित्यज्ञानेनार्थं ज्ञात्वा तत्र शब्दं संकेतयति इदमस्य वाच्यमिति किं वा शरीरसम्बन्धेनेन्द्रियादिनार्थं ज्ञात्वा । नाद्यः-असं-भवात् । न हि शरीरं विना मयैवं संकेतितमिति तत्कथनमिदमस्य वाच्यमिति कादाचित्कसंकेतकरणं वा संभवति । न द्वितीयः । तस्य शरीरसम्बन्धापादकादृष्टाभावात् । ननु प्राणिकर्मवशात् शरीरमादाय संकेतव्यवहारं प्रवर्त्तयतीति चेन्न—स्वादृष्टाकृष्टशरीरस्यैव स्वव्यवहार-कारणत्वदर्शनात् । किंचैकशरीरसम्बन्धेन तदिन्द्रियेणार्थं ज्ञात्वा तत्र शब्दं संकेतयति—उतानेकतत्सम्बन्धेन । नाद्यः । सर्वशब्दानां सर्वत्र संकेतकरणानुपपत्तेः । न हि तत्तत्पदार्थज्ञानं विना तत्र तत्र शब्दानां संकेतः सुकरः । न च दूरविप्रकृष्टनानादेशस्थपदार्थानामिन्द्रियेण ज्ञानं संभवति सम्बन्धाभावात् । द्वीपान्तरमहारण्यादिगतपदार्थ-ज्ञानाय तत्र शरीरिण एकस्य गमनासंभवाच्चेत्यभिप्रेत्याह—

विषमदुर्गमदेशसहस्रगः
कथमिवैष नरः समयक्रियाम् ।

सकलशब्दतदर्थनिवेशिनीं-
वद विधातुमलं स्वयमेकलः ॥ २५८ ॥

विषमेति । विषमत्वमुन्नतावनतत्वमत एव दुर्गमो गन्तुमशक्यो यो देशः तत्सहस्रं गच्छतीति तथोक्तः शरीरित्वान्नर इत्युक्तं समयक्रियां संकेतकरणम् कथमिव विधातुमलं वद न कथमपीत्यर्थः । तत्र हेतुः— स्वयमेकलइति । एकशरीर इत्यर्थः ॥ २५८ ॥

नन्वेकेनापि शरीरेणेश्वरस्यालौकिकपुरुषत्वात् झटिति विषमानेकभूदेशगमनं संभवति अनेकेनापि तेन तत्संभवति नित्यज्ञानेन वैकत्र स्थितस्यैव सर्वपदार्थानुपलभ्य भूतावेशन्यायेन शरीरमेकं प्रविश्य स्वसंकेतेष्वाज्ञापकत्वं संभवति अतः कथं तदभाव इत्याशङ्क्य एवमपि संकेतितेश्वर आद्यशब्दसंकेतज्ञापनकाले केनचित्पदेनार्थमभिलप्य प्रतिपत्रे शब्दविशेषस्य तत्र संकेतग्रहं बोधयति, उताङ्गुल्यादिना निर्दिश्य, नाद्यः प्रथमसंकेतकरणात् पूर्वं प्रतिपत्तुः शब्दविशेषस्य तत्रार्थे संकेतग्रहणाभावेन तथा संकेतग्रहणानुपपत्तेरित्याह —

अपि च किंचिदपि प्रतिपादकं
न हि यदा पदमस्ति जगन्मुखे ।
अनभिधाय पदेन तदा कथं
समयमेष करिष्यति शंकरः ॥ २५९ ॥

अपि चेति । न प्रतिपादकं सङ्गतिग्रहणाभावात् पूर्वमिति शेषः । यदेत्यस्य विवरणं—जगन्मुख इति । सर्गाद्यकाले प्राथमिकव्युत्पत्तिसमय इत्यर्थः । इदं च गृहीतसम्बन्धपदाभावे हेतुः । न च पदेनार्था-

भिलापो नास्त्विति शङ्क्य वक्तुमित्याह—अभिधायेति । अर्थमिति शेषः। गवादिपदं सास्नादिमदादिपिण्डवाचकमित्येवंरूपेण प्रतिपत्तुः सास्नादिमदादिपिण्डवाचकत्वेन प्रसिद्धसास्नादिमदादिपिण्डशब्देन तमनूद्य तत्र गवादिपदस्य संकेतः कर्त्तव्यः न हि तत्पदान्तरस्यानभिलापे संभवति, न च तदभिलापः—प्राथमिकव्युत्पत्तिकाले संभवतीत्यर्थः ॥ २५९ ॥

द्वितीयमनूद्य दूषयति—

अभिनयेन करिष्यति चेदयं-
समयमेतदतीव हि दुर्घटम् ।
न हि पदार्थसहस्रविमिश्रिते
गवि तदाभिनयात्समयो भवेत् ॥ २६० ॥

अभिनयेनेति । अङ्गुल्यादिनिर्देशेनायमीश्वरः एतदङ्गुल्याद्यभिनयेन समयाभिधानं दुर्घटम् । दुर्घटत्वमेवाह—नहीति । पदार्थसहस्रविमिश्रिते गुणकर्मसामान्याद्यनेकपदार्थयुक्ते गवि गोपिण्डे तथाभिनयात् गोसंकेतानुकूलत्वेनाभिनयात् यदीश्वरोऽङ्गुल्या पुरोवर्तिनीं गान्निर्दिश्य प्रतिपत्रे तत्र शब्दस्य संकेतं कुर्यात् । तदा गोपिण्डेऽनेकपदार्थसंभवात् नार्थविशेषस्य गोशब्दवाच्यत्व प्रतिपत्तुः सिद्ध्येदित्यर्थः । यदि पुनः प्रतिपत्तुः कल्पान्तरीयसंकेतस्मरणमाश्रित्य संकेतं कुर्यात् । तदेश्वरसंकेतो व्यर्थ एवेति द्रष्टव्यम् ॥ २६० ॥

किंचाङ्गुल्यादिना निर्दिष्टेऽर्थे शब्दसंकेत इति पक्षे प्रतिपत्तुरसन्निहितातीन्द्रियेन्द्रादेरङ्गुल्यादिना निर्देशायोगात् नेन्द्रादिशब्दानां संकेतः संभवतीत्याह—

अपि च लौकिकमानबलाश्रया-
दधिगते विषये समयो भवेत् ।
अनुपलब्धसतत्त्वकदेवता-
प्रभृतिकार्थगतः समयः कुतः ॥ २६१ ॥

अपि चेति । लौकिकमानबलाश्रयात् लौकिकमानं प्रत्यक्षं तदेव बलं तदाश्रयात् तस्मादेव निमित्तादित्यर्थः । समयः शब्दसंकेतो भवेदङ्गुलीनिर्देशेनेति शेषः । अनुपलब्धसतत्त्वकदेवताप्रभृतिकार्थगतः प्रत्यक्षानुपलब्धस्वरूपेन्द्रादिदेवताधर्माधर्मपदार्थविषयः समयः इन्द्रधर्मादिपदसंकेतः कुतो भवेत् न कुतोपीत्यर्थः । ननु न पदान्तरेणाभिधाय संकेतं करोति नाप्यङ्गुल्यादिना निर्दिश्य किन्त्वयमीश्वरः प्राणिकर्मबलात् शरीरद्वयमुपादाय प्रयोज्यप्रयोजकभावेन लौकिकवृद्धवद्धिरण्यगर्भादिकं व्युत्पादयिष्यति सोऽपि स्वकीयं व्युत्पादयिष्यतीति चेन्न—पुनराजायते स्मरन्निति हिरण्यगर्भस्य भगवत्प्रसादमात्रेण कल्पान्तरीयशब्दतदर्थसंबन्धादिप्रतिपादकश्रुतिविरोधात् । किं चानुमानिकेश्वरस्य यदि सर्वज्ञत्वं सिद्ध्येत् तदैतदुपपद्येतापि तदेव न सिद्ध्यति तत्र प्रमाणाभावात् । अनुमानेन शरीरेन्द्रियानित्यज्ञानादिमतः सिद्धे शरीरसर्वज्ञानासिद्धेः । एतच्चानुपदमेव प्रपञ्चयिष्यते । एतदभिप्रेत्यैवोक्तम् नर इति तस्मान्न पुरुषाधीनः शब्दार्थसम्बन्ध इति ॥ २६१ ॥

अस्मर्यमाणकर्तृत्वाच्च न शब्दार्थसम्बन्धस्येश्वरकर्तृकत्वसिद्धिरित्याह —

अपि च कर्त्तुरनुस्मरणं भवे-
द्यदि चकार पुमान्समयं गिराम् ।

न खलु कर्तृगबुद्धिबलं विना
व्यवहृतिर्भवति व्यवहर्त्तरि ॥ २६२ ॥

अपि च कर्तुरिति । सम्बन्धस्येति शेषः । अत्र च प्रकरणे पुमान्नर इति च तद्व्यवहारः पराभिमतसंकेतयिता नैवमीश इति ज्ञापनाय यदीश्वरशब्दार्थः संकेतं कुर्यात्तदेश्वरकृतोयं संकेत इतिविशेषण- त्वेन स स्मर्येत । अन्यथा तत्कृतत्वबुद्ध्यनुपपत्तेरित्याह— न खल्विति । कर्तृगबुद्धिबलं कर्तृविषयज्ञानमेव बलं व्यवहृतिः तत्कृतत्वबुद्ध्यादिव्यवहारः व्यवहर्त्तरि शब्दार्थसम्बन्धे इश्वरेण कृत इति व्यवहर्त्तरि कर्तृस्मरणं विना तत्कृतत्वबुद्ध्यभावे दृष्टान्तमाह— न खल्विति । पाणिनिना पिङ्गलेन वा व्याकरणकर्त्रा कृता या संज्ञानदी- वृद्ध्यादिरूपा तयेत्यर्थः । तयोः पाणिनिपिङ्गलयोः न हि पाणिन्यादेः स्मरणं विना आकारादिषु तत्कृतत्वेन वृद्ध्यादिसंज्ञां व्यवहरन्ती- त्यर्थः । पाणिनीयं पैङ्गल्यमिति संज्ञयेति वा । न च कर्तुरस्मरणेपि देवदत्तादिसंज्ञायाः संकेतितत्वपरिज्ञानवदत्रापि किं न स्यादिति वाच्यम् । तत्रापि केनचित् संकेतितेयं सञ्ज्ञेति सामान्येन कर्तृस्मर- णात् । न च प्रकृतेपि केनचित् संकेतित इति सामान्येन कर्तृस्मरण- मिति वक्तुं शक्यम् । देवदत्तादिसंज्ञाश्रवण इव घटादिशब्दश्रवणकाले लौकिकानां तत्सम्बन्धस्य सकर्तृकत्वज्ञानाभावात् वेदतदर्थसम्बन्ध- कर्तुर्विशेषतः परिज्ञानं विना तत्कृतवेदबोधिते पारलौकिके कर्मणि वृद्धानां नियमेन प्रवृत्त्यनुपपत्तेश्च न चेश्वरस्य विशेषतः परिज्ञानं सम्भवति प्रमाणाभावादित्यर्थः ॥ २६२ ॥

ननु किमिति प्रमाणाभाव इति चेद् न तावत्प्रत्यक्षं प्रमाणं रूपादि- हीनतया परात्मत्वेन च बाह्याभ्यन्तरप्रत्यक्षागोचरत्वात् । ननु क्षित्यादिकार्यलिङ्गानुमानं पराभिमतेश्वरे प्रमाणमिति चेत्—अत्रा-

स्मत्स्वामिचरणाः । लाघवतर्कसहायात् कार्यात् लिङ्गात्परात्मनो बोधं वाञ्छति यः स हि नूनं पश्येदर्कैर्गुडैरपि निधानं यदुक्तं लाघवसहकृतात् कार्यलिङ्गादेव परमेश्वरः सिद्ध्यतीति तदतितुच्छमेव महान्तो मन्यते। अस्मदादिकर्तृपूर्वकत्वेनैवानुमानस्य सिद्धसाधनत्वात्। नन्वस्मदादेरुपादानविषयापरोक्षज्ञानादिमत्त्वं न सिद्ध्यति परमाणोरतीन्द्रियत्वात् कर्तृत्वञ्च तादृक्ज्ञानादिमत्त्वमेवेति चेन्न। कार्यानुकूलापरोक्षज्ञानादिमत्वं हि कर्तृत्वं तच्चादृष्टद्वारास्माकमपि विद्यते। अदृष्टद्वारा क्षितिजनकहविरादिसमवेतयागोपादानपशुपुरोडाशादिविषयापरोक्षज्ञानस्यास्मासु सत्त्वात्। ननु कार्यानुकूलापरोक्षज्ञानादिमात्रं न कर्तृत्वे प्रयोजकं किन्त्वदृष्टाद्वारकतादृशज्ञानादिमत्त्वं तच्च नास्मदादेरिति चेन्न लाघवेन कार्यानुकूलापरोक्षज्ञानादिमत्त्वस्यैव तत्र प्रयोजकत्वात्। एतेनोपादानविषयापरोक्षज्ञानादिमत्त्व कर्तृत्वमिति निरस्तम्-कार्यानुकूलत्वस्यावश्यं ज्ञानविशेषणतया वक्तव्यत्वेन तावन्मात्रेणोपपत्तेः। अन्यथा—सामान्यप्रत्यासत्त्या परमाणुज्ञानवतः कर्तृत्वप्रसङ्गात्। नन्वेवं सति कुविन्दादिभोजकादृष्टजन्ये घटे तस्यापि कर्तृत्वं स्यादिति चेत्। कस्तत्र सन्देहः समानन्यायत्वात्। किमिति तर्हि न तथा व्यवहारः भोग्यस्य भोक्त्रदृष्टजन्यत्वज्ञानिनां वृद्धानां तदनुकूलकृतिमत्त्वव्यवहारो विद्यत एव सएव च कर्तृत्वव्यवहार इति न व्यवहाराभावः। प्राकृतव्यवहाराभावस्तु न तत्कर्तृत्वं बाधते। अभावाभावात्मकेषु भावेऽप्यभावव्यवहाराभाववदुपपत्तेः। लौकिकानां कर्तृत्वव्यवहारस्यादृष्टाद्वारककार्यानुकूलकृतिमद्विषयत्वेन भिन्नविषयत्वाच्च। अवश्यं चैवमेव त्वयाभ्युपेयमीश्वरकृतेरप्यदृष्टद्वारकत्वात्। तथा हि—तद्द्वारकत्वं हि तज्जनकत्वे सति तज्जन्यजनकत्वमीश्वरकृत्यादिकं च क्षितिजननानुकूलास्मदाद्यदृष्टजनकं क्षितिजनकं चेति भवत्यदृष्टद्वारकम्। ननु द्वारिसमानाश्रयस्यैव द्वारत्वमिति चेन्न-अपूर्वस्य यागद्वारत्वाभावप्रसङ्गात्। ननु यज्ञ-

ननान्तरं यत्र तिष्ठति तदेव तस्य द्वारमीश्वरज्ञानादिकं तु नित्यमेवेति तददृष्टद्वारकं न भवतीति चेन्न—संप्रयोगानन्तरवर्तिनो मनआदेः संप्रयोगाद्द्वारकत्वप्रसङ्गात् । ननु यद्यज्जनयित्वैव यज्जनयितुमीष्टे तदेव तत्र तस्य द्वारमीश्वरज्ञानादिकं तु नैवं तस्यानाद्यनन्तस्य कार्यकालादिसम्बन्धित्वेनादृष्टानपेक्षणादिति चेन्न—क्लृप्तसहकारिणं विना भगवज्ज्ञानादेरपि कार्यानुत्पत्त्याऽदृष्टस्याप्यपेक्षितत्वात् । ननु यस्य प्रागभावस्यादृष्टप्रागभावो व्यापकः तत्प्रतियोगित्वमदृष्टद्वारकत्वं तादृशप्रागभावाप्रतियोगित्वमदृष्टाद्वारकत्वमेव तच्चेश्वरप्रयत्नादावपि तस्य नित्यत्वादिति चेन्न—चिकीर्षादिजनकज्ञानस्य नित्यत्वस्य निरसिष्यमाणत्वात् । किं च कर्तृत्वप्रयोजककृतेरदृष्टाद्वारकत्वेन विशेषणे व्रीहिप्रोक्षणावहननहविरासादनावदानादिद्वाराग्नेयादिविषयकृतेरेवादृष्टहेतोस्तत्कर्तृत्वप्रयोजकत्वमित्युक्तन्न एव यागाद्यनुष्ठातुः प्रोक्षणादिकाले यागकर्तृत्वव्यहारः स्यात् । न च प्रोक्षणादिकृतेराग्नेयादिविषयत्वमेव न प्रोक्षणादिना व्यवधानादिति वाच्यम् । कुलालादिकृतेरपि चेष्टादिव्यवधानेन तस्य घटकर्तृत्वाभावप्रसङ्गात् । ननु कृतेर्यस्मिन्कार्ये स्वजन्यमदृष्टमपेक्ष्यते तत्रैव साऽदृष्टद्वारिका । न च प्रोक्षणादिकृतिराग्नेयादिविषयत्वमेव न प्रोक्षणादिना व्यवधानादिति वाच्यम् । कुलालादिकृतेरपि चेष्टादिव्यवधाने तस्य घटकर्तृत्वाभावप्रसङ्गात् । ननु कृतेर्यस्मिन् कार्ये स्वजन्यमदृष्टमपेक्ष्यते तत्रैव सा स्वरूपोत्पत्तावदृष्टमपेक्षते दृष्टेनैव तदुपपत्तेरिति चेन्न—प्रोक्षणादेराग्नेयादिस्वरूपोपकारकतया तज्जन्यापूर्वस्यापि तत्रैव विनियोगात् । आगमिके च विनियोगे व्यतिरेकस्यानपेक्षितत्वात् तस्मात्कार्यानुकूलकृतिमत्त्वमेव कर्तृत्वव्यवहारमविचारितमूलं साधकं बाधकं वा पश्यामः । नचैवं कार्यानुकूलत्वमेव कर्तृत्वमिति दण्डादेरपि तथात्वं किं न स्यादिति वाच्यम् । कारकान्तरासंकीर्णकर्तृत्वस्यैवात्रानुमितिविषयतया निरूप्यमानत्वात् । तस्मादृष्टाद्वार-

त्वविशिष्टकृतिशालित्वलक्षणकर्तृत्वसाधनस्याप्रयोजकत्वात्। बाधित-विषयत्वात् सकर्तृकत्वमात्रसाधने सिद्धसाधनत्वाच्चैतदनुमानं महत्यामापदि पतितमिति मन्यामहे । अस्तु वाऽदृष्टाद्वारककृतिमत्त्वं कर्तृत्वं तथापि तादृशयोगिकृतिपूर्वकत्वेनार्थान्तरता । ननु योगिनां तादृशकृतिमत्त्वे प्रमाणं नास्तीति चेन् । सन्ति तावत्पुराणप्रसिद्धा योगिनस्त्वदभिमताश्च प्रसिद्धा च तेषां कृतिः । नचैवमानुमानिकेश्वरवादिमते ऽनुमानात् प्राक् कथमपि स सिद्धः तथा च धर्मिकल्पनात इति न्यायेन सर्वज्ञयोगिकृतेरेव परमाण्वादिविषयत्वं कल्पनीयम् । श्रूयते च पुराणादौ विश्वामित्रप्रभृतीनां जगत्सर्जनहेतुत्वम् । ननु योगिनोपि विना परमेश्वरं न सिद्ध्यन्ति योगिभावस्य तत्प्रसादाधीनत्वादिति चेन्न – विशिष्टकर्ममहिम्ना पूर्वपूर्वातिशयैश्वर्यसामर्थ्यादियुक्तयोगिप्रसादेनैवोत्तरोत्तरस्य त्रिशङ्कुप्रभृतीनां महापदप्राप्तिवत् योगिभावोपपत्तेः । ननु किं ते योगिनो नित्यज्ञानिनः किंवाऽनित्यज्ञानिनः, आद्ये नाममात्रे विवादः नित्यज्ञानिन एव परमेश्वरत्वात्, न द्वितीयः सर्गाद्यकाले तेषां ज्ञानानुपपत्तेस्तत्कारणशरीराभावादिति चेन्न—संसारिज्ञानं प्रत्येव शरीरस्य कारणत्वात् । ननु लाघवाज्ज्ञानमात्रं प्रत्येव तत्कारणमस्त्विति चेन्न--नित्यज्ञानवादिनस्तव एतद्व्याप्त्यनुपपत्तेः । अस्मन्मते च स्वरूपज्ञानस्य नित्यत्वात् । नन्वनित्यज्ञानत्वावच्छेदेन शरीरं कारणमस्त्विति चेन्न–संसारिज्ञानत्वस्यैव तदवच्छेदकत्वात् नित्यज्ञानसिद्धेः पूर्वमनित्यत्वेन तद्व्यवच्छेदानुपपत्तेः । न च नित्यज्ञानस्यान्यतरप्रसिद्ध्यापि तद्विशेषणमर्थवदिति वाच्यं स्वार्थानुमानात् पूर्वं तदनुपस्थितेः । ननु जन्यत्वमात्रेण शरीरजन्यत्वमवच्छिद्यत इति चेन्न-- कारणकार्योभयवृत्तिधर्मस्य कार्यतानवच्छेदकत्वात् । असंसारिज्ञानं तु प्रागेव सिद्धमिति तद्व्यवच्छेदार्थं संसारिविशेषणं तु युज्यत इति । न चैवं मनोजन्यत्वमपि तस्य न स्यादिति वाच्यम् भावकार्यतावच्छेदेना-

समवायिकारणजन्यत्वस्य क्लृप्तत्वेनान्यस्यासंभवात् मनोयोग एव तदिति तज्जन्यत्वसिद्धेः। न चैवमनन्तयोगिकल्पनाप्रसङ्गः, तेषां क्लृप्तत्वात् नित्यज्ञाने मानाभावाच्च। तच्च न तावद्व्याप्त्या सिद्ध्यति। कटादिकर्त्तुस्तदभावात्। नापि पक्षधर्मताबलात् ज्ञानमात्रजन्यत्वमादायापि हेतोः पक्षवृत्तित्वोपपत्तेः। ननु जन्यज्ञानस्य द्व्यणुकाद्युपादानागोचरस्य तदजनकत्वान्नित्यज्ञानं विना हेतोः पक्षवृत्तित्वमेवानुपपन्नमिति चेन्न नित्यज्ञानस्यापि योगिज्ञानस्येव परमाणुविषयत्वोपपत्तेः। नन्वशरीरिपरमेश्वरज्ञानस्यान्यत्र क्लृप्तकारणं मनआदिकं विनोत्पत्तिर्न संभवतीति चेत्तत्र न तावच्छरीरस्य ज्ञानमात्रकारणत्वमित्युक्तं मनःसंयोगस्तु परमेश्वरस्यापि संभवत्येव। ननु स्वादृष्टाकृष्टं मन एव स्वसमवेतज्ञाने कारणमिति चेन्न—ज्ञानमात्रे स्वादृष्टाकृष्टं मनः कारणमिति वक्तुमशक्यत्वात्। नापि जन्यज्ञानमात्रे व्यावर्त्याप्रसिद्ध्या व्यर्थविशेषणतया स्फुरितत्वात्। लाघवान्मनःसंयोगत्वेन कारणत्वोपपत्तेश्च। न चैवं परकीयमनःसंयोगेनापि ज्ञानोत्पत्तिप्रसङ्गः। स्वशरीरसंयोगावच्छिन्नात्मप्रदेशे तत्संयोगे तस्येष्टत्वात्। अन्यत्र स्वशरीरसंयोगाभावेन तस्यानिष्टत्वात्। न च शरीरस्यापि शरीरत्वेनैव कारणत्वमित्यन्यशरीरावच्छिन्नात्मप्रदेशे ज्ञानं किं न स्यादिति तथा च स्वादृष्टाकृष्टमनःसंयोगादिविरहादेव न तत्र ज्ञानमिति वाच्यम् शरीरस्य कार्यतया दृष्टजन्यत्वस्य क्लृप्तत्वात् तज्जनकादृष्टस्य स्वकीयत्वविशेषणमात्रस्य कल्पनायाः मनस्यदृष्टाकृष्टत्वस्वकीयत्वकल्पनातो लघुत्वात्। नचैवं मनःसंयोगस्य कार्यतया स्वादृष्टजन्यत्वेन कारणत्वमिति वाच्यम्। परम्परयापि पुरुषार्थापर्यवसाय्युपेक्षाज्ञानमात्रकारणमनःसंयोगस्य द्विविधादृष्टजन्यत्वाभावेन तस्य तत्त्वेनातत्त्वात्। ननु यद्यस्य भोगजनकं तत्तदीयादृष्टाकृष्टमिति नियमात् मनसोपि तस्य तथात्वं वक्तव्यमिति चेन्न—जन्येष्वेवैतन्नियमात्तत्रैव कार्यवैचित्र्यप्रयोजकतया दृष्टवैचि-

ऽयस्य कल्प्यत्वेनादृष्टस्य कारणत्वान्नित्ये तु नायं नियमः । काले-श्वरपरमाण्वादिवत्तदुपपत्तेः । न च नियतभोगसाधनस्यादृष्टा-कृष्टत्वनियम इति वाच्यम् । मनसोपि प्रतिनियतभोगसाधनत्वा-भावात् साधारणभोगसाधनयोषित्पिण्डादेः परादृष्टजन्यत्वाच्च । न च मनसोऽसाधारणत्वाभावेऽन्तरानिर्गमेन मरणप्रसङ्गः । प्राण-वियोगस्यैव मरणत्वात् वलवज्जीवनादृष्टेन मनोऽन्तरप्रवेशानन्तर-मेवापरस्य निर्गमनोपपत्तेश्च । परमेश्वरस्य भोगाभावेन मनसोऽ दृष्टाकृष्टत्वानपेक्षणाच्च । ततश्चासंसारिपरमेश्वरज्ञानस्य शरीरानपेक्ष-तया तद्दृष्टाकृष्टमनःशरीरयोरभावेपि मनःसंयोगादिकारणात्तु ज्ञानं जायेतेति न नित्यं ज्ञानं विना हेतोः पक्षधर्मत्वानुपपत्तिः । ननु कया प्रत्यासत्त्या मनः परमेश्वरे ज्ञानं जनयतीति चेदुच्यते सृज्यमानपदार्थप्रकारकज्ञानस्य प्राणिकर्माधीनत्वस्य वक्तव्यत्वात् । जीवादृष्टप्रत्यासन्नविषयज्ञानं परमेश्वरो मनो जनयति । न च व्यधिकरणमदृष्टं स्वाश्रयसंयुक्त एव फलं जनयतीति वाच्यम् । श्राद्धादिजन्यादृष्टे व्यभिचारात् । किं च यच्छरीरं साक्षात् स्वप्रयत्ना-धिष्ठेयं तत्स्वादृष्टाकृष्टमिति स्वादृष्टाकृष्टत्वस्यैव स्वप्रयत्नाधिष्ठेय-त्वप्रयोजकत्वे सत्यपि यथा परमेश्वरस्य सर्गाद्यकालीनाऽस्मदा-द्यदृष्टाकृष्टशरीराधिष्ठातृत्वं वेदादिसंप्रदायान्यथानुपपत्त्या कल्प्यते एवं मनसः स्वादृष्टाकृष्टस्यैव स्वसमवेतज्ञानजनकत्वनियमेपि विलक्षणज्ञानकल्पनातो वरमस्यास्मदादिमनोजन्यत्वकल्पनम् । किंचानुमानिकेश्वरस्य ज्ञानमेव न सिद्ध्येत् । कुतस्तस्य नित्यत्वा-नित्यत्वचिन्ता । ननु कार्यं कर्तृजन्यमेव कर्त्ता चोपादानविषय-ज्ञानवानिति व्याप्त्या क्षित्यादेर्ज्ञानजन्यत्वमायाति । न च ज्ञानमनि-त्यमेवेति प्रतिकूलव्याप्तिविरोधे तत्संशय एव स्यान्न तु तन्निश्चय इति वाच्यम् । कार्यकारणत्वाभावप्रसङ्गानुकूलतर्कसहकृतेन कार्यत्वसकर्तृकत्वव्याप्तिज्ञानेन विरोधेन विपरीतव्याप्तेरेवाभावादिति

चेन्न— घटत्वादेरेव कर्तृजन्यतावच्छेदकत्वात्। ननु घटत्वादेः शरीरिकर्तृजन्यतावच्छेदकत्वेऽपि जन्यत्वस्य कर्तृमात्रजन्यतावच्छेदकत्वं वक्तव्यम् यद्विशेषयोः कार्यकारणभाव स्तत्सामान्ययोरपि बाधकं विना कार्यकारणभावस्योचितत्वादिति चेत् न विलक्षणज्ञानकल्पनस्यैव बलवद्बाधकत्वात्। किं च स्वेष्टसाधनताज्ञानमेव सर्वत्र कृतिसाध्ये कारणमिति कार्यात्तथैवानुमीयते। न च तत्परमेश्वरे संभवति तस्याभोक्तृत्वात्। ननु तस्याभोक्तृत्वेऽपि स्वेष्टसाधनताज्ञानमस्ति सर्वस्यैवेश्वरेच्छाविषयतया तदिष्टत्वादिति चेत्—न हि ममेच्छाविषयोऽयमितिज्ञानात् प्रवर्त्तते। अन्यस्येदमिष्टं तस्यैवेदं भूयादिति स्वेच्छाविषयत्वं तदिष्टज्ञाने सत्यपि मम किमनेनेति निवृत्तिदर्शनान्ममेदं सुखसाधनमिति ज्ञानादेव प्रवृत्तिदर्शनाच्च। ननूपादानविषयज्ञानमपि तत्त्वेन कारणमिति न तद्विषयज्ञानं भगवति सिद्ध्यतीति चेत् न हि तन्मात्रं कार्ये कारणं किन्तु स्वसुखसाधनत्वज्ञानमपि तदभावदशायां तस्मिन्सत्यपि कार्यानुदयदर्शनात् ततश्च परमेश्वरे तदुपादानविषयप्रत्यक्षमेव वक्तव्यं ततः परमेश्वरे तदसंभवनिश्चयात्तद्विषयमुपादानज्ञानमपि न कल्प्येत। ननु परमेश्वरस्य क्रियैव कार्ये हेतुर्न स्वेष्टसाधनताज्ञानमिति चेत्तर्हि सैव कारणमित्युपादानज्ञानमपि न कल्प्येत। क्लृप्तकारणभावस्योभयत्रापि तुल्यत्वात्। ननु स्वसुखसाधनत्वज्ञानस्य प्रवर्त्तकस्य परमेश्वरे बाधेऽप्युपादानज्ञानस्य बाधकाभावात्तत्सिद्ध्यति। न ह्यन्यबाधकेनान्यत् कारणतया क्लृप्तं त्यक्तुं शक्यते अतिप्रसङ्गादिति चेन्न। उपादानज्ञानस्यान्वयव्यतिरेकाभ्यां चिकीर्षाप्रयत्नौ प्रत्येव कारणत्वात् गौरवेण घटादिकार्यं प्रत्यपि कारणत्वकल्पनायोगात्। न हि प्रयत्ने सत्युपादानज्ञानादिव्यतिरेकेण घटादिव्यतिरेकोऽस्ति येन स्वतन्त्रान्वयव्यतिरेकाभ्यां तस्य घटादिकारणत्वमपि कल्प्येत। नचैवं तन्त्वादेरपि पटाद्यकारणत्वसङ्गः अन्त्यतन्तुसंयोगं प्रत्येव

तस्य हेतुत्वादिति वाच्यम् । तन्तुसंयोगस्य हेतुत्वे तन्तोरपि हेतुत्वस्य वक्तव्यत्वात् । तद्वच्चिकीर्षादेश्चरमकारणत्वाभावाच्च । अन्यथा तन्त्ववयवादेरपि पटकारणत्वप्रसङ्गाच्च । तत्रान्त्यतन्तुसंयोगं प्रत्येव तुर्यादेरन्वयादिना करणत्वेपि दोषभावाच्च । न चैककारणपरिशेषापत्तिः । अन्त्यतन्तुसंयोगस्थितिक्षणे तन्तुविनाशे पटानुत्पत्तेस्तेषां निमित्ततयाऽदृष्टादीनां च हेतुत्वात् । न चैतावता पटार्थिनस्तदुपादानानुपपत्तिः कारणकारणेपि प्रवृत्तिदर्शनात् नचैतावता यागस्य स्वर्गकारणत्वक्षतिः । श्रुत्या तथैव बोधनात् तत्र व्यतिरेकस्यानपेक्षितत्वात् । ननु यस्योत्कर्षाद्यदुत्कर्षस्तस्य तत्र हेतुत्वं क्षीरदध्यादौ दृष्टमुपादानज्ञानोत्कर्षाच्च घटाद्युत्कर्ष इति तत्तत्र हेतुरिति चेन्न । ज्ञानोत्कर्षस्य कृत्युत्कर्षं प्रत्येव हेतुत्वात् । अत एव ज्ञानं कृतिहेतुरित्युच्यते । यदि पुनश्चिकीर्षायामप्युत्कर्षो वर्ण्येत । तदा ज्ञानं चिकीर्षां प्रत्येव हेतुश्चिकीर्षैव कृतिहेतुः साक्षात्कार्योत्कर्षहेतोरेव कारणत्वात् । अन्यथा धूमोत्कर्षादनुमित्युत्कर्षस्तन्त्ववयवोत्कर्षादपि पटोत्कर्ष इति धूमतन्त्ववयवानामप्यनुमितिपटादिहेतुत्वप्रसङ्गः । ननु तत्र परामर्शतन्त्वाद्युत्कर्षादेवानुमितिपटाद्युत्कर्षो न धूमाद्युत्कर्षादिति चेत्तर्हि प्रकृतेपि कृतिचेष्टोत्कर्षादेव घटाद्युत्कर्ष इति समम् । नन्विष्टसाधनताज्ञानस्यैव कृतिहेतुत्वादुपादानज्ञानं न कृतिहेतुरिति चेन्न । यागादेः श्रेयः साधनत्वज्ञानेपि तत्कृतेरनुदयात् ततः परमेश्वरेऽनित्यचिकीर्षादेरभावान्नोपादानज्ञानसिद्धिः । ननु माभूत्तत्कारणत्वेन तज्ज्ञानसिद्धिः कृतिविषयताप्रयोजकत्वेन तु तत्सिद्ध्यति । देवदत्तज्ञानविषयघटे तच्छून्ययज्ञदत्तकृतिविषयत्वादर्शनादिति चेन्न । घटस्य हि यज्ञदत्तकृत्यविषयत्वं तदभावादेव न तु ज्ञानविषयत्वाभावात् । तस्यां सत्यां तद्व्यतिरेके सत्येव तद्व्यतिरेकादर्शनात् । नन्वन्यविषयकतत्सत्त्वकाले कथमिति चेत् । न हि सैव कृतिस्तस्यैव तद्विषयीकरोति किन्त्वन्यैवोत्पद्यतइत्युत्पत्तावेव तदपेक्षते । ननु स्वसमानाश्र-

यज्ज्ञानसमानविषयैव कृतिरिति चेन्न । कार्यकारणभावादिबाधक-तर्काभावेपि व्याप्तिबलात्तदनुमाने सुखद्वेषादीनामपि निरङ्कुशमनु-मानप्रसङ्गात् । लोके ज्ञानस्य स्वजनकेन्द्रियप्रत्यासत्त्याश्रयविषयत्वं नियतमिति साधु समर्थितं जन्यज्ञानं तस्मात्परिहरेश्वरस्य चेतन-त्वं स्वीकुरु वा ज्ञानेच्छाप्रयत्नानां कार्यत्वमिति सेयमानुमानिकेश्व-रवादिनामुभयतः पाशा रज्जुः । एवं च सति सविषयज्ञानमनित्यमेवेति सविषयज्ञानत्वावच्छेदेनावधृतव्याप्तिरपि परिरक्षिता स्यात् । यदि च परमेश्वरस्य प्रमाणविरुद्धमपि नित्यं ज्ञानं कुलधर्मवत् स्वीकुरुषे तदा नित्यं शरीरमपि स्वीक्रियतां किमेकत्र पक्षपातेन । शरीरं चात्र चेष्टाश्रयो निवक्षितः । तेन न सिद्धसाधनम् । ननु परमेश्वरस्य शरीर-मनुपलब्धिबाधितमिति चेन्न—इन्द्रादिशरीरवदस्मदृष्ट्ययोग्य-त्वात् । ननु यत्सावयवं तदनित्यं यच्छरीरं तत्सावयवमित्याद्यनेक-व्याप्तिविरुद्धं शरीरस्य नित्यत्वकल्पनमिति चेन्न—ज्ञाननित्यत्वेपि सविषयं ज्ञानमनित्यमेव जन्यमेवेत्यादिव्याप्तिविरोधस्य सत्त्वात् । ननु यत्कार्यं तज्ज्ञानजन्यमिति कार्यकारणभावग्राहकतर्कसहकृतया व्याप्त्या सहकृतकार्यत्वलिङ्गपक्षधर्मताज्ञानेन नित्यज्ञानोपस्थित्या ज्ञानानित्यत्वव्याप्तिरस्मदादिज्ञानविषयत्वेन संकोच्यत इति चेत्तर्हि यत्कार्यं तच्छरीरजन्यमिति जन्यत्वावच्छेदेन कार्यकारणभावग्राहक-तर्केण शरीरजन्यत्वावधारणात् क्षित्यादौ कार्यत्वलिङ्गं पक्षधर्मताव-लान्नित्यमुपस्थापयतीति तद्विरोधेन शरीरस्य जन्यत्वादिव्याप्तिरस्म-दादिशरीरविषयत्वेन नियम्यताम् । ननु सर्वस्यापि कार्यस्य न शरीरजन्यत्वनियमः । हस्तादिक्रियायां व्यभिचारादिति चेत्तर्हि ज्ञानमपि न सर्वत्र कारणम् । निर्विकल्पकज्ञाने ज्ञानजन्यत्वाभावात् । यदि च तद्व्यतिरिक्तत्वेन कार्यं व्यवच्छेदयसि तर्हि हस्तादिक्रिया-व्यतिरिक्तत्वेनापि कार्यं व्यवच्छिद्यताम् । ननु शरीरं न कार्यमात्रे कारणं कृत्यादिसंपादनेनान्यथासिद्धमिति चेत्तुल्यं ज्ञानेऽपि अस्तु वा

शरीरी तथापि तदेकत्वं कथं सिद्ध्यति। ननु लाघवसहकृताद्व्याप्ति- पक्षधर्मलिङ्गादेव तत्सिद्ध्यतीति चेन्न। लाघवेन घटलिङ्गात् कुलालानुमानेपि तदेकत्वसिद्धिप्रसङ्गात्। ननु तत्रापि लाघवेन तदेकत्वं सिद्ध्यत्येव परन्तु पश्चाद्बाध्यत इति चेत्तर्हि प्रकृते विविधविशेषस्य बहुकर्तृकत्वव्याप्त्या तादृशक्षित्यादेरपि बहुकर्तृकत्वानुमाने तदेकत्वबाधात्। ननु गोपुरादावप्येककर्तृकत्वेनैव कारणत्वं लाघवान्न बहुकर्तृत्वेनेति चेद् न नियमेन तादृशकार्येषु बहुकर्तृकतादर्शनादनौपाधिकत्वात्। किंचैकत्वं पक्षधर्मताबलादपि न सिद्ध्यति। तद्धि नित्यज्ञानत्वे तस्य सर्वविषयत्वे च सिद्धे पृथिव्यादेरेककर्तृकत्वसंभावनया सिद्ध्यति। जगत्कर्त्तुः किंचिज्ज्ञत्वानित्यज्ञानत्वादिनिश्चयदशायान्नित्यज्ञानत्वादिसंशयदशायां वा तदेकत्वानिश्चयात् ज्ञाननित्यत्वादिज्ञानं च किं लाघवसहकृतव्याप्तिपक्षधर्मलिङ्गादुत कर्तृकत्वावगमात्। नाद्यः अनित्यसकलविषयज्ञानकल्पनेपि गौरवाभावात्। ननु नाशप्रतियोगित्वमनित्यत्वं गुर्विति चेन्न नाशाप्रतियोगित्वस्य नित्यत्वस्य ततोपि गुरुत्वात्। ननु सकलकालसम्बन्धित्वं भावरूपमेव नित्यत्वं सम्बन्धश्च क्वचित् कश्चिदिति न काव्यादावव्याप्तिरिति चेत्तर्हि किञ्चत्कालसम्बन्धित्वमनित्यत्वमिति तुल्यमेव। नन्वेवं प्रध्वंसस्याप्यनित्यत्वापत्तिरिति चेन्न—सकलकालसम्बन्धित्वस्यापि तत्राभावात्तर्हि किमत्रोपतिष्ठतीति चेत् सविषय ज्ञानमनित्यमेवेति व्याप्त्या नित्यत्वमेव युक्तम्। नन्वनित्यज्ञानकल्पनेऽनेकज्ञानं तत्कारणं च कल्पनीयमिति चेत्तस्यानित्यज्ञानसिद्धिद्वारकत्वेनानुमितिदशायामनुपस्थितत्वेन गौरवस्यादोषत्वात्। एतेन लाघवेन ज्ञानैकत्वावगमादनादिद्व्यणुकप्रवाहविषयस्यानादित्वेन नित्यत्वं नियतविषयताप्रयोजककारणजन्यत्वाभावादनियतविषयत्वेन सर्वज्ञत्वमपि सिद्ध्यतीति निरस्तम्। सविषयं ज्ञानं ज्ञानसमानाधिकरणमेवेति व्याप्त्यनुसंधानेन लाघवस्य बाधितत्वेन तदनेकत्वस्यैवानुमितिविषयत्वात्। न च

ज्ञानस्य जन्यत्वे सर्वविषयत्वानुपपत्तिः। भगवज्ज्ञानस्य जन्यत्वेपि नियतविषयज्ञानजनकबहिरिन्द्रियजन्यत्वानभ्युपगमात् । अन्यथा योगिज्ञानस्य सर्वविषयत्वानुपपत्तेः ननु जन्यस्य भगवज्ज्ञानस्य सर्वविषयत्वं केन निश्चीयत इति चेदजन्यस्य तस्य तत्केन निश्चीयत इति वक्तव्यम् । ननु नियतविषयत्वप्रयोजककारणजन्यत्वाभावादिति चेत् जन्येपि योगिज्ञाने सर्वविषयत्वदर्शनात्। बहिरिन्द्रियजन्यत्वाभावादिति चेत्तर्हि प्रकृतेपि तुल्यम्। किं च न तावत्कार्यत्वलिङ्गेन सर्वज्ञत्वं सिद्ध्यति तस्यैतद्व्याप्तिपक्षधर्मतान्यतराविषयत्वात्तद्द्व्यणुकादितदुपादानज्ञानमात्रेण हेतोः पक्षवृत्तित्वोपपत्तेः। न चेदमेव सर्वज्ञत्वं, तदविषयदृष्टान्तस्यापि भस्त्वेन तस्य पारिभाषिकत्वापातात् । नापि लाघवतर्कात्तत्सिद्धिः विपरीतत्वात् । ननु नियतविषयत्वप्रयोजकाभावेन तदुपनीयत इति चेन्न—नियतविषयत्वप्रयोजकाभावे तस्यानियतविषयत्वमेव सिद्ध्यति न तु सर्वविषयत्वं तस्याप्रयोज्यत्वाद्योगिज्ञानस्य तु विशुद्धधर्मप्रभावादेव सर्वविषयत्वसिद्धिः। नचानियतविषयत्वमेव ज्ञानस्य सर्वविषयत्वं परिच्छिन्नविषयत्वेपि कदाचित् किंचिद्विषयीकरोतीति संभवात् । नन्वेकस्य प्रतिभासदशायामपरस्याप्रतिभासे किं कारणमिति चेन्न—विनष्टेषु विषयेषु ज्ञानज्ञेययोः स्वरूपसम्बन्धाभावेन तदविषयत्वोपपत्तेः । ननु तज्ज्ञानं सम्बन्धमन्तरेणापि ज्ञेयं विषयीकरोतीति चेन्न—ज्ञानसम्बन्धित्वव्यतिरेकेण ज्ञानविषयत्वानिरूपणात् । ननु ज्ञानजन्यव्यवहारविषयत्वमेव ज्ञानविषयत्वमिति चेन्न—ज्ञानं स्वविषय एव व्यवहारं जनयतीति तस्य ततोऽन्यस्यैव वक्तव्यत्वात् । नन्वेवमप्यभावविषयत्वार्थं प्रतियोगिविषयत्वं ज्ञानस्य कल्पनीयमिति चेन्न—जन्ये हि विशिष्टज्ञाने विशेषणं प्रतीयते । तस्य तज्ज्ञानजन्यत्वात् जनकविषयस्य जन्यज्ञानविषयताङ्गीकारात्प्रतियोगिज्ञानाभावेनाभावस्यापि परमेश्वरज्ञानविषयत्वकल्पनाच्च । अत एव भगवज्ज्ञानं सर्वविषयमजन्य-

त्वादितिव्यतिरेकानुमानमप्रयोजकत्वेन निरस्तम् । सपक्षीभूतयोगिज्ञानावृत्तित्वेनासाधारणत्वाच्च । इन्द्रियाजन्यत्वहेतोः शरीराजन्यत्ववदसाधारणत्वाच्च । एतेन कर्त्रैकत्वावगमेन ज्ञाने सर्वविषयत्वं नित्यत्वं सिद्ध्यतीति प्रत्युक्तमन्योन्याश्रयाच्च । न च लाघवतर्कसहायानुमानात् कर्त्रैकत्वसिद्धिरित्युक्तम् । किंच लाघवात् कर्त्रैकत्वसिद्धौ कल्पान्तरीयः घटः कुलालजन्यः घटत्वात् संप्रतिपन्नवदित्यनुमानाल्लाघवात्तदेकत्वसिद्धिप्रसङ्गः । न चात्र बाधोऽस्ति। ननु घटत्वेनानेककर्तृत्वमनुमीयत इति चेन्न—कर्त्तुरनेककर्तृत्वेनाहेतुत्वात्। इदानींतनैककर्तृघटेषु व्यभिचाराच्च । ननु क्षित्यादिकर्तैकः क्षितिकर्तृत्वादिति तत्सिद्धिरिति चेन्न—सपक्षघटादिकर्तुर्व्यावृत्तेः । ननु क्षितिरेककर्तृका कार्यत्वात् घटवदिति तत्सिद्धिरिति चेन्न—ईश्वरवादिमते घटादेः साध्यविकलत्वात् । समानस्वभावैककर्तृकेति साध्यं वर्ण्यत इति चेद्यद्येकस्वभावैककर्तृकेति साध्यार्थः तदा नानेककर्तृकत्वव्यावृत्तिः । यदि च तुल्यस्वभावैककर्तृकत्वं तदा यद्यात्मत्वादिना तुल्यस्वभावत्वमर्थः तर्हि साध्यविकलो दृष्टान्तः । यदि किंचिज्ज्ञत्वसर्वज्ञत्वादिना तुल्यस्वभावत्वं तदानेककर्तृसिद्धिः । सर्वज्ञान्तरस्यावश्यकत्वात्। विचित्रकार्येऽनेककर्तृकत्वव्याप्तिविरोधाच्च। तस्मादनुमानादीश्वरसिद्धिरिति बालकानां मनोरथमात्रमिति तस्मात्कार्यलिङ्गानुमानात् न सर्वज्ञेश्वरसिद्धिः किन्त्वस्मदाद्यपेक्षयाऽधिकज्ञानवान् कश्चित्सिद्ध्यति । ततश्च तस्य सर्वपदार्थज्ञानाभावान्न बुद्धिपूर्वकृतत्वं शब्दार्थसम्बन्धस्येत्याह—

न खलु पाणिनिपिङ्गलसंज्ञया
व्यवहरन्ति तयोः स्मरणं विना ।
पदपदार्थपरस्परसंगतिं
निरमिमीत ततो न जगद्गुरुः ॥ २९३ ॥

मतिमतां प्रवरो वृषभध्वजः
कणभुगादिमुनिप्रवरप्रभुः ।
ननु धरादिजगद्रचनाबला-
दनुमितोऽनवखण्डितशक्तिकः ॥ २६४ ॥

पदापदार्थेति सार्द्धश्लोकेन । कणभुगादिमुनिप्रवरप्रभुः—कणादाक्षपादमुनिश्रेष्ठानां स्वामी धरादिजगद्रचनाबलादनुमितः पृथिव्यादिजगन्निर्माणलक्षणकार्यबलादनुमितः वृषभध्वजः शंकरः यतो मतिमतां प्रवरः बुद्धिमतामस्मदादीनां श्रेष्ठः अस्मदाद्यपेक्षयाऽधिकज्ञानवान् न तु अनवखण्डितशक्तिकः न त्वापरिच्छिन्नज्ञानैश्वर्यशक्तिकः ततः पदपदार्थपरस्परसंगतिः पदानि घटादिशब्दाः पदार्थाः घटादयः परस्परसंगतिः पदपदार्थयोरन्योन्यं वाच्यवाचकभावसम्बन्धः पदपदार्थसंकेतान्न निरमिमीत बुद्धिपूर्वान्निर्मित्तवानित्यर्थः । तर्हि भवन्मते वा सर्वज्ञ ईश्वरः केन सिद्धः कथं वा तस्मान्नामरूपतत्सम्बन्धाः संभूता इत्याशङ्क्य यः सर्वज्ञः सर्ववित् सत्यं ज्ञानमनन्तमित्यादिश्रुत्यैव सिद्धः ॥ २६३ ॥ २६४ ॥

ननु अनुमानान्निश्वासवदबुद्धिपूर्वमेव संभूता इत्याकाङ्क्षापूर्वकमाह—

अपि तु वैदिकवाङ्मनसातिगा-
नुदितलुप्तचिदेकरसात्प्रभोः ।
अभवदानकदुन्दुभिनन्दना-
दमतिपूर्वमिदं सकलं जगत् ॥ २६५ ॥

अपि तु वैदिकेति । सत्यज्ञानमनन्तमित्यादिना वेदेन लक्षणवृत्त्या गम्यो वैदिकः तत्र हेतुः—वाङ्मनसातिग इति । वाङ्मनसे अतिक्रान्तः

यतो वाच इतिश्रुतेः अनुदितलुप्तचिदेकरसः उत्पत्तिविनाशरहित चैतन्यैकस्वरूपः सत्यादिवाक्यलक्ष्यवाङ्मनसागोचरानुदितानस्त- मितबोधस्वरूपादित्यर्थः । आनकदुन्दुभिनन्दनाद्वसुदेवेन पुत्रत्वेना- भिमन्यमानात् श्रीकृष्णादित्यर्थः । अनेन स्वस्य विष्णुभक्तयाधिक्यं द्योतितम् । अजनितिपूर्वमबुद्धिपूर्वं निश्वासवदनायासेनेत्यर्थः । इदं परिदृश्यमानं सकलं नामरूपकर्मात्मकमित्यर्थः । तथा च भवदभिम- तेश्वरस्यानुमानादसिद्धेस्तत्सिद्धिं विना च संकेतस्य तत्कृतत्वा- सिद्धेर्न शब्दार्थसम्बन्धः पौरुषेय इति भावः ॥ २६५ ॥

नन्वीश्वरस्य कार्यलिङ्गानुमानागम्यत्वेपि वेदकर्तृत्वेन तत्सिद्धि- रितिव्याप्तिप्रदर्शनपूर्वकं प्रतिजानीते—

ननु लौकिकवचसां नरमतिपूर्वकरचना
परिदृश्यत इति वैदिकवचसामनुमिनुमः ।
वचनं श्रुतिशिरसामपि नरधीकृतरचनं
वचनत्वत इव लौकिकजननिर्मितवचनम् ॥ २६६ ॥

नन्विति । लौकिकवचसां काव्यादीनां नरमतिपूर्वकरचनाकालिदा- सादिपुरुषबुद्धिनिमित्तकनिर्माण इति कृत्वा अनुमिनुमः पुरुषबुद्धिपूर्व- कत्वमितिशेषः । अनुमानप्रकारमाह—वचनमिति । श्रुतिशिरसामपि वचनं वेदवाक्यमपीत्यर्थः । नरधीकृतरचनं पुरुषबुद्धिकृता रचना निर्माणं यस्य तत्तथा वचनत्वतः वाक्यप्रमाणत्वादित्यर्थः । लौकिक- जननिर्मितवचनमिवेति सम्बन्धः । वेदवाक्यानि पुरुषबुद्धिरचितानि वाक्यप्रमाणत्वात् कालिदासादिवाक्यवदित्यनुमानमिह विव- क्षितम् ॥ २६६ ॥

नन्वेतावता कथमीश्वरसिद्धिः पक्षधर्मताबलादित्याह—

न च मादृशजनधीकृतरचनं श्रुतिवचनं
भवितुं क्षममिति वैदिकरचनाबलमिषतः।
अनुमीयत इह शूलभृदिति चेदिदमशुभं
नहि वैदिकवचसामभिभवनास्पदमनुमा ॥ २६७ ॥

न चेति। न हि तदर्थज्ञानं विना तद्वाचकशब्दरचनं संभवति। न हि वेदार्थो वेदेन विनास्मदादिभिर्ज्ञातुं शक्यत इति न श्रुतिवचनमस्मदादिबुद्धिकृतनिर्माणमिति कृत्वा वैदिकरचनाबलमिषतः वेदशब्दनिर्माणमेव बलं तद्व्याजेन वेदरचनान्यथानुपपत्त्येत्यर्थः। शूलभृत्—ईश्वरः। नचागमबाधः। अनुमानविरोधे तस्यैव दौर्बल्यदित्यर्थः। अनुमानस्यागमबाधकत्वे नरशिरःकपालशुचित्वानुमानस्याप्यागमबाधकत्वं स्यादित्यतिप्रसक्त्या दूषयति—इदमशुभमिति। इदं वेदस्य पुरुषबुद्धिपूर्वकत्वानुमानमशुभमसमीचीनं तत्र हेतुः—नहीति। हि यतोऽनुमानं वैदिकवचसामभिभवनास्पदं बाधनिमित्तं न भवत्यत इत्यर्थः ॥ २६७ ॥

ननु वैदिकवचसां बुद्धिपूर्वकत्वानुमाने कस्यागमस्य बाध इत्याशङ्क्यागममेव दर्शयति—

ब्रह्म स्वयम्भु परमात्मपदस्य वेदो
निःश्वासकल्प इति चापरमामनन्ति।
वाक्यं तदस्य मतिपूर्वकतानुमानं
सद्यो निरस्यति नचेदपबाधितं स्यात् ॥ २६८ ॥

ब्रह्मेति। ब्रह्म वेदः स्वयमेव भवतीति स्वयम्भु अबुद्धिपूर्वकत्वेनापौरुषेयत्वादित्यर्थः। वाक्यान्तरमाह—परमात्मेति। परमात्मस्वरूपस्य-

मायोपाधिकपरमात्मन इत्यर्थः। परमात्मपदस्य वेदो निश्वासकल्प इत्यनेनास्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिवाक्यमर्थतो-नुक्तमपरं वाक्यमिति सम्बन्धः। आमनन्ति अध्येतार इति शेषः। तद्वाक्यमस्य वेदस्य ब्रह्म स्वयं भु अस्य महत भूतस्येत्यादिवाक्यं वेदस्य बुद्धिपूर्वकत्वानुमानं न सहते। अन्यथा तस्य बाधितार्थत्व-प्रसङ्गात् न हि तद्युज्यते। ततश्च तद्वाक्यं तदनुमा न बाधेतैव किन्तु तदेव तां बाधत इत्यर्थः ॥ २६८ ॥

किं चेन्द्रो मायाभिरित्यादिना कूटस्थचिद्धातोर्ब्रह्मणो माया-मात्रेण जगत्सर्जनादिकं श्रूयते तद्विरुद्ध्येत ब्रह्मणो वेदसृष्ट्यै बुद्ध्य-पेक्षायां अतस्तद्विरुद्धं च बुद्धिपूर्वकत्वानुमानमित्याह —

सृजति रचति संहरति प्रभुः
सकलमेव निविश्य नियच्छति।
अमतिपूर्वमिति श्रुतिशासने
वद कथं मतिपूर्वकतानुमा ॥ २६९ ॥

सृजतीति। निविश्य प्रतिबिम्बभावेन प्रविश्य नियच्छति नियमनं करोति अमतिपूर्वम् अबुद्धिपूर्वम्। अथवा—मतिर्बोधः। अमतिरज्ञानं तत्पूर्वमित्यर्थः। अस्य सृजत्यादिना प्रत्येकं सम्बन्धः। इत्यनेन प्रकारेण श्रुतिशासने श्रुत्या प्रतिपादने सति कथं मतिपूर्वकतानुमानं वेदस्येति शेषः न कथमपीत्यर्थः। किं च वेदमात्रस्य वाक्यत्वहेतुना बुद्धिमत्पुरुषमात्ररचितत्वसाधने इदानींतनवेदवाक्ये बुद्धिमदस्मदादि-रचितेंऽशतःसिद्धसाधनम्। ननु स्वतन्त्रपुरुषजन्यत्व साध्यत इति चेत् किमिदं स्वातन्त्र्यं किमीश्वरत्वमुत शब्दप्रमाणातिरिक्तप्रमाणेन शब्दार्थज्ञातृत्वम्—यद्वा स्वजन्यशब्दादन्यप्रमाणाद्वाक्यार्थपरिज्ञातृ:

त्वम्। नाद्यः। दृष्टान्तस्य साध्यवैकल्याद्धेतोर्व्यभिचाराच्च। न द्वितीयः। पुराणादीनामर्थं ज्ञात्वा तद्विषयतया विरचितमुक्तकश्लोके कस्मिंश्चि द्व्यभिचारात। न तृतीयः। सिद्धसाधनत्वादस्मदादेरपि कस्यचिन्मीमांसादिपरिशीलनवतः इदानीमुच्चार्यमाणस्वजन्यवेदातिरिक्तात्पूर्वश्रुतवाक्यात् वाक्यार्थज्ञानसत्त्वात्। ननु सर्गाद्यकालीनो वेदः पक्ष इति चेन्न। वेदार्थापरिज्ञान्यध्यापकप्रयुक्तवेदवाक्ये व्यभिचारात्। न च सर्गाद्यकालीनवेदत्वमेव हेतुः साधनविकलत्वाद्दृष्टान्तस्य। न च व्यतिरेकी, अप्रयोजकत्वात्। केवलोपाध्यायवत्सर्गाद्यकाले वेदप्रयोक्तुरपि स्वेन रच्यमानवाक्यस्यातिरिक्तप्रमाणेनार्थप्रतीतिं विनापि प्रयोगसंभवात्। तस्माद्भवत्पक्षे वाक्यत्वानुमानादपि न सर्वज्ञेश्वरसिद्धिरित्यर्थः। नन्वेवं सति कथं भवत्पक्षेपि शास्त्रयोनित्वेन तादृशेश्वरसिद्धिरिति चेद्वेदस्य सर्वार्थप्रकाशनशक्तिः स्वोपादानगततादृशशक्तिपुरस्सरा अर्थप्रकाशनशक्तित्वात् प्रदीपगततादृशशक्तिवत्। उपादानं च ब्रह्मेत्येवमनुमानात्तादृशेश्वरसिद्धिः। किं च न ह्यस्माभिस्त्वयेव केवलानुमानात्तादृशेश्वरसिद्धिर्वर्ण्यते किं तु यः सर्वज्ञ इत्यादिश्रुतिसिद्धे तस्मिन् संभावनामात्रमनुमानेन वर्ण्यते। अतो न भवत्साम्यमस्माकमिति द्रष्टव्यम्॥ २६९॥

तर्ह्यस्माकमपि वेदादेव तत्सिद्धिरिति चेन्न – अन्योन्याश्रय प्रसङ्गादित्याह—

आप्तोक्तत्वप्रत्यये मानभावो
वेदस्यास्य ज्ञायते मानभावे।
विज्ञाते सत्याप्तपूर्वत्वसिद्धि-
रित्यन्योन्यापाश्रयत्वप्रसङ्गः॥ २७०॥

आप्तोक्तत्वेति । अयमर्थः—वेदस्याप्तोक्तत्वेन प्रामाण्ये निश्चिते तस्माद्वेदादीश्वरसिद्धिर्वेदेन परमाप्तेश्वरे सिद्धे तत्प्रणीतत्वेन वेदप्रामाण्यसिद्धिरित्यन्योन्याश्रयप्रसङ्गात् न वेदादपि भवत्पक्षे ईश्वरसिद्धिरिति । ननु वेदस्याप्तोक्तत्वज्ञानं विनापि वेदादुत्पन्नज्ञानस्य यथार्थयोग्यताज्ञानजन्यत्वेन प्रामाण्यनिश्चयादीश्वरसिद्धिरिति चेन्न— वेदादुत्पन्नस्येश्वरगोचरज्ञानस्य नित्यज्ञानवदीश्वरसिद्धेः पूर्वं यथार्थयोग्यताज्ञानजन्यत्वस्यैव निश्चेतुमशक्यत्वात् । नन्वर्थापत्त्यैव तत्सिद्धिरिति चेन्न तादृशेश्वरं विनाऽनुपपद्यमानार्थाभावात् त्वया तत्प्रामाण्यानङ्गीकाराच्च । अत एव तन्मूलकारणोपेक्षितमुपमानं च नियतविषयत्वान्नैवेश्वरसाधकम् अत एतदुपेक्षितम् ॥ ७० ॥

तथा च शब्दतदर्थसम्बन्धानां बुद्धिपूर्वरचितत्वपक्षे वेदप्रामाण्यनिश्चयस्याप्यनुपपत्तेः सर्वज्ञेश्वरस्याप्यसिद्धेः अबुद्धिपूर्वरचितत्वेन स्वत एव प्रामाण्यनिश्चयो वक्तव्यः एवं च सर्वज्ञेश्वरश्च सिद्ध्यतीत्यभिप्रायेणाह —

तस्मादेषा स्वप्रयुक्तप्रमाण-
भावज्ञाना वेदविद्याभ्युपेया ।
प्रामाण्यं स्यात्स्वप्रयुक्तं च तस्या
वस्तुस्थित्या ज्ञप्तिवन्नान्यतस्तत् ॥ २७१ ॥

तस्मादिति । यस्मादाप्तोक्तत्वेन यथार्थयोग्यताज्ञानजन्यत्वेन वा प्रामाण्यनिश्चयेऽन्योन्याश्रयादिदोषः तस्मादेषा वेदविद्या वेदलक्षणा विद्या वेदजन्यविद्या वा स्वप्रयुक्तप्रमाणभावज्ञाना स्वेन स्वरूपेणैव प्रयुक्तं प्रमाणभावज्ञानं प्रामाण्यज्ञानं यस्यां सा तथोक्ता प्रामाण्यज्ञानस्य स्वप्रयुक्तत्वं नाम ज्ञानस्वरूपग्राहकप्रमाणादेव ग्राह्यत्वम् ।

तथा च वेदविद्याया अपि प्रामाण्यं तत्स्वरूपग्राहकप्रमाणादेव गृह्यत इत्येवाभ्युपेयं न तु यथार्थयोग्यताज्ञानजन्यत्वादिनेत्यर्थः। नन्विदमनुपपन्नं यत् ज्ञानप्रामाण्यं ज्ञानस्वरूपग्राहकप्रमाणादेव गृह्यत इति तथात्वे तत्संशयानुपपत्तेः निश्चिते तस्मिन् संशयायोगात्, न च संशयस्थले प्रामाण्यं न ज्ञातमिति वाच्यम्—यावज्ज्ञानग्राहकग्राह्यत्वाभावप्रसङ्गात्, न च ज्ञानमपि न ज्ञातमिति वाच्यम्—तस्य स्वयं प्रकाशत्वेन स्वसत्तायां प्रकाशविरहानुपपत्तेरिति चेदुच्यते-प्रामाण्यं स्वत एव गृह्यते, न च संशयानुपपत्तिः,—निश्चितेपि दोषप्राबल्यात् संशयोपपत्तेः, दृश्यते हि स्फटिकादौ शौक्ल्यनिश्चयेपि जपाकुसुमादिदोषबलाल्लौहित्यप्रत्ययः। न च यथा तत्र लौहित्यप्रतिभासेपि श्वेतार्थी प्रवर्तते तथात्रापि संशये विद्यमानेपि प्रामाण्यनिश्चयात् अर्थे निष्कम्पा प्रवृत्तिः स्यादिति वाच्यम्। तत्र लौहित्यभ्रान्त्यनन्तरं श्वेतार्थी श्वैत्यमनुमाय प्रवर्त्तते न प्रथमोत्पन्नश्वैत्यज्ञानात् तस्य लौहित्यज्ञानेन नष्टत्वात् अत्र तु संशयदशायां प्रामाण्यस्य संदिह्यमानत्वात् प्रथमोत्पन्ननिश्चयात्मकप्रामाण्यज्ञानस्य च तदाश्रयस्य संशयेन विनष्टत्वात्। तल्लिङ्गाद्यप्रतिसंधानेन ज्ञानान्तरस्य चाभावात् कथं प्रवर्तेत। ननु प्रथमज्ञानसमानविषयकज्ञानान्तरात्प्रवृत्तिः स्यादिति चेन्न तस्यापि प्रथमज्ञानवत् प्रबलदोषबलेन संदिह्यमानप्रामाण्यतया तदनुपपत्तेः। ननूत्पन्नज्ञाने संशयो भवति न त्वनुत्पन्ने तस्य धर्म्यादिसापेक्षत्वात् तथा च ज्ञानस्य स्वप्रकाशरूपेणैवोत्पद्यमानतया प्रथमक्षणे प्रामाण्यस्य ज्ञातत्वात् द्वितीयक्षणे संशयोत्पत्तिवेलायां निष्कम्पप्रवृत्तिप्रसङ्ग इति चेत् तत्र तावत् संशयस्य हि निष्कम्पप्रवृत्तिप्रतिबन्धकत्वमन्वयव्यतिरेकसिद्धमुभयसंमतं च ततश्च संशयसामग्र्यपि निष्कम्पप्रवृत्तिप्रतिबन्धिका स्यात्। तत्प्रतिबन्धकज्ञानसामग्र्या अपि तत्प्रतिबन्धकत्वात्। तथा च प्रथमक्षणे प्रामाण्यनिश्चयस्य संशयसामग्रीप्रतिबन्धकत्वात् कथं

प्रवृत्तिः स्यात्। ननु निश्चयसामग्र्या एव प्रतिबन्धकत्वमिति चेन्न तथात्वे विशेषादर्शनसहकृतसंशयप्रतिबन्धकनिश्चयं प्रति तत्सामग्र्या अप्रतिबन्धकत्वेन संशयदशायां स्थाणिवन्द्रियसंयोगादिमतः स्थाणुत्वस्मृतिमतश्च स्थाणुप्रत्यक्षप्रसङ्गात्। न च तत्र विशेषदर्शनविरहात्तत्प्रत्यक्षविरहः। तस्य त्वन्मतेपि प्रत्यक्षमात्रेऽनपेक्षितत्वात्। अन्यथा सर्वस्यापि प्रत्यक्षस्य विशेषदर्शनजन्यत्वेन तत्र प्रामाण्यसंशयाभावप्रसङ्गात्। न च संशयसामग्र्याः प्रबलत्वेन तत्र संशयस्यैवोत्पत्तिरिति वाच्यम्। तथात्वे तस्याः प्रतिबन्धकत्वपर्यवसानात्। अप्रबलस्य तदनुपपत्तेः। न च संशयादिसामग्र्यसहकृतस्यैवात्ममनः संयोगादेर्निश्चयसामग्रीत्वमिति वाच्यम्। अत्रापि संशयतत्सामग्र्यसहकृतमेव ज्ञानं स्वाश्रयप्रामाण्यनिश्चये निष्कम्पप्रवृत्तौ वा हेतुरिति तुल्योत्तरत्वात्। किं च किञ्चिन्निश्चिते वस्तुनि संशय एवानुपपन्न इत्युच्यते किं वा प्रामाण्यसंशयाजन्यसंशयोऽनुपपन्न इति। नाद्यः। प्रामाण्यसंशयाधीनार्थसंशयानुभवविरोधात् त्वयानभ्युपगमाच्च। द्वितीयेपि किं प्रामाण्यसंशयस्तत्त्वेनैव विषयसंशयहेतुः उत दोषत्वेन। नाद्यः। संशयचातुर्विध्यप्रसङ्गेनापसिद्धान्तापातात्। ननु ज्ञानविषयत्वादिसमानधर्ममाश्रित्य प्रामाण्यसंशयस्तत्त्वेन हेतुरिति चेन्न—एवमपि कारणवैलक्षण्यप्रयुक्तकार्यवैलक्षण्यस्यावश्यकत्वेन संशयत्रैविध्यभङ्गप्रसङ्गात्। द्वितीये प्रामाण्यसंशयादिवार्थेऽन्यस्मादपि दोषान्निश्चितेपि प्रामाण्ये कथं न संशय उदीयात् कारणतावच्छेदकावच्छिन्नयत्किञ्चित्सहकृतकारणान्तरस्यावश्यं कार्यजनकत्वात्। वस्तुतस्तद्दोषस्यैव घटसंनिकर्षस्येव कारणत्वेपि विशेष्यसन्निकर्षत्वादिवदनुगतस्य दोषत्वस्य कस्य चिद्वक्तव्यत्वात्। अन्यथा प्रतिसंशयादिकार्यवैजात्योपलम्भप्रसङ्गात्। ननु निश्चिते वस्तुनि प्रामाण्यसंशयं विना संशयो न दृश्यत इति चेन्न—अदर्शनस्यासिद्धेः। यतः केनचित्पुरुषेण सुहृदागमने कथिते श्रोता तद्वाक्यादर्थं प्रतिपद्य तज्ज्ञानं

प्रमाणं नवेति संशयं विनैव दोषवशादर्थसंशयं ब्रवीति किमेतत्स-त्यमुत नेति। किंच परतः प्रामाण्यग्रहपक्षेऽनवस्था स्यात्। तथाहि निष्कम्पा प्रवृत्तिस्तावदर्थसद्भावनिश्चयजन्येति सर्वसंमतम्। तत्र किं गृहीतप्रामाण्यमेव ज्ञानमर्थनिश्चयात्मकमुतागृहीतप्रामाण्यमेव। अन्त्ये कुत्रापि ज्ञानप्रामाण्यसंशयो न स्यात्। ज्ञानमात्रेणार्थसद्भावस्य निश्चितत्वात्। न ह्यर्थसद्भावे निश्चितेपि ज्ञानप्रामाण्यसंशयो युज्यते। तस्य तदभावघटितत्वात्। करतलामलकादिज्ञाने तद्दर्शनात् प्रामा-ण्यावधारणवैयर्थ्यप्रसङ्गाच्च। आद्ये प्रामाण्यगोचरज्ञानस्यापि स्वार्थ-प्रामाण्यनिश्चयार्थं प्रमाणग्रहापेक्षणादनवस्था। ननु यत्र ज्ञानप्रामाण्ये संशयः तत्र ज्ञानप्रामाण्यनिश्चयाधीनोऽर्थनिश्चयः यत्र तु स न करतलामलकादिज्ञाने तत्र ज्ञानं स्वत एवार्थनिश्चयरूपं न प्रामाण्या-वधारणमपेक्ष्येति नानवस्था न वा प्रामाण्यनिश्चयवैयर्थ्यमिति चेन्न—संशयोत्पत्तेः पूर्वं घटादिज्ञानेनार्थसद्भावे निश्चिते तज्ज्ञान-प्रामाण्यसंशयस्यैवानुपपत्तेः। न च संशयसामग्र्या प्रतिबद्धत्वात् तज्ज्ञानस्य नार्थसद्भावनिश्चायकत्वमिति वाच्यम्। धर्मिज्ञानादेरभावेन संशयसाग्रया एव तदाभावात्। अन्यथा करतलामलकज्ञानेपि तत्सं-शयप्रसङ्गात्। न च तस्याभ्यासदशापन्नज्ञानत्वादेव न तत्र तत्संशय इति वाच्यम्। ज्ञानस्यैव संशयविरोधित्वात्। अभ्यासदशापन्न-त्वस्याप्रयोजकत्वात्। अभ्यस्तविषयेपि क्वचिद् रज्ज्वादिज्ञाने दोष-प्राबल्यात् प्रामाण्यसंशयविपर्ययदर्शनात्। अनभ्यासदशापन्नज्ञाने-प्यप्रामाण्यकोटिस्मरणादिविरहदशायामर्थं निश्चित्य निष्कम्पप्रवृत्ति-दर्शनात्। तथा च प्रामाण्यावधारणानर्थक्यानवस्थयोरन्यतरापत्तिः सुदृढैव। किं च यत्र ज्ञानप्रामाण्यावधारणं प्रवृत्त्यङ्गमित्युच्यते तत्रापि कथं तदवधारणं किं समर्थप्रवृत्तिजनकत्वेन किं वा गुणजन्य-त्वेन। नाद्यः। प्रवृत्तेः पूर्वं समर्थप्रवृत्तिजनकत्वस्य दुरवधारणत्वात्। प्रवृत्त्यनन्तरं च प्रामाण्यावधारणस्य प्रवृत्त्यनङ्गत्वात्। ननु तस्मि-

न्विषये तत्प्रकारकतयोत्पन्नज्ञानान्तरस्य निष्कम्पप्रवृत्त्यर्थं तदवधारण-मिति चेत् । नूनमयं गुदाञ्जनेन चक्षुरलंकर्त्तुमिच्छति तदर्थत्वे वा न प्रामाण्यावधारणस्य तदर्थत्वमावश्यकसमर्थप्रवृत्तिजनकत्वज्ञाने-नैव पूर्वस्मिन् ज्ञाने जाते न तत्समानविषयकतत्प्रकारकज्ञानान्तरस्य समर्थप्रवृत्तिजनकत्वं संशयविरहिततया स्वत एव निष्कम्पप्रवृत्त्यु-पपत्तेः । ननु समर्थप्रवृत्तिजनकत्वनिश्चयेन तत्संशयविरहेप्यप्रामाण्य-शङ्कानिराकरणार्थं प्रामाण्यनिश्चयोऽपेक्षणीय इति चेत् । न समर्थप्रवृ-त्तिजनकत्वनिश्चयादेवाप्रामाण्यशङ्काया अपि विरहोपपत्तेः । ननु समर्थ-प्रवृत्तिजनकत्वस्य प्रामाण्यव्याप्यत्वज्ञानं विना तच्छङ्कानिराकरणं न भवति तद्व्याप्यत्वज्ञाने च प्रामाण्यज्ञानमवश्यं भवेदिति चेन्न । यदि हि समर्थप्रवृत्तिजनकत्वे निश्चितेपि तस्य प्रामाण्यव्याप्यत्वानिश्चया-दप्रामाण्यसंशयो भवतीत्युच्यते । कामं भवतु नह्ययं संशयः स्वतो निष्कम्पप्रवृत्तिविरोधी किन्तु समर्थप्रवृत्तिजनकत्वसंशयजननद्वारा तज्जनकत्वं च निश्चितमेवेति किमप्रामाण्यसंशयनिवृत्त्या । अस्तु वा तद्व्याप्यत्वज्ञानमपि तथापि न प्रामाण्यनिश्चयः प्रवृत्त्यङ्गमावश्यक-प्रामाण्यव्याप्ययथार्थप्रवृत्तिजनकत्वप्रकारकज्ञानादेव प्रवृत्त्युपपत्तेः । ननु सामग्र्याः सत्त्वात् प्रामाण्यज्ञानमपि भवत्येवेति चेत् जायतां नाम न ह्येतावता तत्प्रवृत्त्यङ्गं भवति । केवलव्यतिरेकाभावात् । नापि गुणाजन्यत्वेनेति द्वितीयः । प्रमात्वनिश्चयात्पूर्वं तस्यैव दुरवधारण-त्वात् । तस्यैव तदवच्छेदकत्वात् । तस्मात्परतः पक्षे प्रामाण्यावधार-णस्य वैयर्थ्यादिदोषात् । स्वतः पक्षे च संशयाद्युपपत्तेः । स्वत एव प्रामाण्यावधारणमिति सिद्धम् । एवमुत्पत्तावपि तस्य स्वतस्त्वमाह—

प्रामाण्यं स्यादिति । वस्तुस्थित्येति । उत्पत्तितोपि तस्या विद्यायाः प्रामाण्यं वस्तुस्थित्यापि स्वप्रयुक्तं नान्यतः तस्मान्न वक्तृसमवेतयथार्थज्ञानादि-प्रयोज्यं प्रामाण्यमित्यर्थः । ज्ञानं यदा स्वकारणादुत्पद्यते तदा तन्मा-त्रादेव प्रमा भूत्वैवोत्पद्यत इति भावः । तदनेन प्रामाण्यस्योत्पत्तौ

स्वतस्त्वं नाम ज्ञानजनकसामग्रीमात्रप्रयोज्यत्वमित्युक्तं भवति तत्र दृष्टान्तमाह—ज्ञप्तिवदिति। यथाप्रामाण्यज्ञानं जन्यज्ञानग्राहकसामग्रीमात्रजन्यं तद्वत्प्रामाण्यमपि ज्ञानजनकसामग्रीमात्रप्रयोज्यमित्यर्थः। नन्विदमनुपपन्नं यत्प्रामाण्यं ज्ञानजनकसामग्रीमात्रप्रयोज्यमिति तथात्वे प्रमाऽप्रमावैलक्षण्यानुपपत्तेः। कार्यवैलक्षण्यस्य कारणवैलक्षण्यप्रयोज्यत्वादितिचेदुच्यते प्रामाण्यं ज्ञानजनकसामग्रीमात्रप्रयोज्यमेव। न च कार्यवैजात्यानुपपत्तिः। अप्रमायाः दोषजन्यत्वात् प्रमाया दोषासहकृतसामग्रीजन्यत्वात्कार्यवैजात्योपपत्तेः। न च प्रमायां गुणः कारणं तदसहकृतसामग्री अप्रमायां कारणमिति वैपरीत्यं किं न स्यादिति वाच्यम्। पित्तादिदोषोत्कर्षेण भ्रान्त्युत्कर्षदृष्टेः पित्तादेरवश्यं तत्र हेतुत्वात्। न चैवं सन्निकर्षगुणोत्कर्षेण प्रमोत्कर्षाद् गुणोपि प्रमायां कारणमिति वाच्यम्। सन्निकर्षे ह्युत्कर्षचतुष्टयसन्निकर्षत्वमेव तच्च पुरुषत्वेन गृह्यमाणभेदान्धकारस्थस्थाणवादावपि विद्यते। अन्यथा तद्गतपरिमाणस्याग्रहणप्रसङ्गात्। ततः सत्यपि सन्निकर्षविशेषे दोषसद्भावेन प्रमाया अदर्शनात्। दोषासाहित्ये तु तत्रैव तस्मादेव सन्निकर्षादुत्तरक्षणे प्रमाया दर्शनात् व्यभिचारान्न सन्निकर्षविशेषो गुणः प्रमायां कारणम्। नचान्यो गुणः स्तम्भादिज्ञाने वक्तुं शक्यते। अतिनिकटदेशवृत्तित्वं गुण इति चेत् न तस्य पूर्वमपि सत्त्वात्। ननु प्रौढप्रकाशो गुण इति चेन्न। तस्य विस्पष्टरूपवत् ज्ञानमात्रकारणत्वात्। ननु दोषाभाव एव गुण इति चेन्न। दोषाभावस्य प्रतिबन्धकाभावत्वेनाकारणत्वात्। न हि प्रतिबन्धकाभावोपि कारणं सामग्र्यां सत्यां कार्योत्पादविरोधिन एव प्रतिबन्धकत्वेन तदभावस्य सामग्र्यनन्तर्भूतत्वात्। अन्यथा कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकत्वं प्रतिबन्धकाभावत्वेन कारणत्वमित्यन्योन्याश्रयात्। तस्यावच्छेदकत्वमात्रेणापि कार्यवैजात्यसिद्धौ तत्कारणत्वकल्पनावैयर्थ्याच्च। अवच्छेदकस्य दार्ढ्यं च नियतान्वयव्यतिरेकित्वं चोपपद्यते। एतेन विशेष्य-

सन्निकर्षस्य विशिष्टप्रत्यक्षमात्रे कारणत्वेपि दोषाभावजन्यत्वात् धर्म्यंशज्ञानस्य नियतप्रमात्वमिति निरस्तम् । किं च प्रामाण्यं नाम ज्ञानत्वावान्तरजातिः सा चाश्रयत्वेन व्यक्तिमात्रमपेक्षमाणा स्वरसतो निखिलानुभवमाश्रयते । न चाप्रमायामपि तद्वृत्तिप्रसङ्गः । तस्याज्ञानत्वात् । न चैवं धर्म्यंशज्ञानस्याप्यप्रमात्वप्रसङ्गः जातेरव्याप्यवृत्तित्वानुपपत्तेरिति वाच्यम् । एकस्य दोषतदभावजन्यत्वानुपपत्त्या ज्ञानैकत्वासिद्धेः धर्मिज्ञानस्येन्द्रियसन्निकर्षजन्यत्वादारोप्यज्ञानस्य तदभावेन तदभावाच्च । तथा च कथं प्रामाण्यस्य परतस्त्वम् । यत्तु पुनर्विशेषदर्शनस्य विशेषणप्रमात्वेन विशिष्टप्रमाकारणत्वमिति प्रमायाः गुणजन्यत्वमिति तदसत् विशेषणप्रमां विनापि विशेषणस्मृत्या विशिष्टप्रमादर्शनात् । ननु संशयोत्तरविशिष्टप्रमायां विशेषणप्रमात्वेन हेतुत्वमिति चेन्न—तत्रापि विशेषादर्शनप्रयोजकदोषे निवृत्ते तदसहकृतसामग्र्यैव पुरुषत्वादिस्मरणसहितया तद्विशिष्टप्रमोत्पत्त्युपपत्तेः । अस्मन्मते विशेषणज्ञानस्यानपेक्ष्यत्वाच्च । तस्माज्ज्ञानप्रामाण्यमुत्पत्तितोपि स्वत एवेति सिद्धम् ॥ २७७ ॥

एवं ज्ञप्त्युत्पत्त्योः प्रामाण्यस्य स्वतस्त्वमुक्त्वा फलेपि स्वतस्त्वमाह—

ज्ञप्त्युत्पत्त्योर्यद्वदेव प्रवृत्ता-
वस्या युक्ता मानता स्वप्रयुक्ता ।
वेदोत्थाया बुद्धिवृत्तेर्न हीय-
मुत्पाद्याऽन्यत् संविदे काङ्क्षतीति ॥ २७८ ॥

ज्ञप्त्युत्पत्त्योरिति । प्रवृत्तिः प्रवृत्त्यनुकूला विषयाभिव्यक्तिः प्रामाण्यस्य स्वतस्त्वमेवं स्वत एव फलं जनयतीति तदंशेपि स्वत एव प्रामाण्य-

मित्यर्थः । तदेव व्यतिरेकमुखेनाह—न हीति । इयं बुद्धिवृत्तिः उत्पाद्यान्यत् विषयाभिव्यक्तिलक्षणादुत्पाद्यादन्यत् संविदे विषयाभिव्यक्तिलक्षणफलाय न काङ्क्षतीति कृत्वा स्वप्रयुक्ता मानतेति सम्बन्धः । उत्पद्यान्यदिति पाठे व्यस्तं पदं स्वोत्पत्तिव्यतिरेकेणान्यन्नापेक्षत इत्यर्थः ॥ २७२ ॥

तस्मात् स्वतःप्रामाण्यादेव वेदप्रामाण्यसिद्धेरन्यथा च तदसंभवान्नामरूपकर्मात्मकस्य जगतोऽबुद्धिपूर्वकैव सृष्टिरित्युक्तमेव युक्तम् । ततश्च वेदस्य पौरुषेयत्वानुमानमागमबाधितं मिथ्यैवेत्युपसंहरति—

विश्वं विष्णोरुत्पतन्नामरूपं
निश्वासादिप्रख्यमित्याह वेदः ।
यत्तत्तथ्यं वर्त्मना वर्णितेन
तस्मान्मिथ्या पौरुषेयानुमानम् ॥ २७३ ॥

विश्वमिति । उत्पतत् जायमानं नामरूपं नामरूपकर्मात्मकं निश्वासादिप्रख्यं निश्वासेक्षणादितुल्यं वेदः अस्य महतो भूतस्येत्यादि वेदः विष्णोरुत्पन्ना तमरूपविश्वंनिश्वासादिप्रख्यमित्याह यत्तद्वर्णितेन वर्त्मना तथ्यं तस्मात्पौरुषेयानुमानम् ननु लौकिकवचसामित्यादिनोक्तं पौरुषेयत्वानुमानं मिथ्या आगमबाधितविषयत्वादितिसम्बन्धः ॥ २७३ ॥

एवं च प्रथमपादोक्तानपेक्षत्वलक्षणप्रामाण्यं न सिद्धेदिति यदुक्तं तदपि परिहृतमिति परमप्रकृतमुपसंहरति—

परिणामविवर्तयोरतः
परिक्लृप्तावपि वेदगोचरः ।

न च चोद्यलवोऽपि विद्यते
कथितेनैव पथाऽनपेक्षितः ॥ २७४ ॥

परिणामेति । परिणामविवर्त्तयोः परिक्लृप्तावपि परिणामाश्रयणेपि विवर्त्ताश्रयणेपि वेत्यर्थः । अत इत्यादौ योजनीयम् । यस्माद् बुद्धिपूर्वैव सृष्टिः अतः सकलस्यापि जगतो जन्यत्वे वेदस्यापि तदन्तर्भूतस्य जन्यतयानपेक्षलक्षणस्वतः प्रामाण्यं न स्यादिति वेदविषये यच्चोद्यमुक्तं तस्य गन्धोपि नास्ति । उक्तेन मार्गेणाबुद्धिपूर्विकैव सृष्टिरित्युक्तप्रकारेणानपेक्षतायाः सत्त्वादित्यर्थः । तस्मात्कार्यकारणादिव्यवहारस्य मायामात्रत्वादीश्वरत्वसाक्षित्वादेश्च सापेक्षतया कल्पितत्वेन ब्रह्मस्वरूपत्वानुपपत्तेः सर्वविकल्पनारहितं नित्यशुद्धबुद्धमुक्तस्वभावमद्वितीयं ब्रह्म तत्पदलक्ष्यमिति सिद्धम् ॥ २७४ ॥

एवं पदद्वयोपादेयं लक्ष्यमर्थं प्रदर्श्य पदत्रयोपादेयमप्येकमेवेति दर्शयितुं पदद्वयलक्ष्यस्य पदद्वयवाच्यार्थसम्बन्धप्रदर्शनाय पदद्वयवाच्यं च दर्शयितुमादौ तच्छब्दसम्बन्धिपदार्थं सामान्यतो विभज्य दर्शयति—

उपाधिमौपाधिकमान्तरं चि-
दाभासनं चित्प्रतिबिम्बकं च ।
चिद्बिम्बमेवं चतुरः पदार्था-
न्विविच्य जानीहि तदर्थभाजः ॥ २७५ ॥

उपाधिमिति । तदर्थभाजः तच्छब्दस्यार्थमर्थत्वं भजन्त इति तदर्थभाजः तच्छब्दाभिधेयान् चतुरः पदार्थान् एवं विविच्य जानीहीति सम्बन्धः । एवंशब्दार्थमाह—उपाधिमिति । उपाधिरेकः पदार्थः औपा-

धिकमान्तरं चिदाभासनमेकः पदार्थः । औपाधिकम्-उपाधिजन्यम् आन्तरम्-उपाध्यन्तर्गतम् चिदाभासनं चैतन्यस्योपाधिसन्निधिवशादुपाधिस्थत्वन्नाम धर्मो जायते स एव चिदाभासो नामात एव निगमनावसरे दृष्टान्तदार्ष्टान्तिकयोरप्यग्रगतत्वं पुरःस्थत्वमित्युपाधिस्थत्वमेव । आभासस्थानमाह—आन्तरमित्यादिकं प्रतीत्यनुरोधेन द्रष्टव्यम् । चित्प्रतिबिम्बनमित्येकः पदार्थः । आभासविशिष्टचैतन्यचित्प्रतिबिम्बनमित्यर्थः । चिद्बिम्बमित्येकःपदार्थः आभासादिसम्बन्धरहितमनवच्छिन्नचैतन्यमात्रं चिद्बिम्बमित्यर्थः ॥ २७५ ॥

एवं तत्पदसंबन्धिपदार्थं सामान्यतो विभज्य त्वंपदसम्बन्धिपदार्थमपि सामान्यतो विभजते—

तथा त्वमर्थेऽपि चतुष्टयं तद्
विवेचनीयं निपुणेन भूत्वा ।
मतिश्चिदाभासनमेवमस्यां
बिम्बं तदीयं प्रतिबिम्बकं च ॥ २७६ ॥

तथेति । तथा तत्पदार्थ इव त्वमर्थे त्वंपदार्थेऽपि तच्चतुष्टयं निपुणेन भूत्वा सावधानेन स्थित्वा विवेचनीयमिति सम्बन्धः । तदेव पदार्थचतुष्टयमाह—मतिरिति । मतिशब्द-उपाधिपरः अयमेकः पदार्थः । एवं चिदाभासनमित्यपरः पदार्थः । अत्रापि चिदाभासनं नामचैतन्यस्योपाधिस्थत्वमस्यामिति प्रतीत्यनुरोधेनेति द्रष्टव्यम् । स्त्रीलिङ्गनिर्देशस्तु मतिशब्दसन्निधानात् । बिम्बमित्येकः पदार्थः शुद्धचैतन्यमित्यर्थः । तदीयं प्रतिबिम्बं चैकःपदार्थः । तदीयं शुद्धचैतन्यसम्बन्धिप्रतिबिम्बकमाभासविशिष्टचैतन्यमित्यर्थः ॥२७६ ॥

एवं सामान्यतः पदद्वयसम्बन्धिपदार्थं विभज्य तत्पदार्थे उपाध्यादिस्वरूपं विशेषतो दर्शयति—

उपाधिरज्ञानमनादिसिद्ध-
मस्मिंश्चिदाभासनमीश्वरत्वम् ।
तदन्विता चित्प्रतिबिम्बकं स्या-
दुदीर्यते शुद्धचिदेव बिम्बम् ॥ २७७ ॥

उपाधिरिति । अज्ञानमिति सत्त्वप्रधानमज्ञानमुच्यते । अनादिसिद्धं शुद्ध-चैतन्येऽनादित्वेनाध्यस्तं तस्मिन् अज्ञाने ईश्वरत्वमीश्वरत्वप्रयोजक-मित्यर्थः । अत्रापि तस्मिन्निति प्रतीत्यनुरोधेनोपाधिस्थत्वमीश्वरत्वप्रयो-जकमित्यर्थः । तदन्विता आभासविशिष्टा । तदनेन शुद्धचैतन्याध्यस्तो-पाधिसन्निधिवशात् तद्गतत्वेन प्रतीयमानं चैतन्यं प्रतिबिम्ब ईश्वर इति व्यवह्रियते । स एव तत्पदवाच्यार्थ इत्युक्तं भवति । बिम्बस्वरूपमाह उदीर्यते शुद्धचिदेवेति । शुद्धत्वं चाभासानन्वितत्वं तदनेन तत्पदलक्ष्यार्थो दर्शितो भवति ॥ २७७ ॥

इदानीं त्वंपदार्थेऽप्युपाध्यादिस्वरूपं विशेषतो दर्शयति —

उपाधिरन्तःकरणं त्वमर्थे
जीवत्वमाभासनमत्र तद्वत् ।
तदन्विता चित्प्रतिबिम्बमेव-
मनन्वितां तामिह बिम्बमाहुः ॥ २७८ ॥

उपाधिरन्तःकरणमिति । अत्रान्तःकरणे आभासनं चैतन्यस्यान्तःकारण-स्थत्वमित्यर्थः । जीवत्वं जीवत्वव्यवहारप्रयोजकमित्यर्थः । तद्वत्-यथा चैतन्यस्याज्ञानस्थत्वमीश्वरत्वप्रयोजकं तद्वदित्यर्थः । तदन्विता जीवत्वव्यवहारप्रयोजकोपाधिस्थत्वलक्षणाभासान्विता तदनेनान्तः-

करणसन्निधवशात् तत्स्थत्वेन प्रतीयमानं चैतन्यं प्रतिबिम्बं जीवव्यवहारभाक् त्वंपदवाच्यमित्युक्तं भवति । बिम्बस्वरूपमाह—एवमिति । यथा अज्ञानचिदाभासानन्विता चित् तत्पदार्थबिम्बमेवमन्तःकरणचिदाभासानन्वितां चितं बिम्बमाहुरित्यर्थः । तदनेन त्वंपदलक्ष्यार्थो दर्शितः । अर्थात् पदद्वयलक्ष्यमप्येकमेवेत्युक्तं भवति ॥ २७८ ॥

एवं चातुर्विध्यं प्रदर्श्य बुद्धिसौकर्यार्थं पदद्वयार्थेऽपि हेयमुपादेयं च विभजते—

उपाधिना सार्धमुपाधिजन्य-
मौपाधिकं सर्वमवेहि मिथ्या ।
भागं मृषा चित्प्रतिबिम्बकेऽपि
बिम्बं पुनः सत्यमशेषमेव ॥ २७९ ॥

उपाधिनेति । अज्ञानमन्तःकरणं चोपाधिरज्ञानस्थत्वमन्तःकरणस्थत्वं च चिदाभासनं सर्वात्मना मिथ्यैवावेहि । न तत्र वाक्यार्थोपयोगित्वेनोपादेयांशोऽस्तीत्यर्थः । पदार्थद्वयं वाक्यार्थोपयोगित्वेनोपादेयं न भवतीत्युक्ते चित्प्रतिबिम्बादिकं किमुपादेयमेवेत्याशङ्क्य सत्यं न सर्वात्मना चित्प्रतिबिम्बमुपादेयं किंत्वंशेनेत्याह—भागमिति । चित्प्रतिबिम्बके उपाधिस्थत्वलक्षणाभासविशिष्टे चैतन्ये भागमाभासांशं मृषा अवेहीत्यनुषङ्गः । तर्हि किं बिम्बमप्यंशेनैवोपादेयं न किन्तु सर्वात्मनेत्याह—बिम्बं पुनरिति । उपाधिद्वयतत्स्थत्वलक्षणाभासद्वयानन्वितं चैतन्यमित्यर्थः । अशेषं सर्वात्मना सत्यमवेहीत्यनुषङ्गः । तथा च पदद्वयलक्ष्यमपि चिन्मात्रमितिसिद्धम् ॥ २७९ ॥

तदेतदुपाध्यादिचातुर्विध्यं नोत्प्रेक्षामात्रकल्पितं किन्तु लोकसिद्धमेवेति विवक्षन् लोकप्रसिद्धमुदाहरणमाह—

अप्पात्रमप्पात्रगतत्वमेव
मप्पात्रगोऽप्पात्रगताद्बहिश्च ।
दिवाकरो दिव्यवतिष्ठमानो
न शक्यतेऽपोहितुमिद्धतेजाः ॥ २८० ॥

अप्पात्रमिति । जलपात्रमित्यर्थः । अनेनोपाधिनिर्देशः । अप्पात्रगतत्वमित्याभासनिर्देशः । अप्पात्रग इति प्रतिबिम्बनिर्देशः । अप्पात्रगतत्वेन प्रतीयमानः अप्पात्रगतात् बहिरित्यादिना बिम्बनिर्देशः ॥ २८० ॥

तथा च यथोपाधितत्स्थत्वतदन्वितव्यतिरेकेण केवलं सूर्यबिम्बमस्ति न तु नेति शक्यं वक्तुं तद्वदुपाधितत्स्थत्वतदन्वितचैतन्यव्यतिरेकेण तदनन्वितं केवलचैतन्यं बिम्बमस्त्येव न निराकर्तुं शक्यमिति दार्ष्टान्तिकमाह—

पुरं पुरःस्थत्वमथो पुरःस्थं
पुराद्बहिः शुद्धमवस्थितं च ।
तथा परं ब्रह्म सुसूक्ष्मयाऽपि
धिया निराकर्त्तुमशक्यमेव ॥ २८१ ॥

पुरमिति । अज्ञानान्तः करणलक्षणम् ॥ २८१ ॥

एवं प्रसङ्गागतं विचारं परिसमाप्य प्रकृतं न स्थानत इति सूत्रसिद्धं ब्रह्मणो निर्विशेषत्वं सिद्धमित्युपसंहरति —

न स्थानतोऽप्यस्ति परस्य तस्मा-
द्विशेषयोगः परमार्थरूपः ।

स्वतः पुनर्दूरनिरस्तमेव
परस्य तत्त्वस्य विशेषवत्त्वम् ॥ २८२ ॥

न स्थानत इति । तस्मादित्यादौ योजनीयमीश्वरत्वकारणत्वादे-राविद्यकत्वं तच्छब्दार्थः । उक्तार्थः श्लोकः ॥ २८२ ॥

सर्वासामपि श्रुतीनां निर्विशेषब्रह्मपरत्वावगमात् निर्विशेषमेव ब्रह्म प्रतिपत्तव्यमिति"अरूपवदेव हि तत्प्रधानत्वादि"तिसूत्रसूचितां युक्तिं प्रपञ्चयति ।

श्रुतेश्च तात्पर्यमखण्डरूपे
परे पुरस्तादुपपादितं च ।
ततोऽपि तस्याद्वयरूपतोऽन्य-
द्रूपान्तरं कल्पयितुं न शक्यम् ॥ २८३ ॥

श्रुतेश्चेति । तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमित्यादिश्रुतेः परे परात्मनि पुरस्तात् प्रथमाध्याये ततः निर्विशेषब्रह्मणि वेदान्ततात्पर्यवर्णनात् अपि शब्दात्"न स्थानत" इति सूत्रोक्तयुक्तेश्चेत्यर्थः । तस्य परस्य ॥ २८३ ॥

ननु सविशेषश्रुतीनामपि सत्त्वात् कथमखण्डब्रह्मसिद्धि-रित्याशङ्क्य तासामर्थवादत्वेनान्यपरत्वान्मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति निषिध्यमाननिष्प्रयोजनसविशेषपरत्वानुपपत्तेश्च न निर्विशेषब्रह्मसिद्धिविघातकत्वमिति पूर्वोक्तमपि न्यायान्तरं वक्तुमाह—

भेदश्रुतिस्त्वन्यपरा समस्ता
समस्तवेदेषु न तत्पराऽसौ ।

अतत्परा तत्परवेदवाक्यै-
र्विरुध्यमाना गुणवाद एव ॥ २८४ ॥

भेदश्रुतिरिति । ऐश्वर्यादिविशेषश्रुतिः अन्यपरा विद्याप्रशंसापरा लोकसिद्धं विशेषानुवादेनाज्ञातनिर्विशेषब्रह्मप्रतिपादनपरा वा तत्परा भेदपरा असौ भेदश्रुतिः । ननु देवताधिकरणन्यायेन भेदश्रुतीनामपि प्रतीयमानार्थपरत्वं किन्न स्यात् । न तत्परनिर्विशेषप्रतिपादकवेद-वाक्यविरोधादतो गुणवादत्वमेव युक्तमित्याह— अतत्परेति । गुण-वादः—अविद्यमानार्थवादः ॥ २८४ ॥

ननु सविशेषवाक्यविरोधान्निर्विशेषवाक्यमेव गुणवादः किं न स्यादित्याशङ्क्य निर्विशेषवाक्यस्य फलवदज्ञातार्थज्ञापकत्वादनेक-विधन्यायानुगृहीतत्वाच्च विधित्वाद्विधिविरोधेऽर्थवादस्यैव गुणे त्व-न्याय्यकल्पनेति न्यायेनान्यार्थौचित्यान्न विधिबाधकत्वमित्याह—

न ह्यर्थवादा विधिभिर्विरुद्धा
विध्यर्थसंकोचकरा भवन्ति ।
किंतु प्रधानानुगुणं यदेषा-
मालम्बनं तत्खलु कल्पनीयम् ॥ २८५ ॥

न ह्यर्थवादा इति । विध्यर्थसंकोचकराः विध्यर्थबाधकाः तर्हि किं निरालम्बनत्वमेव तेषां प्रधानानुगुण्येन कथं चित्सालम्बनत्वं कल्प-नीयमित्याह—किन्त्वित्यादिना । एषां सविशेषश्रुतीनामालम्बनं विषयः अर्थवादानां यस्मिन्नर्थे परिगृहीते प्रधानानुगुण्यं भवति तत्परत्व-मेव कल्पयितुमुचितमित्यर्थः ॥ २८५ ॥

प्रधानविरोधे गुणस्यान्यार्थत्वमेव न तु प्रधानसंकोचकरत्वमित्येतत्पूर्वतन्त्रेपि सिद्धमित्याह—

यथा ह्यजक्षीरविधेः समीपे
यज्ञर्तिलादेः परिकीर्त्तनं तत् ।
प्रधानसंकोचभयादपास्य
स्वमर्थमासीद् गुणवाद एव ॥ २८६ ॥

यथेति । अजक्षीरविधेरजक्षीरेण जुहोतीत्यस्य विधेः समीपे प्रकरणे जर्तिलादेः जर्तिलमित्यारण्यतिलनाम आदिपदेन गवीधुकस्य ग्रहणं तदुभयस्य यत्-परिकीर्त्यतेऽनेनेति परिकीर्त्तनं जर्तिलयवाग्वा वा गवीधुकयवाग्वा वा जुहुयादित्यादिजर्तिलादिवाचकवाक्यमित्यर्थः । तत्परिकीर्त्तनं प्रधानसंकोचत्वभयात् प्रधानस्य प्रकरणिनोऽजक्षीरहोमस्य बाधभयात् स्वमर्थमपास्य जर्तिलादिहोमरूपमर्थं विहाय गुणवादः अजक्षीरहोमस्तुतिपर एवासीदित्यर्थः । ॥ २८६ ॥

अजक्षीरेण जुहोतीत्यस्मिन् प्रकरणे जर्तिलयवाग्वा वा गवीधुकयवाग्वा वा जुहुयादिति श्रूयते तत्र जर्तिलादिवाक्यस्यापि स्वार्थविधायकत्वे जर्तिलयवाग्वादेरपि होमद्रव्यत्वाश्रयणेनोत्पत्तिविशिष्टस्याजक्षीरस्य विकल्पप्राप्त्या पाक्षिकबाधो भवेत् । न च तद्युज्यते । तस्य प्रकरणित्वात् जर्तिलादिहोमस्यानाहुतित्वेन निन्दितत्वेनाप्रकरणित्वात् । तथा च यथा प्रधानबाधभयात् जर्तिलादिवाक्यानां गुणवादेन अजक्षीरहोमस्तावकत्वमाश्रितं तद्वत्सविशेषवाक्यानामपि निर्विशेषवाक्यविरुद्धानां गुणवादेन स्तावकत्वमेव युक्तमित्याह —

एवं सतीहापि विरुध्यमानं
वचो यदद्वैतपरैर्वचोभिः।
तदस्तु गौणं यदि वा परस्य
मायाप्रसूतद्वयवादिमुख्यम् ॥ २८७॥

एवं सतीति। प्रधानविरोधे गुणस्यान्यार्थत्वे सतीत्यर्थः। इह-वेदान्तेपि। अद्वैतपरैरस्थूलादिवचोभिर्विरुध्यमानं यद्वचः सविशेषश्रुतिः तद्गौणं गुणवाद एवास्तु। अथवा—सविशेषवाक्यमपि मायामयसविशेषपरं भवतु। न चैतावता प्रधाननिर्विशेषवाक्यविरोधः। तस्य वस्तुतो निर्विशेषपरत्वेनाविरोधात्। न च कल्पितार्थविषयत्वे वेदस्याप्रामाण्यमिति शङ्क्यं व्यवहारसमर्थार्थत्वेन प्रमेयबाधाभावात्। न च तत्र तस्य प्रयोजनाभावः। निषेध्यसमर्पकतया निर्विशेषैकवाक्यत्वेन कथंचित् फलवत्त्वात्। तथा च वाक्ये द्वयस्यापि मुख्यार्थत्वे संभवति अन्यतरस्य गौणार्थत्वकल्पनमयुक्तमित्यभिप्रेत्याह— यदि वेति। वच इत्यनुषङ्गः। परस्य ब्रह्मणो मायाप्रसूतद्वयवादिमायाजन्यविशेषपरं सत् मुख्यं मुख्यार्थमस्त्वित्यर्थः ॥ २८७ ॥

ननु भेदश्रुतेः स्वार्थपरत्वमिष्यते चेत्तर्हि तदर्थस्य वास्तवत्वमङ्गीक्रियतामिति चेत् सविशेषश्रुतीनां मायिकार्थपरत्वेनैव मुख्यार्थत्वं वक्तव्यम्। अन्यथा निर्विशेषश्रुतिराशीनां विना निमित्तं तत्पराणां भङ्गः स्यादित्याह—

भेदश्रुतिः कल्पितमेव भेद-
मालम्ब्य मुख्यार्थवती भवित्री।
अतत्परा तत्परवाक्यभङ्ग-
स्त्वितोऽन्यथा याति विना निमित्तम् ॥२८८॥

भेदश्रुतिरिति । भवित्री भवितुं योग्या, इतोऽन्यथा वास्तवार्थपरत्वे इत्यर्थः । अतत्परादर्थवादरूपात्-भेदवाक्यात् तत्परवाक्यभङ्गं निर्विशेष-ब्रह्मपरवाक्यभङ्गं निमित्तं विना बलवद्बाधकं विना याति प्राप्नोति निर्विशेषश्रुतिराशिरिति शेषः । भङ्ग इति पाठे आयातीति च्छेदः । ननु निष्प्रपञ्चश्रुतिरप्युपासनापरा किं न स्यादिति चेन्न तथात्वे पौनःपुन्येन प्रपञ्चनिषेधवैयर्थ्यादारोपेणापि तदुपपत्तेः । अभ्यासे हि भूयस्त्वमर्थस्येति न्यायेन निष्प्रपञ्चवाक्यस्य फलवत्स्वार्थपरत्व-मेवेति न तदन्यपरमिति ॥ २८८ ॥

ननु भेदश्रुतीनामर्थवादत्वेन तत्परत्वाभावेऽप्युपासनावाक्यानां विधित्वेनार्थवादत्वाभावात् पुरुषार्थपरत्वाच्च तत्र श्रुतं सर्वगन्धादि-विशेषरूपं वस्तु सदेवेत्याशङ्क्याह —

यदपि किंचिदुपासननिष्ठिता-
द्वचनतः प्रतिभाति परात्मनः ।
सकलगन्धरसादिमयं वपु-
स्तदपि कल्पितभेदसमाश्रयम् ॥ २८९ ॥

यदपीति । उपासननिष्ठितादुपासनविषयात् वचनतः सर्वकर्मा सर्वकाम इत्यादिवाक्यात्परमात्मनस्तदपि किंचिद्वपुः स्वरूपं प्रति-भातीति सम्बन्धः । यच्छब्दार्थमाह सकलेति । सकलगन्धमयं सकल-रसमयम्, आदिपदेन सकलकर्मादिमयं चेत्यर्थः । तदपि तादृशं वपुरपि कल्पितभेदसमाश्रयं न तु वस्तुसदित्यर्थः । निरवयवस्य सकलगन्धा-दिपरिणामानुपपत्तेरित्यर्थः । ॥ २८९ ॥

हेत्वन्तरमाह—

न खलु निर्गुणवस्तुपरं वचः
सगुणवाक्यविरोधनिमित्ततः ।
स्वविषयादपसारयितुं बला-
दतिबलिष्ठपदान्वयमिष्यते ॥ २९० ॥

न खल्विति । बलाद्बाधकं विनेत्यर्थः । अतिबलिष्ठपदान्वयम्-अतिबलिष्ठ तात्पर्यग्राहकानेकलिङ्गोपोद्बलितः पदान्वयो यस्य वस्तुपरवचसः तत्तथोक्तं सर्वगन्धादेर्वस्तुसत्त्वे हि परमपुरुषार्थनिर्गुणवाक्यार्थबाधः स्यात् । न च तद्युज्यते । तस्य तात्पर्यग्राहकानेकलिङ्गोपोद्बलितत्वेन प्रबलत्वादितरस्य तद्विहीनत्वेन दुर्बलत्वादारोपितविशेषैरुपासनोपपत्तेस्तत्त्वप्रमितेस्तथाभावायोगाच्चेत्यर्थः । विना निमित्तं-बाधानुपपतेः ॥ २९० ॥

तस्मान्निर्गुणश्रुतिवचोभिः सिद्धनिर्विशेषमेव ब्रह्मस्वरूपं वास्तवमितिशोधिततत्पदार्थं दर्शयति—

तस्मात्तत्परवेदवाक्यगतिभिर्न्यायेन चाऽऽत्मप्रभं
सर्वद्वैतविवर्जितं विगलितध्वान्तं शिवं शाश्वतम् ।
प्रत्यग्रूपमरूपगन्धरसकं तच्छब्दवाच्यस्थितं
वाक्यार्थान्वयि लक्षितं भगवतो विष्णोः पदं गृह्यताम्
॥ २९१ ॥

तस्मादिति । सर्वश्रुतीनान्निर्विशेषब्रह्मपरत्वं दृग्दृश्ययोर्धर्मधर्मिभावानुपपत्तिश्च तच्छब्दार्थः । वाक्यगतिः-वाक्यव्यापारः, उपक्रमादिलिङ्गैर्वेदान्तवाक्यतात्पर्यपर्यालोचनयेत्यर्थः । न्यायेनौपाधिक-

स्योपाधेश्च मिथ्यात्वसाधनायोक्तन्यायेन प्रधानविरोधादिन्याय-विरोधेन चेत्यर्थः। आत्मप्रभं स्वप्रकाशं तच्छब्दवाच्यस्थितं तच्छब्दवाच्येऽज्ञानतत्स्थत्वलक्षणाभासविशिष्टप्रतिबिम्बचैतन्येऽधिष्ठानत्वेनानुस्यूतमिति ब्रह्मस्वरूपलक्षणायाः सम्बन्धो दर्शितः। तत एव लक्षितं लक्षणावृत्त्या प्रतिपादितम् ॥ २६१ ॥

एवं शोधिते तत्पदलक्ष्ये प्रमाणत्वेन श्रुतिमुदाहरति—

अशब्दमस्पर्शमरूपमव्ययं
तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
निचायनीयं पदमीदृशं हरेः ॥ २६२ ॥

अशब्दमिति। महतः महतत्त्वात् परमव्यक्तं व्यावर्त्तयति—ध्रुवमिति। निचायनीयं ज्ञातव्यम् ॥ २६२ ॥

श्रुत्यन्तरमप्याह—

भोक्ता भोग्यं प्रेरितारं च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्म मे तत् ।
जीवेशानौ सृज्यमानं जगच्च
शुद्धं ब्रह्मेत्याह वेदान्तवाक्यम् ॥ २६३ ॥

भोक्तेति। श्रुत्यर्थमाह—जीवेशानाविति। जीवेशानजगद्रूपेण त्रिविधोऽपि प्रपञ्चः शुद्धब्रह्मात्मक एव न तु पृथक् सन् तथा च ब्रह्मैव परमार्थस्वरूपमित्यर्थः ॥ २६३ ॥

एवं पदार्थद्वये शोधिते शोधितपदार्थातिरिक्तवाक्यार्थाभावात् तावतैव कृतार्थतेति बुद्ध्या शिष्ये तूष्णींभावमुपेयिषि परमकृपालुराचार्यः यद्यपि शोधितपदार्थान्न वाक्यार्थोतिरिच्यते तथापि न पदार्थज्ञानमात्रेण कृतार्थता तस्य परोक्षत्वेन प्रमाणाजन्यत्वेन चाविद्यानिवर्त्तकत्वायोगादतो वाक्यार्थप्रतिपत्त्यापि भवितव्यमिति स्वयमेवाह—

पदार्थबोधेन कृतार्थता न ते
मतिः परोक्षा हि पदार्थगोचरा ।
अतो महावाक्यनिबन्धनैव धी-
रबोधविच्छेदकरी भविष्यति ॥ २६४ ॥

पदार्थेति । कृतार्थता प्राप्तपुमर्थता नास्ति । तत्र हेतुः—मतिरिति । पदार्थगोचरमतेः पारोक्ष्यं तर्कादिनोत्पद्यमानत्वात् । फलितमाह— तत इति । यतः पदार्थगोचरमतेः परोक्षत्वेन पुमर्थसाधनत्वाभावः ततो महावाक्यनिबन्धना तत्त्वमादिवाक्यजन्यैव धीः अखण्डसाक्षात्कारः अबोधच्छेदकरी अज्ञानस्य विशेषेण छेदकरी निरन्वयनाशकरीत्यर्थः । तदुक्तं "तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः । अविद्या सहकार्येण नासीदस्ति भविष्यती"ति । ननु सत्यादिवाक्येनापि परिपूर्णब्रह्मप्रमितिजननात्तस्य च तत्त्वमादिवाक्यात्पूर्वमेव स्वार्थबोधकत्वात् किं तत्त्वमादिवाक्येनेति चेन्न । प्रत्यग्ब्रह्मैक्यापरिज्ञानविलसितानर्थस्य तदाकारप्रमितिं विना निवृत्त्ययोगात्सत्यादिवाक्यस्य च ब्रह्मप्रमितिजनकत्वेपि प्रत्यग्ब्रह्मैक्याकारप्रमितिजनकत्वाभावात् तत्त्वमादेश्च तदाकारप्रमितिजनकत्वान्न वैयर्थ्यम् । अत एव तस्यैव महावाक्यत्वं फलवत्प्रमितिजनकस्यैव महावाक्यत्वात् । नचैवं सत्यादिवाक्यस्य वैयर्थ्यमेव पदार्थशोधनद्वारोपयोगादिति भावः ॥ २६४ ॥

ननु तत्त्वमसिवाक्यस्यापि न फलवत्प्रमितिजनकत्वं तथात्वे तद्वाक्यं शृण्वतां स्त्रीशूद्रादीनामपि तदुत्पादप्रसङ्गात्। अयमात्मा ब्रह्मेत्यादिवाक्यान्तरस्यापि सत्त्वे तस्य प्रमितिजनकत्वायोगाच्च। न ह्येकस्मिन्नर्थेऽनेकवाक्यजन्यज्ञानं प्रमितिर्भवति किंत्वनुवाद एव। नचैकस्य तत्त्वमसिवाक्यमपरस्य चापरं प्रमितिजनकमिति शक्यं वक्तुं विशेषे प्रमाणाभावात् तत्सद्भावेऽपि श्रुतवाक्यानामपि बहूनां यथापूर्वं संसारोपलब्धेश्चेत्याशङ्क्याह—

स्वाध्यायधर्मपठितं निजवेदशाखा-
वेदान्तभूमिगतमादरपालितं च।
संन्यासिना परदृशा गुरुणोपदिष्टं
साक्षान्महावचनमेव विमुक्तिहेतुः॥ २९५॥

स्वाध्यायेति। उपनयनगुरुशुश्रूषासमिदाधानादिस्वाध्यायाध्ययनानुकूलो धर्मः स्वाध्यायधर्मस्तेन पठितमधीतं चोपनयनगुरुशुश्रूषादिपूर्वमधीतवाक्यमेव फलवत्प्रमितिं जनयति न श्रूयमाणमात्रं स्त्रीशूद्रयोश्चोपनयनाद्यभावात् "प्रणवं सावित्रीं यजुर्लक्ष्मीं स्त्रीशूद्राय नेच्छन्ति" स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा" इति निषेधाच्च। न विहिताध्ययनमस्तीति न तत्त्वमसिवाक्यश्रवणेन विद्योत्पत्तिरिति भावः। यदुक्तं पुरुषभेदेन तत्त्वमादिवाक्यं फलवत्प्रमितिं जनयतीत्यत्र प्रमाणाभाव इति तदसत् स्वस्वशाखागतत्वस्यैव नियामकत्वादित्याह—निजवेदशाखावेदान्तभूमिगतमिति। उचितं चैतत्तस्यैव प्रथमं पठ्यमानत्वेन प्रमितिजनकत्वात्। यदुक्तं श्रुतवाक्यानामपि यथापूर्वं संसारोपलब्धिरिति न वाक्यं फलवत्प्रमितिजनकमिति तदसत् विवेकादिहीनस्याश्रद्धादिना सकृत्पठितवाक्यात्तदसंभवेऽपि विवेकादिसाधनचतुष्टयवतः परमहंसपरिव्राजकस्य श्रद्धादिपूर्वमसकृदभ्य-

स्तवाक्यात्तदुत्पत्त्युपपत्तेरित्याह—आदरपालितं च सन्यासिन इति । आदर-पालितं श्रद्धयाभ्यस्तं संन्यासिन इति साधनचतुष्टयसंपन्नाधिकार्युपलक्षणम्। एवं करार्पितस्फटिकवत् साक्षाद्ब्रह्मानुभववता युक्तिकुशलेन गुरुणोपदिष्टमेव वाक्यं फलवत्प्रमितिसाधनं श्रोत्रियं ब्रह्मनिष्ठमिति गुरुविशेषणश्रवणात् न तु शास्त्रपाठादिना ब्रह्मविद्वन्मन्यमानेनोपदिष्टमित्यभिप्रेत्याह—परदृशा गुरुणोपादिष्टमिति । परदृशा ब्रह्मात्मापरोक्षज्ञानिना, महावचन तत्वमादिमहावाक्यमेव विमुक्तिहेतुः विमुक्तिसाधनज्ञानहेतुः न तु पदार्थप्रतिपादकसत्यादिपदमात्रमित्यर्थः ॥२६५॥

महावाक्यादेव मुक्तिसाधनतत्त्वावगतिरित्यत्र प्रमाणमाह —

नावेदविद्धि मनुते पुरुषं बृहन्त-
मित्याह वेदवचनं कथमन्यथैतत् ।
वाक्यान्तरं च कथमाह पुमांसमेनं
साटोपमौपनिषदत्वविशेषणेन ॥ २६६ ॥

नावेदविदिति । वेदस्तत्त्वमादिवाक्यं, मनुते जानाति बृहन्तं त्रिविधपरिच्छेदशून्यं, नावेदविन्मनुते तं बृहन्तमिति वाक्यं महावाक्यात्मकवेदविद्वान् ब्रह्म न जानातीति दर्शयत् तस्यैव ब्रह्मप्रमितिसाधनत्वमाह। एतच्च पदार्थज्ञानमात्रस्यैव पुरुषार्थसाधनत्वेनोपपद्यते। तदिदमुक्तम्—कथमन्यथैतदिति । एतद्वचनमन्यथा महावाक्यं विनापि फलवत्प्रमितिसंभवे कथमुपपद्यतेत्यर्थः। वाक्यान्तरमप्यत्र प्रमाणमित्याह—वाक्यान्तरं चेति । तत्त्वौपनिषदमिति वाक्यं साटोपं ससंभ्रमं तत्त्वौपनिषदमित्यादिवाक्यमपि ब्रह्मात्मनो महावाक्यैकगम्यत्वे मानम्। अन्यथा कथं तद्वाक्यमौपनिषदत्वविशेषणेनैनं पुरुषं ब्रूयादित्यर्थः ॥ २६६ ॥

ननु वेदशब्दः सर्वस्मिन्वेदे वर्त्तते उपनिषच्छब्दोऽप्युपनिषन्मात्रे वर्तते तत्कथं महावाक्यस्य फलवज्ज्ञानसाधनत्वे इदं प्रमाणमित्याशङ्क्याह—

उपनिषदिति वेद इत्यपीदं

समभिवदन्ति महावचो महान्तः।

फलवदवगतिः स्यादन्तरेणैतदेकं

वचनमिति न शक्यं वक्तुमित्यादरोऽस्मिन् ॥ २६७ ॥

उपनिषदितीति। महान्तः इदं महावच एव उपनिषदित्यपि वेद इत्यपि समभिवदन्ति। तथा च महावाक्यस्यैवोपनिषद्वेदशब्दत्वात् नोक्तदोष इत्यर्थः। ननु महतां वा वेदोपनिषच्छब्दयोर्महावाक्ये प्रयोगे कोऽयमाग्रहः तत्रैव तयोरवयवपदार्थस्य परिपूर्णत्वादित्याह— फलवदवगतिरिति। एतदेकवचनं महावाक्यमन्तरेण फलवती अवगतिः स्यादिति वक्तुं न शक्यमिति। अस्मिन्महावाक्ये आदरो महतां वेदोपनिषच्छब्दप्रयोग इति शेषः—एतदुक्तं भवति। फलवद्वित्तिसाधनं हि वेदशब्देन वेदयतीति व्युत्पत्त्यैवोच्यते। फलवज्ज्ञानस्यैव वेदनत्वात् तादृशवित्तिसाधनत्वं च महावाक्यस्यैवास्ति न त्वन्यस्य। एतदसन्निधावेव कर्मवाक्यानां फलवद्वित्तिजनकत्वभ्रान्तेः। एवमुपनिषच्छब्दोऽप्युपनिषीदतीति अतिसमीपप्रत्यग्ब्रह्मैक्यप्राप्त्या सकलानर्थनिदानं नाशयतीति व्युत्पत्त्या महावाक्य एव वर्त्तते। तस्यैवातिसमीपप्रत्यग्ब्रह्मैक्यप्रापकविद्याद्वारानिखिलानर्थविनाशकत्वादतस्तस्यैवोपनिषद्वेदशब्दवाच्यत्वं महान्तो मन्यन्त इति ॥ २६७ ॥

तथा च महावाक्ये एव वेदोपनिषच्छब्दो वर्त्तते इति फलितमाह –

उपनिषदिति शब्दो वेदशब्दश्च तस्मा-
च्छ्रुतिशिरसि निविष्टो योज्यतामत्र वाक्ये ।
अपरमखिलमस्यैवाङ्गभूतत्वहेतो-
रिह समभिनिविष्टं तद्गिरो वाच्यमासीत् ॥ २६८ ॥

उपनिषदिति । महावाक्य एव तदर्थसद्भावस्तच्छब्दार्थः । अत्र वाक्ये तत्त्वमादिमहावाक्ये तर्हि कथं महावाक्यव्यतिरिक्तेषु वाक्येषु उपनिषदादिशब्दप्रयोगः उपचारादित्याह— अपरमिति । इह महावाक्यसन्निधौ समभिनिविष्टं समभिव्याहृतमपरं महावाक्यव्यतिरिक्तमखिलं सत्यादिवाक्यमस्य तत्त्वमादिमहावाक्यस्याङ्गभूतत्वहेतोर्महावाक्यार्थज्ञानोपयुक्तपदार्थशोधनेन तच्छेषत्वाद्धेतोरेव तद्गिरः वेदोपनिषच्छब्दस्य वाच्यमासीत्—प्रतिपाद्यमासीदित्यर्थः ॥ २६८ ॥

तत्त्वमस्यादिवाक्यमेव मुख्यो वेदोपनिषच्छब्दार्थः तदतिरिक्तं तु तच्छेषत्वेन तदर्थ इत्यत्र श्रौतं लिङ्गमाह—

पित्रा तत्त्वमसीति बोधनमनु स्पष्टं विजज्ञाविति
च्छान्दोग्ये यदवोचदेतदिह नो लिङ्गं भवेज्ज्ञापकम् ।
सर्वत्रैव महागिरामुपनिषच्छब्दो भवेद्ग्राहको
वेदश्चायमतोऽन्यदस्य निकटे तेनात्र वेदादिगीः ॥ २६९ ॥

पित्रेति । पित्रा-उद्दालकनाम्ना तत्त्वमसीति बोधनमनु तत्त्वमसीतिमहावाक्योपदेशं लक्ष्यीकृत्य तदनन्तरमित्यर्थः । विजज्ञौ ब्रह्मात्मतां ज्ञातवानित्यर्थः । एतद्वचनमिहास्मिन्नर्थे लिङ्गमित्यस्य व्याख्या ज्ञापकमिति । इह शब्दार्थमाह— सर्वत्रैवेति । महागिरां महावाक्यानां

ग्राहकः-वाचकः, अयं वेदः वेदशब्दश्च ग्राहक इत्यनुषङ्गः। अतो महावाक्यादन्यदस्य महावाक्यस्य निकटमेकवाक्यतापन्नं तेन येन निकटं तेनात्र महावाक्यातिरिक्ते वेदादिगीरित्यस्मिन्नर्थे लिङ्गमित्यर्थः। छान्दोग्ये हि पित्रोद्दालकेन "तत्त्वमसि श्वेतकेतो" इत्युपदिष्टे सत्यनन्तरमेव "तद्धास्य विजज्ञावि"ति श्रूयते। इदं च महावाक्यस्यैवाविद्यानिवृत्तिफलवत्प्रमितिजनकत्वेनोपनिषदादिशब्द वाच्यत्वं युज्यते। तस्मादुत्पन्नात्मज्ञानमेव लक्ष्यीकृत्य हेत्याश्चर्या-वमर्शपूर्वं तत्प्रवृत्तेः। अतस्तत्रैव वेदादिशब्दो मुख्यः अन्यत्र तु तच्छेषत्वेनैव तत्प्रवृत्तिरित्यर्थः॥ २९९॥

ननु महावाक्येप्युपनिषच्छब्दो न मुख्यः यतो ब्रह्मविद्यैव प्रत्यग्ब्रह्मैक्यविषयत्वेनाविद्यां निवर्त्तयन्ती उपनिषत्। तदुक्तं सुरेश्वराचार्यैः। "अत्र चोपनिषच्छब्दो ब्रह्मविद्यैकगोचरः। तत्रैव चास्य सद्भावादभिधार्थस्य तत्कुतः॥ उपनीयेममात्मानं ब्रह्मापास्तद्वयं यतः। निहन्त्यविद्यां तज्जं च तस्मादुपनिषद्भवेदि"ति चेत्सत्यम्। तत्कारणत्वेन तन्निकटत्वादुपचारात्तत्रापि मुख्य इत्युच्यते इत्युप-निषच्छब्दस्य मुख्यार्थकथनपूर्वकमाह—

उपनिषद्वचसा परमात्मधीः
सहजशक्तिवशेन निगद्यते।
तदुपचर्य महागिरि वर्तते
निकटभावमपेक्ष्य तु मुख्यगीः॥ ३००॥

उपनिषद्वचसेति। सहजशक्तिवशेन रूढ्यावयवशक्तया चेत्यर्थः। महागिरि महावाक्ये वर्त्तत उपनिषद्वच इत्यर्थः। निकटभावं निकटत्वं च कारणत्वेन॥ ३००॥

तर्ह्यन्यत्राप्युपनिषदादिशब्दस्य मुख्यत्वं किन्न स्यादिति चेन्न-निकटत्वाविशेषेऽपि साक्षाद्विद्याकारणत्वेनातिनिकटत्वादितरस्य तु तदेकवाक्यतापन्नत्वेनैव तत्कारणत्वान्नैतादृशमपि मुख्यत्वमित्याह-

उपनिषद्वचनाऽभिहिताऽऽत्मधी-
र्निकटवर्त्तिमहागिरि मुख्यवत् ।
उपनिषद्वचनं तदवान्तरे
वचसि गौणवदत्र विवक्ष्यते ॥ ३०१ ॥

उपनिषद्वचननेति । उपनिषद्वचनेनाभिहिता याऽऽत्मधीः तस्या निकटवर्तिनी या महागीः तस्यामुपनिषद्वचनं मुख्यवद्विवक्ष्यते । अवान्तरे वचसि तद्-उपनिषद्वचनं गौणवन्मुख्यार्थगुणयोगाभावात्, न वस्तुतो गौणः मुख्यार्थत्वाभिमतमहावाक्यगतवाक्यत्वादिगुणयोगा-द्गौणवद्विवक्ष्यत इत्यर्थः ॥ ३०१ ॥

वेदत्वं पुनर्महावाक्यस्य मुख्यमेव महावाक्यादेव श्वेतकेतो-र्विद्योत्पत्तिश्रवणादित्याह—

यतो महावाक्यत एव पुत्रो
विजज्ञिवानस्य पितुः सकाशात् ।
इति श्रुतं तेन स एव वेद-
स्तथा च सैवोपनिषच्च सिद्धा ॥ ३०२ ॥

यत इति । विजज्ञिवान् ज्ञातवान् । अस्योद्दालकनाम्नः स इति विधेयापेक्षया पुंलिङ्गनिर्देशः । तथा च महावाक्ये वेदशब्दस्य

मुख्यत्वादुपनिषच्छब्दोऽपि तत्र मुख्य इत्याह—तथाचेति । सा स्त्री-लिङ्गनिर्देशः पूर्ववत् ॥ ३०२ ॥

तथा च महावाक्यादेव मुक्तिफलात्तत्त्वावगतिर्नान्यस्मादिति फलितमुपसंहरति—

विना महावाक्यमतो न कश्चि-
त्पुमांसमद्वैतमवैति जन्तुः ।
ततः पदार्थावगमान्न मुक्ति-
र्घटिष्यते तस्य परोक्षभावात् ॥ ३०३ ॥

विनेति । ततः यतो महावाक्यस्यैव वेदत्वमुपनिषत्त्वं च वेदादेवात्मज्ञानं संभवति नान्यस्मादत इत्यर्थः । तथा च पदार्थ-बोधमात्रान्न कृतार्थतेत्युक्तमपि सिद्धमिति परमप्रकृतमुपसंहरति ततः पदार्थेति ॥ ३०३ ॥

तर्हि पदार्थशोधनं व्यर्थं किमर्थं कृतमिति चेन्न—साक्षादुप-योगाभावेपि शोधितपदार्थज्ञानं विना परमपुरुषार्थसाधनवाक्यार्थ-ज्ञानानुत्पादेन परम्परया सार्थकत्वादित्याह—

पदार्थबोधं परिहृत्य वाक्यं
न शक्तमात्मानुभवावसानाम् ।
धियं समानेतुमपेक्षितत्वा-
दतः स यत्नेन निरूपितोऽभूत् ॥ ३०४ ॥

पदार्थबोधमिति । वाक्यं—तत्त्वमादिवाक्यं समानेतुमुत्पादयितुं न शक्तमित्यत्र हेतुः । अपेक्षितत्वादिति । पदार्थबोधस्य वाक्यार्थज्ञानकारण-त्वेनापेक्षितत्वात्सः—पदार्थबोधः ॥ ३०४ ॥

ननु पदार्थशोधने वाक्ये क उपकारो जातः यमपेक्ष्य वाक्यं स्वार्थप्रमितिं जनयेदिति चेन्—वाक्यार्थस्य संभावनाबुद्धिरेवेत्याह-

तच्छब्दादवगतमद्वितीयमासी-
त्प्रत्यक्त्वं समधिगतं त्वमित्यनेन ।
प्रत्यक्त्वं न खलु विना द्वितीयमेवं
नाद्वैतं भवितुमलं विना प्रतीचा ॥ ३०५ ॥

तच्छब्दादिति । तदिति पदेनावगतमासीदिति सम्बन्धः । प्रतीचा प्रत्यक्त्वेन तत्पदेन च ब्रह्मणोऽद्वितीयत्वमात्मनश्च प्रत्यक्त्वमेतच्च पदार्थशोधनेनाद्वितीयत्वादिविरोधिरूपान्तरपरित्यागेन प्रतीचो ब्रह्मत्वे ब्रह्मणश्च प्रत्यक्त्वेऽवगते संभवति प्रतीचः सकाशाद् ब्रह्मणोऽभिन्नत्वे तस्यानवच्छिन्नमहत्त्वलक्षणब्रह्मत्वानुपपत्तेः प्रतीचश्च ब्रह्मणः सकाशाद्भिन्नत्वे सर्वान्तरत्वलक्षणप्रत्यक्त्वानुपपत्तेः । तथा च प्रत्यक्त्वादिपरिज्ञानं विना ऽखण्डैकरसप्रत्यग्ब्रह्मैक्यलक्षणवाक्यार्थज्ञानानुत्पत्तेः । तत्संभावनाहेतुत्वेन पदार्थशोधनस्योपयोग इति भावः ॥ ३०५ ॥

नन्वेवमपि महावाक्यं व्यर्थं पदार्थशोधनात्मकविचाररूपतर्केणैवाद्वितीयत्वादिविरोधिसकलानात्मनिरासेन प्रत्यग्ब्रह्मैक्याकारबुद्धिजननात् अन्यथा वाक्यस्य तत्कृतोपकाराभावप्रसङ्गादित्याशङ्क्य यद्यपि विचारेण तादृशी बुद्धिरुपजायते तथापि तस्या बुद्धेः प्रमाणाजन्यत्वात्संभावनारूपत्वाद्व्याप्त्यादिमापेक्षत्वेन परोक्षत्वाच्च नाविद्यानिवर्त्तकत्वम् । तदुक्तं "सेयमद्वैतबुद्धिर्न तर्कमवतार्य परैरपनेये"ति, श्रुतिश्च "नैषा तर्केण मतिरापनेये"ति अपनेया प्रापणीयेत्यर्थः । अतस्तदर्थं वाक्येनापि भवितव्यमेवेत्यभिप्रेत्याह—

तर्कप्रतीतिसमयेऽपि तदद्वितीयं

प्रत्यक् परिस्फुरति तत्प्रतिबिम्बितं सत् ।

वेदान्तवाक्यजनितात्मधियबुद्धिभूमि-

निष्ठं पुनः स्फुटतरं भवतीति भेदः ॥ ३०६ ॥

तर्कप्रतीतिसमय इति । विचारजन्यप्रत्यग्ब्रह्माकारबुद्धिवृत्तिदशाया-मपि तत्प्रतिबिम्बितं तस्यां तर्कप्रतीतौ प्रतिबिम्बितं सत् तदद्वितीयं प्रत्यक् स्फुरति, वेदान्तवाक्यजनितात्ममतौ—तत्त्वमादिवाक्य-जन्यात्माकारबुद्धिवृत्तौ, निविष्ट—प्रतिबिम्बितं, सदद्वयाभिन्नं प्रत्यक् स्फुटतरमसंदिग्धमपरोक्षं भवतीति भेदः । तयोर्बुद्धिवृत्त्योरिति शेषः ॥ ३०६ ॥

अयं विभागः किन्निमित्त इत्याशङ्क्य शुद्धितारतम्यनिमित्त इति सदृष्टान्तमाह—

अधममध्यमशुद्धिनि दर्पणे

परमशुद्धिनि चाऽऽननमात्मनः ।

तरतमक्रमतः प्रतिभासते

तदिव तत्त्वमिह प्रतिपत्तिषु ॥ ३०७ ॥

अधमेति । अथवा सकृदनुष्ठितविचारानन्तरमेव तत्त्वमादिवाक्या-त्स्फुटतरं तत्त्वप्रतिपत्तिः किं न स्यादित्याशङ्क्य यथा आदर्शस्य कदाचिदिष्टकाचूर्णादिनिघर्षणेनाल्पशुद्धिः पुनरपि निघर्षणे ततोपि शुद्धिरित्येवं शुद्धितारतम्येन मुखादिकं तत्र स्पष्टं स्पष्टतरं च प्रति-फलति एवं सकृदनुष्ठितविचारेण पदार्थशोधने तत्त्वं सम्यङ् न

स्फुरति। किन्त्वसकृदभ्यस्तविचारेण सम्यक् पदार्थशोधने सत्येव तत्त्वं सम्यक् परिस्फुरतीति सदृष्टान्तमाह— अधमेति। तदिव— तद्वत्,प्रतिपत्तिषु–बुद्धिवृत्तिषु, तत्त्वम्–आत्मतत्त्वं, प्रतिभासत इत्यनुषङ्गः ॥३०७॥

नन्वेमपि महावाक्यं व्यर्थं तर्कस्याप्रमाणत्वेप्यनुमानस्य प्रमाणत्वात् तज्जन्यब्रह्माकारबुद्धेर्निश्चयरूपत्वाच्च पुमर्थसिद्ध्युपपत्तेरित्याशङ्क्यानुमानस्य साध्यविशिष्टपक्षगोचरज्ञानजनकतया भेदविषयत्वेनाखण्डाकारबुद्धिवृत्तिजनकत्वाभावात् तां विना चाविद्यानिवृत्त्यनुपपत्तेर्नानुमानादपि कृतार्थतेत्यनुमानलक्षणकथनपूर्वकमाह—

एकदेशमुपलभ्य धर्मिण-
श्चैकदेशमपरं विजानते ।
धर्मिधीव्यवधिकारणादतो-
नानुमा ह्यनुभवाय वस्तुनः ॥ ३०८ ॥

एकदेशमिति। एकदेशं-व्याप्यविशिष्टभागं, धर्मिणः–पक्षस्य,एकदेशं–व्यापकविशिष्टभागं, व्याप्यविशिष्टतया पक्षैकदेशदर्शनाद्व्यापकविशिष्टतया पक्षैकदेशदर्शनमनुमानमिति हि तल्लक्षणम्। तदुक्तं "ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात् एकदेशान्तरे बुद्धिरनुमानमबाधित"मिति। अतो धर्मिधीव्यवधिकारणात्—धर्मिविशिष्टधर्मिधीलक्षणव्यवधानकरणात्, नानुमानं वस्तुनोऽखण्डैकरसस्यानुभवाय समर्थमित्यर्थः। वाक्यं तु लक्षणयाखण्डं च वस्तु बोधयेदिति भावः। तस्मान्न पदार्थशोधनं व्यर्थं न वा तावतैव कृतार्थता किन्तु महावाक्यार्थज्ञानेनैवातो महावाक्येनापि भवितव्यमिति सिद्धम् ॥ ३०८ ॥

एवमुपपादितं पदार्थशोधनमुपसंहृत्य बुभुत्सानुरोधेन वक्तुं शिष्यस्य चोद्यावसरं दर्शयति—

एवं तावत्त्वमर्थौ विशुद्धौ
बोद्धव्यं चेदन्यदप्यस्ति पृच्छ ।
यद्यद्बुद्धं तत्तदादाय तिष्ठे-
र्यच्चाबुद्धं तत्र चाऽऽधत्स्व चेतः ॥ ३०९ ॥

एवं तावदिति । स्वाभाविकबाहिर्मुख्यात् संभवत्यवगतेपि विस्मृतिरिति अविस्मरणे यत्न आस्थेय इत्याह—यद्यद्बुद्धमिति । आदाय मनसि निधायेत्यर्थः । वक्तव्यार्थे च मतिसमाधानं संपादयेत्याह—यच्चेति । अबुद्धं बोधव्यं चेत्यर्थः । आधत्स्व-अवधत्स्व । एवं शिष्यआचार्येण दत्तावसरः पदार्थं ज्ञात्वा वाक्यार्थभूतब्रह्मात्मैक्यं तत्त्वमसीति वाक्यात् साक्षादनुबुभूषुस्तत्स्वरूपनिर्दिधारयिषया पृच्छतीत्याह—बुद्धेति । तदैक्यं तयोस्तत्त्वपदार्थयोरैक्यं वाक्यार्थनिष्ठात् तत्त्वमादेर्वाक्यादक्षसानुभवविषयं कर्तुकाम इति सम्बन्धः । तच्छेषापन्नं तस्य महावाक्यस्य शेषभावापन्नं तस्य शेषभावापन्नवाक्यस्य सत्यादेः यद्यपि तत्पदलक्ष्यमद्वयं ब्रह्मदर्शितं तथापि तस्य स्वरूपं कीदृशमित्याकाङ्क्षायां सत्यज्ञानादिवाक्यात्तन्निर्णयो वक्तव्यः ततस्तत्परिमाणनिर्द्धारणार्थं पृच्छतीत्यर्थः ॥ ३०९ ॥

प्रश्नप्रकारमाह—

अद्याप्यवान्तरवचः परिमाणबोध-
वैकल्यमस्ति मम तेन महावचोऽपि ।
वाक्यार्थबुद्धिमनुभूतिफलावसानां
नोत्पादयत्यहरहः श्रुतमप्यशक्तेः ॥ ३१० ॥

अद्याप्यवान्तरेति । सत्यज्ञानाद्यवान्तरवाक्येयत्ताज्ञानराहित्यं ममास्ति ततः किं तत्राह तेनेति । अवान्तरवाक्येयत्ताबोधवैकल्येन

हेतुना महावाक्यं ह्यवान्तरवाक्येऽवधृतपदार्थस्वरूपैक्यमेव स्वप्रमेयमवबोधयति ततश्चावान्तरवाक्यपरिमाणानवगमे तदर्थस्वरूपनिर्णयायोगात् । अहरहरावर्त्यमानमपि तन्न स्वार्थमनुभावयितुं समर्थमित्याह--अशक्तेरिति ॥ ३१० ॥

अवान्तरवच इत्युक्तमेव विभज्य पृच्छति—

विधिमुखेन परस्य निवेदकं
वचनजातमवान्तरसंज्ञितम् ।
यदपि भेदनिषेधमुखेन त-
त्परिमितिं प्रतिपादय मे प्रभो ॥ ३११ ॥

विधिमुखेनेति । अवान्तरसंज्ञं यद्वचनजातं विधिमुखेन परस्य निवेदकं परब्रह्मस्वरूपप्रतिपादकं सत्यादिवाक्यं यदपि भेदनिषेधमुखेन परस्य निवेदकमस्थूलादिवाक्यं तत्परिमितिं तयोरवान्तरवाक्ययोः परिमाणं प्रतिपादयेत्यर्थः । किं यस्य महावाक्यस्य सन्निधौ यदवान्तरवाक्यं श्रुतं तदर्थमादायैव तस्मान्महावाक्यादर्थः प्रतिपत्तव्यः । किं वा शाखान्तरीयवाक्यमन्यत्रोपसंहृत्य । यद्याद्यस्तर्हि वाक्यार्थोऽव्यवस्थितः स्यात् अवान्तरवाक्यार्थस्य प्रतिशाखं विलक्षणत्वान्न हि शाखाभेदेन वा पुरुषभेदेन वा क्रियावाक्यार्थवत् वस्तुतत्त्वविषयवाक्याऽर्थो व्यवस्थितो भवितुमर्हति । अन्त्ये तु नायं दोषः । उपसंहारप्रकारस्तु न ज्ञायते । किं सर्वेषां वाक्यानामुपसंहारः किं वा प्रयोजनानुरोधेन यस्य कस्यचिदेवेति अतस्तत्परिमितिं प्रतिपादयेति भावः ॥ ३११ ॥

एवं शिष्येण पृष्टः आचार्यः यद्वाक्यं ब्रह्मप्रतिपादकं यस्यां शाखायां न विद्यते अन्यत्र च विद्यते तत्तत्रोपसंहर्तव्यं न तु

सर्वं प्रयोजनाभावादित्यभिप्रेत्य गुणोपसंहारपादप्रतिपाद्यन्यायेनोत्तरमाह—

सकलवेदशिरःसु परात्मधी-
परवचःसु परापरबोधतः ।
अपुनरुक्तपदान्युपसंहर-
न्परिमितिं स्वयमेव तु वेत्स्यति ॥ ३१२ ॥

सकलवेदशिरःस्विति । परापरबोधतः परापरविद्याविभागज्ञानेनेत्यर्थः । प्रथमं परापरविद्याविभागं कृत्वा परविद्यागतेषु वाक्येषु मध्ये अपुनरुक्तपदान्युपसंहरन् स्वयमेव वाक्यपरिमाणं ज्ञास्यसीत्यर्थः ॥३१२॥

ननु श्रुतैरेव पदैर्वाक्यार्थो ब्रह्म प्रतीयतां किं पदान्तरोपसंहारेणेत्याशङ्क्य तथा सति परिपूर्णब्रह्मावगतिर्न स्यात् अतोवश्यमुपसंहारेण भाव्यमित्याह—

अपुनरुक्तपदानि विना यतो
न परिपुष्कलबुद्धिसमुद्भवः ।
अपुनरुक्तपदानि ततस्तत-
स्त्वमुपसंहर तत्त्वबुभुत्सया ॥ ३१३ ॥

अपुनरुक्तेति । ततस्ततः तत्तच्छाखातः । ननु सर्वशाखागतापुनरुक्तपदानामुपसंहारे शाखाया अनन्तत्वात् वाक्येयत्तापरिज्ञानायोगात् वाक्यार्थनिश्चयो न स्यादिति चेन्न नित्यशुद्धादीनां दशानामेव ब्रह्मस्वरूपतया तत्प्रतिपादकवाक्यानामेवोपसंहर्त्तव्यत्वात् अन्येषां च शिवादीनां विशेषणानामेष्वेव यथायथमन्तर्भूत-

त्वादेतद्दृशप्रतिपादकवाक्यानां च कतिपयशाखापर्यालोचनया सुज्ञेयत्वादिति भावः ॥ ३१३ ॥

नन्वपुनरुक्तपदोपसंहारे क्रियमाणे कदाचिदपरविद्यावगत-वाक्यस्यापि प्रमादादुपसंहारः स्यादिति चेन्न—सादृश्यनिबन्धनत्वा-दुपसंहारस्य तस्य च परापरविद्ययोरभावादित्यभिप्रेत्य परापर-विद्याविभागोपि प्रतिपत्तव्य इत्युक्तं स्मारयति —

कुरु परापरवाक्यविवेचनं
तदनुशब्दसमाहरणं कुरु ।
प्रियशिरःप्रभृतीनि च यत्नवा-
नुपचितापचितानि परित्यज ॥ ३१४ ॥

कुरु परेति । परापरविद्याविषयवाक्यविवेचनं तदनु तद्विभाग-प्रतिपत्त्यनन्तरं शब्दसमाहरणं परविद्यागतशब्दोपसंहरणं यत्पुनर्नि-र्गुणवाक्येपि निर्गुणवस्तुप्रतिपादने द्वारतयोक्तमपुनरुक्तपदं तदपि नोपसंहर्त्तव्यं तदर्थस्य वाक्यार्थान्तर्भावादित्याह प्रियशिरः प्रभृतीनीति । तस्य प्रियमेव शिरः मोदो दक्षिणः पक्ष इत्यादिनिर्गुणवाक्ये पठितं कथमेतत् त्याज्यमिति श्रद्धाजाड्यं विहाय परित्यजेत्याह—यत्नवानिति तेषां वाक्यार्थे अनुपयुक्तौ हेतुमाह उपचितेति उपचितापचितत्वं वृद्धिह्रासवत्त्वं विशेषापेक्षमतो निर्गुणे तदसंभव इत्यर्थः ॥ ३१४ ॥

ननु तानि कस्य धर्माः प्रतीयन्तां न तावदात्मन एवोपासनानि कीर्त्यन्त इति वक्तुं शक्यं निर्गुणविद्याप्रकरणस्थत्वादित्याशङ्कयान्न-प्राणमनोविज्ञानानन्दमयलक्षणपञ्चकोशद्वारेण ब्रह्मणः प्रतिपाद्यमान-त्वादानन्दमयकोशस्यैव तानि धर्माः सन्ति ब्रह्मण्यप्युपरज्यन्ते न तु वस्तुतस्तद्धर्माः अतस्त्याज्यान्येव तानीत्याह—

उपचितापचितानि न निर्गुणे
प्रियशिरःप्रभृतीनि कदाचन ।
निपुणधीरपि कश्चन योजये-
दपि तु कोशगुणाः कथिता अमी ॥ ३१५ ॥

उपचितेति । कोशगुणाः आनन्दमयकोशगुणाः तस्य च कोशत्वं कोश इव स्वरूपाच्छादकत्वादमीप्रियशिरस्त्वादयो धर्माः ॥ ३१५ ॥

एवं विधिवाक्यपरिमाणमुक्त्वा निषेधवाक्यपरिमाणमप्युक्तोप-संहरणपूर्वकमाह—

इति वचः परिमाणमुदीरितं
विधिवचःसु निषेधगिरां शृणु ।
बहुनिषेध्यममूष्वपि तेन ता-
स्वपि समाहर पूर्ववदेव तत् ॥ ३१६ ॥

इतिवचः परिमाणमिति । विधिवचस्सु विधिमुखेन बोधकसत्यादि-वाक्येषु विषये वचःपरिमाणमित्यनेन प्रकारेणोदीरितं निषेधगिरा-मस्थूलादिनिषेधवाक्यानां वचःपरिमाणं शृणु । अमूषु निषेधगीर्ष्वपि निषेध्यमानात्मजातं बह्वस्ति तेन निषेध्यानात्मबहुत्वेन हेतुना तासु निषेधगीर्ष्वपि पूर्ववदेव समाहर । अपुनरुक्तपदान्येवोप-संहरेत्यर्थः ॥ ३१६ ॥

पूर्ववदितिपदसूचितमर्थमेव दर्शयति—

अपुनरुक्तनिषेध्यनिषेधकृद्-
बहुपदाहरणं कुरु तास्वपि ।

यदि पुनर्न समाहरणं भवे-
त्परिमितप्रतिषेधनमापतेत् ॥ ३१७ ॥

अपुनरुक्तेति । अपुनरुक्तानि च तानि निषेध्यनिषेधकृन्ति च तानि बहुपदानि यथोक्तानि तास्वपि निषेधगीर्ष्वपि, अनुपसंहारे बाधकमाह—यदिपुनरिति । क्वचित् यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत्रमिति दृश्यादिनिषेधः श्रूयते । क्वचिदशब्दमस्पर्शमरूपमव्ययमिति शब्दादिनिषेधः श्रूयते । क्वचिदस्थूलमनण्वह्रस्वमदीर्घमितिस्थूलादिनिषेधः श्रूयते । तत्र यद्येकत्र श्रुतानां परत्रोपसंहारो न स्यात् तदा कतिपयानात्मवर्गस्यैव प्रतिषेधः स्यात् तथा च नैकान्ततो निष्प्रपञ्चं ब्रह्म भवेदिति भावः ॥ ३१७ ॥

ननु सत्यादिपदैरपि श्रुत्यर्थाभ्यां स्वरूपप्रतिपत्तिरनात्मव्यावृत्तिश्च क्रियते अस्थूलादिपदैश्च तदुभयं क्रियते अतः कथं विधिनिषेधभेद इत्याशङ्क्याह—

विधिवचस्युभयं तु पदे पदे
भवति संग्रहवर्जनरूपकम् ।
स्वकवपुः परिकल्पितरूपयो-
र्न तु निषेधवचःसु तथा मतम् ॥ ३१८ ॥

विधिवचसीति । उभयमित्येतद्विवृणोति । संग्रहवर्जनरूपकमिति । बोधनं व्यावृत्तिश्चेत्यर्थः । कस्य बोधनं कस्य व्यावृत्तिरित्यत्राह—स्वकवपुःपरिकल्पितरूपयोरिति । ब्रह्मस्वरूपस्य सत्यादेर्बोधनं तत्र कल्पितानृतादेर्व्यावृत्तिश्च । विधिवचसि पदे पदे भवतीत्यर्थः । निषेधवचःसु कृत्यद्वयं नास्ति । साक्षान्निषेधस्यैव प्रतिपाद्यमानत्वात् ब्रह्मणश्चा-

नुपपत्तिगम्यत्वाभावादित्यभिप्रेत्याह—न त्विति। तथाविधिवचोवत्॥ ३१८॥

तदेव प्रपञ्चयति—

यदिह किंचिदबोधसमुद्भवं
तदखिलं प्रतिषेधति केवलम्।
न तु किमप्युपगृह्य परे पदे
भगवतो निविशेत निषेधगीः॥ ३१९॥

यदिहेति। इहात्मनि प्रतिषेधयतीत्यन्वयः केवलपदव्यावर्त्यमाह—न तु किमिति। उपगृह्योपादाय पदे स्वरूपे सत्यादिपदवत् निषेधवाक्यं ब्रह्मणि किमपि स्वरूपं नार्पयतीत्यर्थः॥ ३१९॥

तर्हि विधिनिषेधयोरुपसंहारेपि विशेषः स्यादित्याशङ्क्य व्यापार एव विशेषो न तूपसंहारेपीत्याह—

इति विशेष इह प्रतिपादितो
विधिनिषेधगिरोरुभयोरपि।
अपुनरुक्तपदाहरणं पुन-
र्विधिनिषेधवचःस्वविशेषितः॥ ३२०॥

इतीति। अनेन प्रकारेण विशेषः—निजानात्मरूपबोधकनिषेधकत्वमनात्मनिषेधकत्वं चेति विशेषः॥ ३२०॥

अस्ति कश्चिन्निषेधवाक्योपसंहारे विशेषोपीत्याह—

श्रुतिपदैरुपसंहृतिशालिभि-
र्यदवशिष्टनिषेध्यनिषेधनम् ।
तदपि पूर्यमिहाभिमतं श्रुतेः
श्रुतपदान्युपलक्षणमेव हि ॥ ३२१ ॥

श्रुतिपदैरिति । उपसंहृतिशालिभिः उपसंहारयुक्तैः उपसंहृतैरिति यावत् अत्रशिष्टनिषेध्यनिषेधनमवशिष्टमनिषिद्धं यन्निषेध्यं तस्य निषेधनं निषेधप्रतिपादकवचनं पूर्यमध्याहर्तव्यं प्रपञ्चनिषेधसमये यद्यनात्मवस्तुबुद्धावारोहति तच्चेत्तत्र श्रुतेन शाखान्तरहृतेन वा पदेन विशेषतो न प्रतिषिद्धं भवेत् तदा तन्निषेधवचनमपि सामान्यतोऽनात्मनिषेधमहिम्ना विशेषतः कल्प्यं तच्च श्रुतेरभिमतमेवेत्यर्थः । किमर्थं तर्हि श्रुत्या तन्निषेधो न प्रदर्शितः यदि तन्निषेधनमिष्टं स्यादित्याशङ्क्य निषेध्यानां बहुत्वात् श्रुत्या दिङ्मात्रमेव प्रदर्शितमित्याह । श्रुतिपदानीति ॥ ३२१ ॥

विधिपदेषु त्वेवं न भवतीत्याह—

समुपसंहृतशब्दसमन्वितैः
श्रुतिपदैर्विधिवाक्यगतैः पुनः ।
समुपलक्ष्यतया न परात्मनः
किमपि रूपमिहाभ्यधिकं मतम् ॥ ३२२ ॥

समुपसंहृतेति । श्रुतसमुपसंहृतवाक्यप्रतिपाद्यरूपादधिकस्य रूपस्याभावात् न विधिवाक्यमुपलक्षणार्थमित्यर्थः ॥ ३२२ ॥

ननु किमितिरूपाभाव इत्याशङ्क्य वेदैकगम्यस्य ब्रह्मणस्तत्प्रमेयरूपातिरिक्तरूपान्तराभावात्तस्य च नित्यशुद्धत्वादेः श्रुतोपसंहृत-

वाक्याभ्यां सिद्धत्वादबुद्धिस्थे च तस्मिन् वाचकपदोपसंहारायोगाच्च नाश्रुतपदेन पूरणीयत्वमित्याह—

न खलु संस्मृतसंहृतशब्दयो-
रविषयः परमात्मन इष्यते ।
किमपि रूपममुत्र हि नास्ति नः
किमपि मानमतो न तदस्तिनः ॥ ३२३ ॥

न खल्विति । नेष्यत इत्यत्र हेतुः । अमुत्र हीति । अमुष्मिन्नात्मरूपे मानाभावादेव तद्रूपान्तरं नास्तीत्यर्थः ॥ ३२३ ॥

एवं परिपूर्णब्रह्मावगतये विधिनिषेधोभयवाक्यानामुपसंहरणीयत्वमुक्त्वा अन्यत्र श्रूयमाणानां पदानामन्यत्रोपसंहारे न्यायमाह—

गुणतया हि पदानि परात्मनो
विधिनिषेधवचस्स्ववतस्थिरे ।
गुणगणो गुणितन्त्रतया गुणी
भवति यत्र हि तत्र भवत्यसौ ॥ ३२४ ॥

गुणतयेति । परमात्मप्रमितिशेषत्वेनेत्यर्थः । असौ गुणगणः विधिनिषेधवाक्यगतानि पदानि परमात्मप्रमितिजनकत्वेन तद्गुणभावमुपगतानि सन्ति गुणिपरतन्त्रतया यत्र यत्र गुणी परमात्मा श्रूयते तत्र तत्र राजानमिव भृत्यस्तत्प्रतिपादकतया तमनुगतानि भवन्ति । अयमेवोपसंहारो नामेत्यर्थः ॥ ३२४ ॥

उभयविधपदोपसंहारप्रतिपादनमुपसंहरति—

विधिनिषेधवचः परिमाणत-

स्तव मया कथितं नयवर्त्मना ।

यदपरं तव वस्तु बुभुत्सितं

तदिह नः पुरतः प्रकटीकुरु ॥ ३२५ ॥

विधिनिषेधवच इति । शिष्यस्य चोद्यावसरं ददाति—पदपरमिति ॥३२५॥

एवमाचार्येण दत्तावसरः शिष्यः पृच्छति—

अन्तरङ्गबहिरङ्गसाधने

भेदतः कथय तद्बुभुत्सितम् ।

ज्ञानजन्मन इदं जिघृक्षितं

हेयमेतदिति चोपपत्तिभिः ॥ ३२६ ॥

अन्तरङ्गेति । तत्-अन्तरङ्गं बहिरंगं च साधनमिदमन्तरङ्गसाधन-मिति इदं बहिरङ्गसाधनमिति विविच्योपपत्तिभिः कथयेत्यर्थः । प्रश्नान्तरमाह ज्ञानजन्मनइति । ज्ञानोत्पत्तये इदं साधनं जिघृक्षितं ग्रहीतुमिष्टं यावत्फलोदयमनुष्ठेयमेतत्साधनं हेयमिति शृङ्गग्राहित्वेन कथयेत्यर्थः ॥ ३२६ ॥

तत्र हेयोपादेयप्रश्नस्योत्तरमाह—

अन्तरङ्गमपवर्गकाङ्क्षिभिः

कार्यमेव यतिभिः प्रयत्नतः ।

त्याज्यमेव बहिरङ्गसाधनं

यत्नतः पतनभीरुभिर्भवेत् ॥ ३२७ ॥

अन्तरङ्गमिति ॥ ३२७ ॥

आद्यप्रश्नस्योत्तरं प्रतिजानीते—

उच्यते शृणु विविच्य साधनं
ज्ञानजन्मनि यदूचिवान्गुरुः ।
अन्तरङ्गबहिरङ्गभेदतः
शब्दशक्तिमनुसृत्य वैदिकीम् ॥ ३२८ ॥

उच्यत इति । यद्वा अन्तरङ्गबहिरङ्गयोर्भेदज्ञानं किमर्थम् हेयोपादेयविभागसिद्ध्यर्थमित्याह ज्ञानजन्मन इति इदं जिघृक्षितम् इदं हेयमितिज्ञानसिद्धये इत्यर्थः । किमुपादेयं किं हेयमित्याकाङ्क्षायां स्मृत्यादिप्रसिद्ध्या कथयति—अन्तरङ्गमिति । एवं हेयोपादेयविभागज्ञानार्थमन्तरङ्गबहिरङ्गस्वरूपं विविच्य कथनीयमिति शिष्येण पृष्टो गुरुः पुरुषार्थपादसिद्धन्यायेनोत्तरं वक्तुं प्रतिजानीते—उच्यत इति । गुरुः परमहंसपरिव्राजकाचार्यो भगवान्भाष्यकारः वैदिकीं शब्दशक्तिमनुसृत्य विविदिषावाक्यसामर्थ्यं शान्तो दान्त इत्यादिवाक्यसामर्थ्यं चाश्रित्यान्तरङ्गबहिरङ्गभेदज्ञानजन्मनि यत्साधनमूचिवान् तद्विविच्योच्यते । शृण्विति योजना ॥ ३२८ ॥

अन्तरङ्गबहिरङ्गस्वरूपं लक्षणभेदेन विविच्य दर्शयति—

यच्छ्रुतं विविदिषोदयाय त-
त्सर्वमेव बहिरङ्गसाधनम् ।
अन्तरङ्गमवगच्छ तत्पुन-
र्यत्परावगतिसाधनं श्रुतम् ॥ ३२९ ॥

यच्छ्रुतमिति । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा नाशकेनेति वाक्येन यद्यज्ञादिसाधनं विविदिषोत्पत्तये श्रुतं तत्सर्वं बहिरङ्गसाधनमवेहि विविदिषाया अपि प्राग्भावित्वात् ज्ञानसाधनसमानकालीनत्वाभावाच्च यत्पुनः शान्त्यादि तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति ब्रह्मात्मज्ञानहेतुत्वेन श्रूयते तत्सर्वमन्तरङ्गं विजानीहि ज्ञानसाधनश्रवणादिसमानकालीनत्वात् यावज्ज्ञानोदयमपेक्षितत्वाच्च । तथा च जिज्ञासानन्तरमप्यपेक्षितत्वं साधनस्यान्तरङ्गत्वं जिज्ञासोत्पत्तिमात्रापेक्षितत्वं बहिरङ्गत्वमित्युक्तं भवतीत्यर्थः ॥३२९॥

प्रकारान्तरेणाप्यन्तरङ्गबहिरङ्गयोर्लक्षणमाह —

यद्धि कारकतयाऽवगम्यते
दूरतस्तदिह साधनं धियः ।
अन्तरङ्गमखिलं तु तत्पुन-
र्व्यञ्जकं भवति यत्परात्मनः ॥ ३३० ॥

यद्धीति । कारकत्वमदृष्टैकद्वारोपकारकत्वं दूरतः साधनं बहिरङ्गसाधनमित्यर्थः । व्यञ्जकत्वं दृष्टद्वारोपकारकत्वं यद्धियः कारकतयावगम्यते तद् दूरतः साधनं यत्परमात्मानो व्यञ्जकं तदखिलमन्तरङ्गमिति सम्बन्धः । तथा च दृष्टद्वारा विद्यासाधनमन्तरङ्गमदृष्टैकद्वारा तत्साधनं बहिरङ्गमिति लक्षणं वेदितव्यम् ॥ ३३० ॥

अन्तरङ्गबहिरङ्गसाधनयोर्लक्षणतो विविच्य कथनस्य फलमाह -

कारकस्य करणेन तत्त्वणा-
द्भिक्षुरेष पतितो भवेद्यथा ।

व्यञ्जकस्य परिवर्जनात्तथा

सद्य एव पतितो भवेदसौ ॥ ३३१ ॥

कारकस्येति । कारकस्यादृष्टैकद्वारोपकारकवेदानुवचनदानजप-तीर्थयात्रादेः भिक्षुः परमहंसपरिव्राजकः व्यञ्जकस्य दृष्टद्वारोपकारक श्रवणादितदुपकारकशान्त्यादेः असौ—भिक्षुः। एतदुक्तं भवति परमहंस-संन्यासो ह्यात्मज्ञानप्रकरणे विधीयमानस्तदङ्गत्वेनैव विधीयते। अङ्गं चाधिकारिणैव कर्त्तव्यं न तदनधिकारिणा तेन च क्रियमाणं तदविहितमेव भवति। तथा च यथा सत्साधनसर्वकर्मत्यागलक्षण-परमहंससन्याससंपन्नः श्रवणाद्यधिकारी सन्नपि कश्चिन्मन्दमतिः श्रद्धाजाड्येन गायत्र्यादिमन्त्रजपदेवालयादिनिर्माणतीर्थयात्रादिकर्मा-नुतिष्ठन् वेदमुच्चरन्निव शूद्रः पतितो भवेत् तथा ज्ञानसाधनश्रवणादि-परिवर्जनेनापि सोमयागं विना कृताग्नीषोमीयपश्वालम्भनेनेव पतितो भवेत्। तदुक्तम् "त्वंपदार्थविवेकाय सन्यासः सर्वकर्मणाम्। श्रुत्या विधीयते तस्मात्तत्यागी पतितो भवेदि"ति ततः परमहंसेन मुमुक्षुणा श्रवणादिविरुद्धमन्त्रजपतीर्थनिषेवणादिकं ब्रह्महत्यादिवत्प-रित्यज्य श्रवणतदुपकारिशान्त्यादिकं यावज्ज्ञानमवश्यमनुष्ठेय-मिति ॥ ३३१ ॥

ननु विविदिषन्तीत्यत्र वेदनस्यैवेष्यमाणत्वेन कर्मतया प्रधान-त्वात् तत्प्रत्येव वेदानुवचनादिकर्मणां साधनत्वमवगम्यते नेच्छां प्रति अतः कथं ज्ञानात्पूर्वं तत्यागः संभवतीति चेत्तत्राह—

प्रत्ययार्थविषयं हि कर्मणा-

मुच्यते विविदिषेयुरित्यतः।

न प्रकृत्यभिहितार्थवेदने

वेदवाचि विनियोगशासनम् ॥ ३३२ ॥

प्रत्ययार्थेति । प्रत्ययार्थः सन्वाच्येच्छा विषयो यस्य विनियोगशासनस्य तत्तथोक्तं सप्तम्यन्तः क्वचित्पाठः विविदिषेयुरिति । विविदिषन्तीत्यस्य लडन्तस्यार्थतोनुकारः विविदिषन्तीत्यस्माद्वचस इत्यर्थः । प्रकृतिर्विदिधातुः वेदवाचि तमेतमित्यादिवेदवाक्ये विनियोगशासनं विनियोगबोधनं तमेतमित्यादिवाक्ये हि विविदिषन्तीत्यस्मात् सन्प्रत्ययार्थेच्छायामेव वेदानुवचनादिकर्मणां विनियोगो बोध्यते । न विदिप्रकृत्यभिहितात्मज्ञानेपि तस्येष्यमाणत्वेन कर्मत्वे ऽपीच्छाया एव प्रत्ययार्थत्वेन प्राधान्यात् तथैव कर्मादीनां साधनत्वेनान्वयस्य युक्तत्वादित्यर्थः ॥ ३३२ ॥

नन्वप्रधानेनापि पदार्थानामन्वयो दृश्यते एकस्मिन् वाक्ये गुणप्रधानभावेन प्रयुक्तानां पदार्थानां परस्परान्वयनियमादिति चेत्सत्यम् । न सोपि प्रधानान्वयं विना भवति किन्तु प्रधानान्वयद्वारैव तन्निर्वाहाय भवति । न च यज्ञादीनां प्रकृत्यर्थान्वयाभावे प्रधानान्वयभङ्गोस्ति अतः प्रधानभूतेच्छयैव यज्ञादीनामन्वय इत्याह—

न प्रधानमपहाय वेदने-

नान्वयं व्रजति कर्मसाधनम् ।

संगतिर्भवति वेदनेच्छया

वेदनेन न तु कर्मणां क्वचित् ॥ ३३३ ॥

न प्रधानमिति । [illegible]धानेनेत्यर्थः । कर्मशासनं कर्मेति वस्तुमात्रोपलक्षणम् । एवं प्रथमार्द्धेन सामान्यन्यायं प्रदर्श्योत्तरार्द्धेन तत्प्रदर्शनफलमाह—संगतिरिति । अन्वयः ॥ ३३३ ॥

ननु प्रत्ययार्थस्यैव प्राधान्ये को हेतुः प्रकृत्यर्थ एव प्रधानं किन्न स्यादित्याशङ्क्य प्रकृतिप्रत्ययौ प्रत्ययार्थमेव प्राधान्येन सह ब्रूत इति न्यायात् प्रत्ययार्थस्यैव प्राधान्यं सन्प्रत्ययस्य चेच्छायामर्थे विहितत्वादिच्छायाः प्रत्ययार्थत्वात् प्राधान्यं न वेदनस्य प्रकृत्यर्थस्येत्याह—

न प्रधानमिह वेदनं भवे-
त्प्रत्ययार्थविषयां प्रधानताम् ।
उत्ससर्ज भगवान्निरङ्कुशां
येन पाणिनिरलङ्घ्यशासनः ॥ ३३४ ॥

न प्रधानमिति । तत्र हेतुः–प्रत्ययार्थेति । उत्ससर्ज धातोः कर्मणः समानकर्तृकादिच्छायां वेतिसूत्रेणोत्सर्गन्यायादनुशिष्टवानित्यर्थः ॥ ३३४ ॥

ननु सर्वत्रोत्सर्गतः प्रत्ययार्थस्य प्राधान्येपीच्छायामपवादोऽस्त्विति चेन्न तददर्शनादित्याह—

प्रत्यये सनि न चापवादकं
किंचिदप्युदितवानसौ मुनिः ।
येन तत्र गुणभावमुद्वहेत्-
प्रत्ययाभिहितमर्थवस्तुनः ॥ ३३५ ॥

प्रत्यये सनीति । सन्प्रत्ययविषये सन्प्रत्ययार्थेच्छायामित्यर्थः । सन्प्रत्ययविधानस्थल इति वापवादकमुक्तन्यायस्येति शेषः । तत्र प्रकृत्यर्थं निमित्तीकृत्यासौ पाणिनिः अर्थवस्तु इच्छाख्यं वस्तु ॥३३५॥

नन्वपवादकानुक्तिरसिद्धा धातोः कर्मण इति प्रकृत्यर्थस्य सनर्थकर्मत्वाभिधानेन तं प्रति प्राधान्योक्तेरित्याशङ्क्य ष्यमाणत्वेन कर्मतयाऽर्थादेव प्रकृत्यर्थाप्राधान्यप्रतिपादनात् तस्य च शब्दान्वयानुपयुक्तत्वात् तदुपयुक्तस्य च शब्दप्राधान्यस्याप्रतिपादनान्मैवमित्याह—

धातोः कर्मण इत्युवाच भगवान्यत्पाणिनिस्तत्पुन-
र्धात्वर्थस्य निवेदयत्यभिमतं प्रधान्यमायुष्मतः ।
किन्त्वार्थं न तु शब्दगम्यमवदत्तेनापि तन्नोद्यते
नोत्सर्गस्य विना निमित्तमपरं संकोचनं युज्यते ॥ ३३६ ॥

धातोरिति । अभिमतं प्राधान्यमन्वयोपयुक्तं प्राधानमित्यर्थः । अस्यैव विवरणन्न तु शब्दगम्यमवददिति । आयुष्मतः प्रमाणव्यापारानभिज्ञस्य तवेत्युपहासः । कीदृशं तर्हि तत्प्राधान्यमित्याकाङ्क्षापूर्वकमाह – किन्त्विति । आर्थं धात्वर्थस्येच्छाकर्मत्वानुपपत्तिगम्यमित्यर्थः ॥ ३३६ ॥

ननु कर्मत्वप्रयुक्तं यत्प्रकृत्यर्थप्राधान्यं तदार्थमेव किमिति गृह्यते तत्राह –

धातोः कर्मण इत्युदीरणमिदं साधारणं दृश्यते
शाब्दार्थत्वविशेषसूचकतया न ह्यत्र सूत्रे पदम् ।

धात्वर्थस्य तु कर्मतावचनमत्रोच्चारितं केवलं तत्त्वार्थेऽप्युपपद्यमानमधुना नोत्सर्गपीडाकरम् ॥ ३३७ ॥

तेनापीति । यद्वा प्रकृत्यर्थस्य कर्मत्वप्रयुक्तस्यापि प्राधान्यस्याङ्गीकारे इच्छाप्राधान्यं न स्यात् एकस्मिन् वाक्यार्थे एकस्यैव प्रधानत्वात् तथाचान्वयसिद्धर्थं तत्प्राधान्यस्य शाब्दत्वमपि वक्तव्यमेव । अन्यथा तत्सूत्रं नोपपद्येतेत्याशङ्क्यैकस्मिन्नपि वाक्यार्थे शाब्दार्थप्राधान्यद्वयस्याविरोधात् न प्रकृत्यर्थप्राधान्यस्यान्वयसिद्ध्यर्थं तस्य शाब्दत्वापत्तिः न वा तस्यार्थवत्वे सूत्रानुपपत्तिरित्याह—तेनापीति । प्रकृत्यर्थार्थप्राधान्येनापीत्यर्थः । तद्धातोःकर्मण इति प्रकृत्यर्थकर्मत्वप्रतिपादकवचनं योक्ष्यते युक्तं भविष्यतीत्यपवादकाभावेऽप्युत्सर्गबाधो भवत्विति वक्तु न शक्यं न्यायविरुद्धत्वादिति फलितमाह नोत्सर्गस्येति । उत्सर्गस्यप्रत्ययार्थप्राधान्यविषयोत्सर्गन्यायस्य निमित्तं बाधकमपरं कर्मत्वप्रयुक्तप्रकृत्यर्थप्राधान्यातिरिक्तं संकोचनं बाधनमतिप्रसङ्गादिति भावः । ननु प्रकृत्यर्थप्राधान्यस्यार्थिकत्वप्रतिपादनपदाभावात् कथं तस्य तत्त्वन्निश्चीयत इत्याशङ्क्य शाब्दत्वसूचकविशेषणस्याप्यभावात् कर्मत्वमात्रस्यैव तत्राभिधानात्तस्य चार्थिकप्राधान्येप्युपपन्नत्वान्नौत्सर्गिकप्रत्ययार्थप्राधान्यभङ्गेन शाब्दत्वं कल्पयितुं युक्तमित्यभिप्रेत्योक्तमेव विशदयति । धातोः कर्मण इत्युदीरितामिति उदीरितमुदीरणं साधारणं धात्वर्थप्राधान्यस्य शाब्दत्वार्थत्वसाधारणं शाब्दार्थत्वविशेषसूचकतया शाब्दत्वार्थत्वलक्षणविशेषसूचकत्वेन प्रकृतिधात्वर्थप्राधान्यस्येति शेषः । कर्मतावचनं कर्मत्वप्रतिपादकं धातोः कर्मण इति वचनमत्रसूत्रे तत्कर्मतावचनमार्थे प्रकृत्यर्थप्राधान्य इति शेषः । उत्सर्गपीडाकरमौत्सर्गिकप्रत्ययार्थप्राधान्यापवादकमित्यर्थः ॥ ३३७ ॥

इच्छाया एव प्राधान्यं शाब्दमित्यस्य सूचकमप्यस्मिन् सूत्रेऽस्तीत्याह—

इच्छायामिति सूत्रकारवचनं प्राधान्यपक्षे भवे-
दिच्छार्थस्य समञ्जसं न खलु तत्सनूप्रत्ययार्थे गुणे।
धात्वर्थे ननु सन् भवेदिति वदेदिच्छा गुणश्चेद्भवे-
दिच्छायामिति वक्ति तेन वदति प्रधान्यमिच्छागतम् ॥
॥ ३३८ ॥

इच्छायामितीति । धातोः कर्मणः समानकर्तृकादिच्छायां वेत्यत्रे-च्छायामिति सूत्रकारवचनम् इच्छार्थस्येच्छारूपार्थस्य तत्सूत्र कारवचनं गुणेऽप्रधाने सूत्रकारो हि पाणिनिः इषिसमानकर्तृ-कादिषिकर्मणो धातोरिच्छायां वाच्यायां सन् प्रत्ययो भवती-त्याह । इदं च सन्वाच्येच्छायाः प्राधान्य एव संगच्छते नत्वप्राधान्ये प्रकृतिप्रत्ययौ गुणविशिष्टं प्रधानमर्थं ब्रूत इति न्यायेन प्रधानस्यैव वाच्यत्वात् यदि च सनर्थस्येच्छाया अप्रा-धान्यं सूत्रकारस्य विवक्षितं भवेत्तदा धातोरिच्छाकर्मणः समानकर्तृ कादूवेत्येव सूत्रं प्रणीय इष्यमाण धात्वर्थ एव सनं विदध्यादिच्छाया-मिति च पृथग्वर्ति अतस्तस्येच्छागतमेव प्राधान्यं संमतं तथा चोत्स गन्यायेन प्रत्ययार्थेनैव यज्ञादीनामन्वय इति भावः। नन्वौत्सर्गिकप्रत्य-यार्थप्राधान्यस्यापि क्वचिद्बाधो दृष्टः अश्वेन जिगमिषतीत्यत्रेष्य माणगमनेनैवाश्वस्य साधनेनान्वयदर्शनात् तद्वदत्रापीष्यमाणज्ञान-स्यैव साध्यतया साधनाकाङ्क्षायां यज्ञादीनां तत्प्रत्येव साधनत्वेना-न्वयो वक्तव्य इति चेन्न तत्र हि गमनेच्छायाः कथमप्यश्वसाध्यत्वानु पपत्त्या बलवद्बाधकबलेन गमनस्य साक्षादश्वसाध्यत्वसम्भवाच्च। इष्यमाणगमनसाधनत्वमश्वस्य बोध्यते प्रकृते तु न तथा यज्ञादेर-प्रमाणत्वेन ज्ञानसाधनत्वासंभवात् परम्परया साधनत्वसंभवे च तत्प्रथमभावितदिच्छां प्रत्येव साधनत्वौचित्यात् । तत्साधनत्वं विना ज्ञानसाधनत्वस्याप्ययोगात् ॥ ३३८ ॥

नन्विच्छाया विषयसौन्दर्यलभ्यत्वान्न यज्ञादिसाध्यत्वमिति चेत्तुल्यं ज्ञानेपि तस्यापि प्रमाणप्रमेयपरतन्त्रस्य साक्षाद्यज्ञादिसाध्यत्वाभावात् तस्मादौत्सर्गिकप्राधान्यबाधकाभावादाशयशुद्धिद्वारा विविदिषां प्रत्येव यज्ञादेः साधनत्वं श्रौतमित्युपसंहरति—

तस्मात्कर्म समस्तमेव तु भवेच्चिदिच्छाजनेः साधनं

शास्त्रेणोक्तमतः समस्तमपि तद्यत्नेन हेयं यतः।

द्रष्टव्यत्वमनूद्य साधनतया यत्तत्प्रतीचः श्रुतं

वेदान्तश्रवणादिकं भवति तत्कर्त्तव्यमावश्यकम् ॥३३९॥

तस्मादिति। इच्छाजनेर्विविदिषोत्पत्तेः कर्मणां विविदिषासाधनत्वेन ज्ञानं प्रति बहिरङ्गत्वसाधनफलमाह—अतःसमस्तमपीति। तद् -वेदानुवचनदानजपादिकर्म, यत्नेन श्रद्धाजाड्यं विहाय किं तस्य कर्त्तव्यमिति सम्बन्धः। द्रष्टव्य इत्यत्र प्रकृत्यर्थात्मदर्शनमित्यर्थः। साधनतया—दर्शनसाधकतया। यच्छब्दार्थमाह—वेदान्तश्रवणादिकमिति। आदिपदेन मनननिदिध्यासने शान्त्यादिकं च गृह्यन्ते। आत्मा वा अरे द्रष्टव्यः आत्मानं पश्येदिति आत्मदर्शनमनूद्य तत्साधनत्वेन श्रोतव्यो मन्तव्यो निदिध्यासितव्यः शान्तो दान्त इत्यादिना यच्छ्रवणादि साधनं विधीयते तदवश्यमपरोक्षात्मदर्शनकामेन यतिना कर्तव्यमित्यर्थः॥ ३३९॥

नन्विदमात्मदर्शनं किंकरणकं किमुपकरणकमित्याकाङ्क्षायां सुखप्रतिपत्त्यर्थं विभज्य दर्शयति।

वेदान्तवाक्यमिह कारणमात्मबोधे

हेत्वन्तराणि परिपन्थिनिबर्हणानि।

यज्ञादिकानि दुरितं क्षपयन्ति बुद्धे-

स्त्वंपदार्थविषयं तम उत्तराणि॥ ३४०॥

वेदान्तवाक्यमिति। तत्त्वमादि वाक्यं कारणं करणं हेत्वन्तराणि यज्ञादीनि श्रवणादीनि च परिपन्थिनिवर्हणानि विद्योत्पत्तौ तत्फलाविद्यानिवृत्तौ च प्रतिबन्धनिरासीनि कस्य किं प्रतिबन्धनिरासित्वमित्याकाङ्क्षायां यज्ञादीनां विद्योत्पत्तिप्रतिबन्धनिरासित्वं श्रवणादीनां च तत्फलप्रतिबन्धनिरासित्वमित्याह—यज्ञादिकानीति। बुद्धेरन्तः करणस्य दुरितं विविदिषोत्पत्तिप्रतिबन्धनद्वारा ज्ञानोत्पत्तिप्रतिबन्धकं पापादृष्टं क्षपयन्ति नाशयन्ति। उत्तराणि विविदिषानन्तरवर्तीनि श्रवणादीनि तत्त्वंपदार्थविषयं तम अज्ञानं क्षपयन्ति। तथा चात्मज्ञाने तत्त्वमादिवाक्यं करणं यज्ञश्रवणादिकं तूपकारकं तत्रापि यज्ञादिकं विविदिषोत्पत्तिप्रतिबन्धकदुरितादृष्टनिर्वहणद्वारोपकरोति श्रवणादिकं तु पदार्थद्वयविषयाज्ञाननिर्वहणद्वारोपकरोतीत्युक्तमित्यर्थः॥ ३४०॥

ननु चिदेकरसब्रह्मात्माश्रयविषयमज्ञानमेकमेव तच्च वाक्यार्थज्ञानेनैव निरस्यं तत्कथं तदतिरेकेणान्तरङ्गसाधननिरस्यं तत्त्वंपदार्थविषयाज्ञानं पृथगुच्यत इत्याशङ्क्य सत्यं स्थूलदृष्ट्यनुरोधेनैव तदुक्तम्। उत्तमबुद्धीनान्त्वज्ञानमेकमेव ब्रह्मात्मसाक्षात्कारेणैव निवर्त्यं नान्तरङ्गसाधनेनेत्याह—

तत्त्वंपदार्थविषयं तम इत्यपीद-
मर्वागवस्थजनदृष्टिमपेक्ष्य गीतम्।
अज्ञानमुत्तमदृशां पुनरेकमेव
संसारमूलमपवर्गफला च विद्या॥ ३४१॥

तत्त्वंपदार्थविषयमिति। अर्वागवस्थजनदृष्टिमर्वाचीनप्राणिदृष्टिमविवेकिदृष्टिमिति यावत्। गीतमुक्तम्। उत्तमदृशां विवेकिनमपवर्गफलाअविद्यानिवृत्तिफला, विद्या-ब्रह्मात्मसाक्षात्कारः॥ ३४१॥

किं तर्ह्यन्तरङ्गसाधनकृत्यं पदार्थविषयासंभावनादिनिवृत्ति रित्याह—

अज्ञानसंशयविपर्ययरूपकाणि
ब्रह्मात्मबुद्धिजननप्रतिबन्धकानि।
तत्त्वंपदार्थविषयाणि निवर्तयन्ति
ह्यावृत्तिमन्ति मननश्रवणादिकानि ॥ ३४२ ॥

अज्ञानेति। अज्ञानं तात्पर्यादिज्ञानाभाव असंभावनादि वासनादार्ढ्यं वा। संशयः अहं ब्रह्म वा न वेत्येवमादिरूपः। विपर्ययः अहं कर्तेत्येवमादिरूपः। बुद्धिपदेनाविद्यानिवृत्तिफलशिरस्कबुद्धिरुच्यते। ननु किं सकृदेव श्रवणाद्यनुष्ठेयं तत्राह—आवृत्तिमन्तीति। पुनः पुनरनुष्ठानमावृत्तिः दीर्घकालादरनैरन्तर्यानुष्ठितानीत्यर्थः। तत्र श्रवणादिस्वरूपपरिज्ञानं विना तदनुष्ठानायोगात् ॥ ३४२ ॥

कानि तानि श्रवणादीनीत्याकाङ्क्षायामादौ श्रवणस्य लक्षणमाह—

शब्दशक्तिविषयं निरूपणं
युक्तितः श्रवणमुच्यते बुधैः।
वस्तुवृत्तविषयं निरूपणं
युक्तितो मननमित्युदीर्यते ॥ ३४३ ॥

शब्दशक्तीति। शक्तिपदं तात्पर्यस्याप्युपलक्षणं वेदान्तानां शक्तितात्पर्यावधारणं श्रवणमित्यर्थः। युक्तितः उपक्रमादिभिः। इदं च तात्पर्यावधारणे हेतुः। मननलक्षणमाह—वस्तुवृत्तेति। वस्तु ब्रह्माख्यं तस्य वृत्तं स्वरूपं तद्विषयं निरूपणं चिन्तनं युक्तितः आरम्भणाद्य-

धिकरणसिद्धन्यायैः वेदान्तैः श्रुतस्य वस्तुनो युक्तितोऽनुचिन्तनं मनन-मित्यर्थः ॥ ३४३ ॥

निदिध्यासनलक्षणमाह—

चेतसस्तु चितिमात्रशेषता
ध्यानमित्यभिवदन्ति वैदिकाः ।
अन्तरङ्गमिदमित्थमीरितं
तत्कुरुष्व परमात्मबुद्धये ॥ ३४४ ॥

चेतस इति । चेतसस्तत्त्वमादिवाक्यजन्यवृत्तिमदन्तः करणस्य चितिमात्रशेषता ब्रह्मात्मैक्यविषयता विजातीयप्रत्ययमकृत्वा अहं ब्रह्मास्मीति ब्रह्मात्मविषयप्रत्ययप्रवाहो निदिध्यासनमित्यर्थः । एवं शान्त्यादिलक्षणमपीन्द्रियनिग्रहादिकं तत्र तत्रोक्तमुपजीव्यमन्तरङ्ग साधनं न यज्ञादिवत्त्याज्यं किन्तु यावत्फलोदयमनुष्ठेयमित्याह— अन्तरङ्गमिति । तत्-अन्तरङ्गसाधनम् ॥ ३४४ ॥

निदिध्यासने पक्षान्तरमाह —

श्रवणमननबुद्ध्योर्जातयोर्यत्फलं त-
न्निपुणमतिभिरुच्चैरुच्यते दर्शनाय ।
अनुभवनविहीना यैवमेवेति बुद्धिः
श्रुतिमननसमाप्तौ तन्निदिध्यासनं हि ॥ ३४५ ॥

श्रवणेति । श्रवणमननबुद्ध्योः जातयोर्यत्फलं तद्दर्शनाय भवतीति निपुणमतिभिरुच्यत इति सम्बन्धः । एतदेव विशदयति—अनुभवन-

विहीनेति । श्रुतमननसमाप्तं श्रुतं श्रवणं दीर्घकालादरनैरन्तर्यानुष्ठानेन श्रवणमननपरिपाके सतीत्यर्थः । अनुभवनविहीना साक्षात्कारत्वरहिता या एवमेवेति बुद्धिः अहं ब्रह्मैवेति निर्णयात्मिका बुद्धिः तदेव निदिध्यासनं नाम अस्मिन् पक्षे श्रवणमननयोरेवानुष्ठेयत्वम् । निदिध्यासनं तु दीर्घकालमनुष्ठितश्रवणमननफलरूपनिर्णया बुद्धिर्यदा भवति तदैव साक्षात्कारो भवतीति नानुष्ठेयं पूर्वस्मिन् पक्षे तु निदिध्यासनमपि पृथगनुष्ठेयमिति भेदः ॥ ३४५ ॥

तदेवमन्तरङ्गबहिरङ्गसाधनानां प्रतिबन्धकनिरासित्वमेव । तन्निरासमहकृतवेदान्तमहावाक्यमेव फलवत्साक्षात्कारं जनयतीत्युपसंहरति—

पूर्वाणयदृष्टपरिपन्थिनिबर्हणानि
दृष्टं हरन्ति च विरोधिनमुत्तराणि ।
वाक्यं निरस्तसकलप्रतिबन्धकं स-
दात्मानमद्वयमखण्डमबुद्धमाह ॥ ३४६ ॥

पूर्वाणीति । विविदिषा पूर्वभावीनि यज्ञादिबहिरङ्गाणि दृष्टं विरोधिनमसम्भावनादिप्रतिबन्धकम्, उत्तराणि अन्तरङ्गाणि ॥ ३४६ ॥

एवं बहिरङ्गसाधनसमुपार्जितबुद्धिशुद्धेः अन्तरङ्गसाधनमसकृदनुतिष्ठतः संन्यासिनः किमस्मिन्नेव जन्मनि विद्योत्पत्तिः किं वा कर्मफलवज्जन्मान्तरेपीत्याकाङ्क्षायामित्याह —

यज्ञादिक्षपितसमस्तकल्मषाणां
पुत्रादित्रयगतसङ्गवर्जितानाम् ।

संशुद्धे पदयुगलार्थतत्त्वमार्गे
प्रायेणोद्भवति हि जन्मनीह विद्या ॥ ३४७ ॥

यज्ञादीति । पुत्रादित्रयगतसङ्गवर्जितानां पुत्रवित्तलोकैषणाशून्यानां परमहंससंन्यासिनामिति यावत् । संशुद्धे पदयुगलार्थतत्त्वमार्गे पदद्वयार्थ एव तत्त्वमार्गः आत्मतत्त्वप्राप्त्युपायः आत्मतत्त्वप्रतिपत्त्युपायभूततत्त्वंपदार्थे सम्यक् शोधिते सतीत्यर्थः । इह-जन्मन्यसकृत् साधनानुष्ठानजन्मनि, प्रायेणेत्यनेन सकलप्रतिबन्धके निरस्ते इह भवति अन्यथा तु जन्मान्तरेपीति सूचितम् ॥ ३४७ ॥

तदेव विशदयति—

अत्रैव जन्मनि भवेदपवर्गदायि
वाक्यप्रसूतमनुभूतिफलावसानम् ।
ज्ञानं निवारकनिमित्तवशादमुष्मि-
न्जन्मन्यपीति वचनादवगम्यते हि ॥ ३४८ ॥

अत्रैवेति । साधनानुष्ठानवत्येव निवारकनिमित्तवशादागामिदेहारम्भकारब्धकर्मशक्तिलक्षणज्ञानोत्पत्तिप्रतिबन्धकनिमित्तवशात् अमुष्मिन् जन्मनि जन्मान्तरेपि तदनुभवावसानं ज्ञानं भवतीत्यवगम्यते । यदि प्रारब्धकर्मणो देहान्तरारम्भककर्मशक्तिर्न भवेत्तदा श्रवणादिसाधनपौष्कल्ये सति तस्मिन्नेव जन्मनि विद्योत्पत्तिर्भवति यदि तादृशी शक्तिर्विद्यते तदा साधनपौष्कल्येपि तत्प्रतिबद्धत्वान्न विद्योत्पत्तिः किन्तु जन्मान्तरे प्रतिबन्धविगममपेक्ष्य भवतीत्येवंव्यवस्थायां लिङ्गमाह—वचनादिति । वचनप्रतिपन्नार्थसामर्थ्यादित्यर्थः ॥ ३४८ ॥

किं च तद्वचनं यदर्थसामर्थ्यादेवमङ्गीक्रियते तदाह—

ज्ञानोत्पत्तिं वामदेवस्य गर्भे
श्रुत्वा विद्वः साधनं प्राच्यमस्य ।
योगभ्रष्टस्येत्यवष्टम्भतोऽपि
विज्ञातव्यं साधनं प्राच्यमस्य ॥ ३४६ ॥

ज्ञानोत्पत्तिमिति । प्राच्यं प्राग्भवीयं गर्भे वसन्नेव गर्भस्थो वामदेवः प्रतिपेदे अहमनुरभवं सूर्यश्चेत्यादिना गर्भस्थस्यैव वामदेवस्य विद्योत्पत्तिः श्रूयते । न च तदा साधनानुष्ठानं तस्य संभवति । अतः प्राग्भवीयमेव साधनजातं तस्य तदानीं विद्यामुत्पादयतीति वक्तव्यम् । प्राग्भवीयसाधनस्य च परिपुष्कलस्य प्रतिबन्धकं विना फलविलम्बानुपपत्तेः । प्रतिबन्धकस्य चान्यस्याभावात् प्रारब्धकर्मणो देहान्तरारम्भकशक्तिविशेष एव प्रतिबन्धकः कल्प्यत इत्यर्थः । तदुक्तम् 'आगामिप्रतिबन्धस्तु वामदेवे समीरित' इत्यागामिप्रतिबन्धो जन्मान्तरहेतुः । प्रारब्धावशेष इत्यर्थ इति तद्व्याख्यानं प्रतिबन्धकवशात् जन्मान्तरेपि फलं भवतीत्यत्र गीतावचनमपि प्रमाणमाह—योगेति । साधनमनुष्ठानप्रतिबन्धकवशात् फलमप्राप्य मृतो योगभ्रष्टः तद्विषया स्मृतिस्तथा अस्य वामदेवस्य जन्मान्तरे विद्यासाधनवत इति वा । "पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते । शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायत" इत्यादियोगभ्रष्टस्मृत्यापि जन्मान्तरीयसाधनं जन्मान्तरीयविद्यामुत्पादयतीति ज्ञायत इत्यर्थः ॥ ३४६ ॥

ननु दृष्टफलस्य श्रवणस्य जन्मान्तरीयफलसम्बन्धो ऽनुपपन्न इति चेन्न—प्रतिबन्धके सति जन्मान्तरीयफलसम्बन्धे दृष्टफलत्वानुपपत्त्यभावात् यथा चित्रायागस्य दृष्टफलस्यापि कदाचिज्जन्मान्तरीयफलत्वमित्याह—

चित्रादिवद्भवति साधनजातमस्य
ज्ञानप्रसूतिकरमित्यवगच्छ सर्वम् ।
अभ्यग्रशुष्यदखिलौषधिकस्य पुंसो
वृष्टिप्रदेष्टिरधिकारवशादिहैव ॥ ३५० ॥

चित्रादिवदिति । आदिपदेन पुत्रेष्टिर्गृह्यते । अस्याधिकारिणः सर्वं साधनजातमिति सम्बन्धः । तर्हि कारीर्यपि कदाचिज्जन्मान्तरीयवृष्टिफला स्यान्नेत्याह—अभ्यग्रेति । अभ्यग्रमिदानीं शुष्यन्तः अखिलौषधयो यस्य स तथा तस्य पुंसः अधिकारवशादिष्टिः कारीरीष्टः इहैव वृष्टिप्रदेति सम्बन्धः । कारीरीविधिवाक्यशेषे ह्योषधीनामाप्यायमानत्वश्रवणात् शुष्यत्सस्यसंजीवनकाम एव कारीरीष्टावधिकारीति तदौषधिपुष्टिरेव कारीरीफलं न सामान्येनौषधिपुष्टिमात्रं फलमतो न जन्मान्तरे तत्फलसंभवः । इह फलादर्शने साधनवैकल्यमेव तत्र कल्पनीयं श्रवणादिकं तु चित्रादिवत् फलसाधनमात्रं न त्वैहिकफलसाधनम् । अतः प्रतिबन्धकबलात् कालान्तरेपि ज्ञानजन्मनि न विरोध इत्यर्थः ॥ ३५० ॥

एवमन्तरङ्गबहिरङ्गसाधने तयोर्ज्ञानसाधनत्वप्रकारं चोक्त्वा तयोरनुष्ठानेपि विशेषं वदन्नादौ बहिरङ्गसाधनं फलाभिसन्धिविधुरमीश्वरार्पितमेव चित्तशुद्धिद्वारा विविदिषासाधनम् । अन्यथा तस्य कर्मणा पितृलोक इति श्रुतिप्रतिपन्नपितृलोकादिसाधनत्वमेवेति विशेषमाह—

बहिरङ्गसाधनमशेषगुरोः
परमेश्वरस्य चरणाम्बुजयोः ।

नियमात्समर्पितमशेषमघं

विनिहन्ति बुद्धिनिलयं सुमहत् ॥ ३५१ ॥

बहिरङ्गेति । बुद्धिनिलयम्-अन्तःकरणनिष्ठम् । अन्तरङ्गे तु नैत-दित्याह—न तथेति । तथा बहिरङ्गवदीश्वरार्पणबुद्ध्यनुष्ठितत्वेनोपलब्धि-जनेः ज्ञानोत्पत्तेः, अन्तरङ्गमेवाह—शमदमप्रभृतीति । शमोऽन्तरिन्द्रियनिग्रहः दमो बहिरिन्द्रियनिग्रहः आदिपदेनोपरतितितिक्षासमाधानश्रद्धा-श्रवणादीनां ग्रहणम् ॥ ३५१ ॥

अन्तरङ्गबहिरङ्गवदीश्वरार्पितत्वेनोपकारकं न भवति चेत्तर्हि कथमुपकारकम् ? अनुष्ठानमात्रेणेत्याह—

न तथान्तरङ्गमुपलब्धिजने-

रुपकारकं शमदमप्रभृति ।

तदनुष्ठितं परमहंसजनैः

परमात्मतत्त्वमुपलम्भयति ॥ ३५२ ॥

तदनुष्ठितमिति । तदन्तरङ्गमनुष्ठितमनुष्ठितमेव सदुपलम्भयति नत्वीश्वरार्पितं सदित्यर्थः । ननु बहिरङ्गे भगवत्समर्पणमुत्कर्षकारण-मस्ति अत्र तादृशमुत्कर्षकारणं नास्तीत्याशङ्क्य सम्यक्परमहंसा-नुष्ठितत्वमुत्कर्षकारणमित्याह—परमहंसजनैरिति । उपलम्भयति बोधयति ॥ ३५२ ॥

बहिरङ्गाणां भगवत्समर्पणे भगवद्वचनं प्रमाणमाह—

भगवाननादिनिधनः कृपया

हरिरेतदाह जगदेकहितः ।

सकलं समर्प्य मयि युक्तमनाः
कुरु कर्म शुद्धिकरमित्यसकृत् ॥ ३५३ ॥

भगवानिति । अनादिनिधन आद्यन्तरहितः "यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत्तपसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ शुभाशुभफलैरेव मोक्ष्यसे कर्मबन्धनै"रित्यादिना भगवान् निखिलकर्मणां ब्रह्मार्पणं तादृशानामेव परिपन्थिनिवर्हणत्वं च दर्शयतीत्यर्थः ॥३५३॥

नैवमन्तरङ्गसाधनस्य ब्रह्मार्पणं दर्शितमतस्तदनुष्ठानमात्रेणैव ज्ञानसाधनमित्याह—

न तथान्तरङ्गफलसंन्यसनं
क्वचिदूचिवानत इदं विदितम् ।
अनपेक्ष्य तत्फलपरित्यजनं
परमात्मनिश्चयफलं तदिति ॥ ३५४ ॥

न तथेति । तथा बहिरङ्गफलत्यागकीर्तनवदन्तरङ्गफलसंन्यसनमन्तरङ्गस्य फलस्य संन्यसनमीश्वरेऽर्पणं नोचिवान् भगवानिति शेषः । भगवदनुक्तिरतः शब्दार्थः । इदंशब्दार्थमाह—अनपेक्ष्येति । तत्फलपरित्यजनं तस्मिन्नीश्वरेऽर्पणं परमात्मनिश्चयफलमिति बहुव्रीहिः तत् अन्तरङ्गसाधनम् ॥ ३५५ ॥

बहिरङ्गाणां भगवत्समर्पणे मनः शुद्धिकरत्वमित्यत्रोपपत्तिरप्यस्तीत्याह—

अपि च बन्धनहेतुतया श्रुतं
समसमीक्षणकौशलशालिनः ।

भवति शुद्धिकरं न च बन्धकृ-
द्भवति कर्म तथा घटते हि तत् ॥ ३५५ ॥

अपि चेति । बन्धनहेतुतया श्रुतं कर्मेति सम्बन्धः । समसमीक्षणकौशलशालि समं ब्रह्म पण्डिताः समदर्शिन इत्यत्र समशब्दस्य ब्रह्मपरत्वे स्थिते तत्समीक्षणेन कौशलशालिब्रह्मार्पणबुद्ध्यानुष्ठानेन सामर्थ्ययुक्तं सदित्यर्थः । समसमीक्षणकौशलशालिन इत्येकं वा पदं ब्रह्मसमीक्षणे सामर्थ्ययुक्तस्य पुरुषस्यास्य च सामर्थ्यं भगवदर्पणं कर्म पुण्यात्मकमपि बन्धहेतुतया श्रूयते पुण्यो वै पुण्येन कर्मणा भवतीत्यादौ तत्र यदि कर्म अपरित्यक्तफलं स्यात्तदा संसार हेतुतया अशुद्धस्य तस्य शुद्धिहेतुत्वं न घटते न हि पङ्केन पङ्कप्रक्षालनं भवति । भगवदर्पणे तु तेन शुद्धत्वाच्छुद्धिकरमेव भवति न बन्धकृदित्यर्थः । तदुक्तं "यज्ञार्थात् कर्मणो ऽन्यत्र लोकोऽयं कर्मबन्धन" इति । ननु बन्धहेतोः कर्मणः फलत्यागमात्रेण कथं शुद्धिहेतुत्वमित्याशङ्क्य "योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धय" इत्यादिस्मृतेः प्रमाणसिद्धत्वान्मैवमित्याह—तथेति । तथा—भगवदर्पणे सति, तत्कर्म घटते, हि—शुद्धिकरं भवति हीत्यर्थः ॥ ३५५ ॥

अन्तरङ्गाणां च बन्धहेतुतया क्वचिदप्यनवगमात् ज्ञानहेतुत्वावगमाच्च स्वतः शुद्धत्वान्नेश्वरार्पणापेक्षेत्याह—

यदिह साधनमात्मधियः श्रुतं
न च फलान्तरहेतुतया श्रुतम् ।
शमदमादिकमत्र तु कौशलं
किमपि काङ्क्षितमस्ति न सिद्धये ॥ ३५६ ॥

यदीति । इह वेदान्ते यत् शमदमादिकमात्मधियः साधनं श्रुत फलान्तरहेतुतया च न श्रुतमिति सम्बन्धः अत्र शमदमादिके कौशल-मनुष्ठानव्यतिरेकेण पुरुषसामर्थ्यमीश्वरार्पणमित्यर्थः ॥ ३५६ ॥

नन्वीश्वरार्पणबुद्ध्यानुष्ठेयं चेत्तर्हि कथ कर्त्तव्यमित्याकाङ्क्षाया-मुक्तार्थाध्यायानुवादपूर्वकं तदाह—

उक्तं साधनजातमत्र सकलं विद्यासमुत्पत्तये
यस्मिन् कर्मणि वैदिकेन विधिना नुन्नः परिव्राजकः ।
कर्तृत्वाद्युपमर्दनेन भवता विद्यानुकूलात्मना
कर्त्तव्यं तदशेषतस्तदनु ते विद्याविपाकं व्रजेत् ॥ ३५७ ॥

उक्तमिति । अत्रास्मिन्नध्याये विद्यासमुत्पत्तये साधनजातवैरा-ग्यदाढ्यश्रवणादिशान्त्यादिकं सकलमुक्तं साधनं विशिनष्टि यस्मिन्निति । यस्मिन्कर्मणि साधने वैदिकेन विधिना परिव्राजकः परम-हंसयतिः नुन्नः नियुक्तः तत्साधनजातमुक्तमिति सम्बन्धः । बहिरङ्गसाधनस्याप्युपलक्षणमेतत् । कथं कर्त्तव्यमित्यस्योत्तरमाह – कर्तृत्वादीति । कर्तृत्वाद्यभिमानबाधेन विद्यानुकूलात्मना विद्यानुकूल आत्मान्तःकरणं यस्य भवतः स तथोक्तः । असौ स्वरूपं यस्य कर्तृ त्वाद्युपमर्दनस्येति वा तच्छ्रवणादिसाधनमशेषतः सर्वं तदनु तथा-नुष्ठितश्रवणाद्यनन्तरं विपाकं फलपर्यन्ततां विद्या हि साध्यतया शेषि-भूता अकर्त्रात्मानमेव विषयीकरोति तदानुकूल्येन श्रवणादिकमपि कर्तृत्वाद्यभिमानं परित्यज्याकर्तृभावनापूर्वकमेव कर्त्तव्यम् । अन्यथा शेष्यनुत्पादप्रसङ्गात् । कर्तृत्वाद्यभिमानराहित्येन श्रवणादौ कृते विद्यापि फलपर्यवसाना भवति अतस्तथैव कर्त्तव्यम् । अत्र चामानि-त्वमदम्भित्वमित्यादयो धर्मा अपि सूचिताः ॥ ३५७ ॥

ननु मुनः परिव्राजक इत्यत्र श्रवणादौ परिव्राजकोधिकारीत्युक्तं तत्किं स एवाधिकारी तर्हि विवेकादिसम्पन्नैगृहस्थादिभिरनुष्ठितं श्रवणादिकं व्यर्थं स्यादित्याशङ्क्य न केवलं तस्यैवाधिकारः किन्तु गृहस्थादीनामपि परन्तु तैरनुष्ठितं श्रवणादिकं कदाचित् संन्यासमासाद्यैवासंभावनादिनिवृत्तिद्वाराफलवद्विद्यां जनयति न तु तं विना अतो न व्यर्थमित्याह—

वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैः
कर्त्तव्यं सुनिषेवितं भवति वै जन्मान्तरे पाचकम्।
विद्यायाः श्रवणादिलक्षणमिदं न ह्येतदेषां कचि-
च्छास्त्रेण प्रतिषिद्धमौचितमिदं शूद्रस्य दृष्टं यथा ॥३५८॥

वानप्रस्थेति। जनशब्देन ब्राह्मणो विवक्ष्यते वर्णपदेन क्षत्रविशौ आश्रमपदेनोपकुर्वाण इति भेदः। कर्त्तव्यं साधनं सुनिषेवितं सादरं वैराग्याद्यमानित्वादिपूर्वमनुष्ठितमित्यर्थः। वैशब्दोऽवधारणे। जन्मान्तर इति परमहंससंन्यासकालोपलक्षणम्। पाचकं—परिपाकहेतुः। वानप्रस्थगृहस्थनैष्ठिकजनैरन्यैश्च वर्णाश्रमैः सुनिषेवितमिदं श्रवणादिलक्षणं कर्त्तव्यम्। जन्मान्तर एव विद्यायाः पाचकं भवतीत्यन्वयः। ननु ज्ञानसाधनश्रवणादौ गृहस्थादीनां वा कथं प्रवृत्तिः प्रापकाभावादित्याशङ्क्य श्रवणस्य दृष्टफलत्वेन सामान्यतो गृहस्थादीनामप्यधिकारप्राप्तेः। तस्य च शूद्रादेरिव निषेधाभावेनापवादाभावात् प्रवृत्तिः संभवतीत्यभिप्रेत्याह—न हीति। एतत्—श्रवणादिकमेषां गृहस्थादीनाम्. इदं—श्रवणादिनिषेधनम् ॥ ३५८ ॥

ननु यदि गृहस्थादीनामधिकारे सत्यपि तैः सम्यगनुष्ठितं श्रवणादिकं जन्मान्तर एव फलवद्विद्यां जनयति तर्हि परमहंसानुष्ठितं

कथमस्मिन्नेव जन्मनि जनयेदित्याशङ्क्य संन्यासस्यापि सर्वश्रुतिस्मृतिषु विद्यासाधनत्वेन श्रुतत्वात्सौकर्येण श्रवणाद्यनुष्ठानोत्कर्षस्यापि संभवात् तस्य च गृहस्थादावभावान्न तस्मिन् जन्मनि विद्योत्पत्तिः परमहंसे च तत्संभवात् तस्य तस्मिन्नेव जन्मनि प्रारब्धलक्षणपूर्वोक्तप्रतिबन्धकाभावे विद्योत्पत्तिः संभवतीत्याह—

सर्वश्रुतिस्मृतिवचोभिरयं परिव्राड्-
मुण्डः शुचिः परमहंस इति प्रसिद्धः।
ज्ञानाय साधनधनेषु नियुज्यमानः
प्रायेण बुद्धिपरिपाकमवाप्स्यतीह ॥ ३५६ ॥

सर्वश्रुतिस्मृतिवचोभिरिति । वक्ष्यमाणश्रुतिस्मृतिवचोभिः इदं च ज्ञानाय साधनगणेषु नियुज्य इत्यत्र सम्बध्यते । साधनगणेषु श्रवणादिषु परिव्राड् मुण्डः शुचिः परमहंस इति प्रसिद्धः । अथ परिव्राड् विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोहिभैक्षाणः सपरमहंसो नामेति परिव्राट्त्वादिना प्रसिद्धः अयं परिव्राजकः अधिकारी इह साधनानुष्ठानजन्मन्येव प्रायेण प्रतिबन्धकाभावे सति बुद्धिपरिपाकमवाप्स्यतीत्यर्थः ॥ ३५६ ॥

ननु संन्यासस्य विद्यापरिपाकहेतुत्वं न संभवति तं विनापि जनकयाज्ञवल्क्यादीनां फलवद्विद्योदयश्रवणात् अतः कथं गृहस्थादीनां जन्मान्तर एव बुद्धिपरिपाक इति चेन्न—जनकादीनामपि जन्मान्तरे संन्यासपूर्वकश्रवणाद्यनुष्ठानसंभवात् न च कल्पकाभावः ज्ञानोद्देशेन संन्यासविधानस्यैव तस्य कल्पकत्वात् अन्यथा तद्विधिवैयर्थ्यप्रसङ्गादित्यभिप्रेत्याह—

जन्मान्तरेषु यदि साधनजातमासी-
त्संन्यासपूर्वकमिदं श्रवणादिरूपम् ।
विद्यामवाप्स्यति जनः सकलोऽपि यत्र
तत्राऽऽश्रमादिषु वसन्न निवारयामः ॥ ३६० ॥

जन्मान्तरेष्विति । सकलोपि क्षत्रियादिरपि ॥ ३६० ॥

संन्यासस्य विद्यापरिपाकसाधनत्वे श्रुतिप्रमाणमाह—

वेदान्तविज्ञानसुनिश्चितार्थाः
संन्यासयोगाद्यतयः शुद्धसत्त्वाः ।
ते ब्रह्मलोकेषु परान्तकाले
परामृताः परिमुच्यन्ति सर्वे ॥ ३६१ ॥

वेदान्तेति ॥ ३६१ ॥

इतिहासमपि संन्यासकर्त्तव्यतायां प्रमाणमाह—

नैतादृशं ब्राह्मणस्यास्ति वित्तं
यथैकता समता सत्यता च ।
शीलं स्थितिर्दण्डनिधानमार्जवं
ततः ततश्चोपरमः क्रियाभ्यः ॥ ३६२ ॥

नैतादृशमिति । एकता—एकबुद्धिः, शीलम्—आचारः, दण्डनिधानम्—इन्द्रियनिग्रहः, ततस्ततः क्रियाभ्यः परमः—सकलकर्मत्यागलक्षणपरमहंससंन्यास इत्यर्थः ॥ ३६२ ॥

संन्यासस्यैवानर्थनिवृत्तिहेतुत्वे प्रमाणमाह—

यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्त्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥ ३६३ ॥

यतो यत इति। सर्वतो निवर्तनं संन्यासः ॥ ३६३ ॥

सर्वं संन्यस्यात्मैव ज्ञातव्य इत्यत्र भारतवचनमप्युदाहरति—

किं ते धनेन किमु बन्धुभिरेव वा ते
किं ते दारैर्ब्राह्मण यो मरिष्यसि।
आत्मानमन्विच्छ गुहां प्रविष्टं
पितामहास्ते क्व गताः पिता च ॥ ३६४ ॥

किं ते धनेनेति। धनादिसाध्यकर्मणां बन्धे हेतुत्वात् तत्सर्वं संन्यस्य आत्मानं विजिज्ञासस्वेत्यर्थः ॥ ३६४ ॥

संन्यास एव परमपुरुषार्थसाधनमित्यत्र स्मृतिमाह—

अर्थस्य मूलं निकृतिः क्षमा च
कामस्य रूपं च वयो वपुश्च।
धर्मस्य यागादि दया दमश्च
मोक्षस्य सर्वोपरमः क्रियाभ्यः ॥ ३६५ ॥

अर्थस्य मूलमिति। तस्मात् संन्यासस्य बुद्धिपरिपाकहेतुत्वेन तं विना फलवद्विद्योदयासंभवात् सर्वबहिरङ्गसाधनं संन्यस्य संसारदोषदर्शनेन विवेकवैराग्यदार्ढ्यं सम्पाद्य यावद्ब्रह्मात्मैक्यबुद्धिपरिपाकं शान्त्यादिभिः सह तत्त्वंपदार्थपरिशोधनरूपश्रवणादिकं कर्तृत्वाद्यभिमानराहित्येनानुतिष्ठेदिति सिद्धम् ॥ ३६५ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यजगन्नाथाश्रमश्रीचरणचरणपरिचरणप्राप्तविद्यानिखिलविद्वज्जनमनोहर श्रीनृसिंहाश्रमविरचितायां संक्षेपशारीरकव्याख्यां तत्त्वबोधिनीसमाख्यायां साधनाख्यस्तृतीयोऽध्यायः

समाप्तः ॥